43. O Janârdana, we have heard that men whose family virtues have come to an end are sure to live in hell.

अहो बत महत् पापं कर्त्तुं व्यवसिता वयम् ।
यद् राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥४४॥

४४। 'अहोबत !' महत्कष्टम् ! 'वयम् महत् पापं कर्त्तुम्' 'व्यवसिताः' चेष्टान्विताः, 'यत्' यतः 'राज्यसुखलोभेन स्वजनं हन्तुम् उद्यताः' ।

44. Oh! we are going to commit a great sin, for we are about to kill our own people from greed of the pleasures of kingship.

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥४५॥

४५। 'यदि शस्त्रपाणयः धार्त्तराष्ट्राः माम् अप्रतीकारम् अशस्त्रं' [दृष्ट्वा] रणे 'हन्युः' हनिष्यन्ति 'तत्' हननं 'मे' मम [ज्ञातिवध-जनित-पापस्पर्शात्] 'क्षेमतरं' श्रेयस्करं 'भवेत्' ।

45. If the armed sons of Dhritaráshtra should kill me in battle [when they find me] unresisting and unarmed, that would be better for me [than my incurring the sin of killing my kinsmen.]


सञ्जय उवाच

एवमुक्त्वाऽर्जुनः सङ्ख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥४६॥

४६। 'एवम् उक्त्वा अर्ज्जुनः' 'संख्ये' युद्धक्षेत्रे 'सशरं' 'चापं' धनुः 'विसृज्य' त्यक्त्वा 'शोकसंविग्नमानसः' शोकेन संविग्नं प्रकम्पितं मानसं चित्तं यस्य सः, तथा सन् 'रथोपस्थे' रथस्य उपरि 'उपाविशत्' उपाविवेश ।

46. Having said this in the battle-field, Arjuna, laying aside his bow and arrow, and with his mind overwhelmed with sorrow, sat down in the chariot.

सांख्ययोगो नाम द्वितीयोऽध्यायः



सञ्जय उवाच

तं तथा कृपयाऽऽविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥१॥

१। 'तथा कृपया आविष्टम्' 'अश्रुपूर्णाकुलेक्षणम्' अश्रुभिः पूर्णे आकुलता-सूचके च ईक्षणे नयने यस्य तम् 'विषीदन्तम्' विषादप्राप्तम् 'तम्' 'मधुसूदन इदम् वाक्यम् उवाच'।

1. To him, who was thus overwhelmed with compassion, whose eyes were filled with tears and expressed a distressed state of mind and who was full of sadness, Madhusúdana spoke these words ;—

श्रीभगवानुवाच

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥२॥

२। [हे] 'अर्ज्जुन', 'विषमे' अस्मिन् सङ्कटे 'इदम्' 'अनार्य्यजुष्टम्' नीचस्वभावैः सेवितम् 'अस्वर्ग्य' स्वर्ग-प्रतिरोधकं 'अकीर्त्तिकरम्' अयशस्करम 'कश्मलम्' मोहः, युद्धात् पराङ्मुखत्वम् 'कुतः' कस्मात् हेतोः 'त्वा' त्वाम 'समुपस्थितम्' आगतम ?

2. O Arjuna, in this critical moment whence has come to you this bewilderment (flinching from fighting) befitting a man of low character, obstructing the way to heaven and disgraceful ?

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥३॥

३। [हे] 'कौन्तेय', 'क्लैब्यं' क्लीवभावं, कातर्य्यं 'मा गमः' मा प्राप्नुहि ; 'न एतत् त्वयि', 'उपपद्यते' योग्यं भवति । [हे] 'परन्तप,' परं शत्रुं तापयति इति, 'क्षुद्र' क्षुद्रत्वसूचकं, सङ्कीर्णताजनितं 'हृदयदौर्बल्यम्' मनसः उद्यम-हीनतां 'त्यक्त्वा' [युद्धाय] 'उत्तिष्ठ' ।

3. O son of Kuntí, yield not to unmanliness ; it does not befit you. O harasser of foes, give up this faint-heartedness due to narrowness of mind and arise [for battle].

अर्जुन उवाच

कथं भीष्ममहं सङ्ख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥४॥

४। अर्ज्जुनः उवाच—हे 'मधुसूदन', हे 'अरिसूदन' शत्रुमर्द्दन, कथम् अहम् 'पूजार्हौ' पूजायोग्यौ 'भीष्मम् द्रोणं च' 'संख्ये' रणे 'इषुभिः' वाणैः 'प्रतियोत्स्यामि' ?

4. [Arjuna said,—] O Madhusúdana, O slayer

of enemies, how shall I attack in battle with arrows Bhíshma and Drona, both deserving my worship?

गुरूनहत्वा हि महानुभावान्
श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।
हत्वाऽर्थकामांस्तु गुरूनिहैव
भुञ्जीय भोगान् रुधिरप्रदिग्धान् ॥५॥

५। 'महानुभावान्' महामाहात्म्यसम्पन्नान् 'गुरून् अहत्वा इह लोके' 'भैक्ष्यम्' भिक्षान्नम् 'अपि भोक्तुम् श्रेयः'। 'तु' पक्षान्तरे 'गुरून् हत्वा इह एव' 'रुधिरप्रदिग्धान्' रुधिरलिप्तान् गुरुवधादिसाध्यान् 'अर्थकामान्' अर्थकामलक्षणान् 'भोगान्' 'भुञ्जीय' अहम् अश्नीयाम्। यद्वा 'अर्थकामान्' अर्थलिप्सून् इति गुरूणां विशेषणम् "बद्धोऽहमर्थेन कौरवैः" इति भीष्मवचनात्।

5. It is better even to live on alms in this world than to kill teachers of high character. On the other hand if I were to kill my teachers, I should have to enjoy pleasant things like wealth and comforts besmeared with blood.

न चैतद्विद्मः कतरन्नो गरीयो
यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषामः
तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥६॥

६। 'न च एतत्' 'विद्मः', जानीमः 'कतरत्' किं नाम 'नः' अस्माकं 'गरीयः' श्रेयः' भविष्यति ;—'यत् वा' [एतान् वयं] 'जयेम यदि वा' 'नः'

अस्मान् [एते] 'जयेयुः'। 'यान् एव हत्वा न' 'जिजीविषामः' जीवितुम् इच्छामः, 'ते धार्त्तराष्ट्राः' 'प्रमुखे' सम्मुखे 'अवस्थिताः'। अस्माकं जयोऽपि फलतः पराजय एव स्यादिति भावः।

6. And we do not know which of the two would be a greater good to us,—that we should vanquish them or that they should vanquish us. Those,—the sons of Dhritaráshtra,—having killed whom we do not wish to live, are standing before us.

कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसम्मूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥७॥

७। 'कार्पण्यदोष-उपहतस्वभावः' कातरतादोषेण उपहतः अभिभूतः स्वभावः क्षत्रियप्रकृतिः यस्य सः अहं 'धर्मसम्मूढचेताः' धर्मे कर्त्तव्यविषये ; सन्दिग्धमनाः [सन्] 'त्वाम् पृच्छामि'। 'यत् निश्चितं श्रेयः स्यात् तत् मे ब्रूहि'; 'शिष्यः ते अहं', 'त्वाम्' 'प्रपन्नं' शरणं गतं 'मां' 'शाधि' शिक्षय।

7. With my nature [as a warrior] overshadowed by compassion (or unmanliness) and my mind perplexed as to my duty, I ask you. Tell me what is really good. I am thy disciple. Teach me ; I take refuge in thee.

न हि प्रपश्यामि ममापनुद्याद्-
यच्छोकमुच्छोषणमिन्द्रियाणाम्।
अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यम् ॥८॥

८। 'यत् मम इन्द्रियाणाम्' 'उत्-शोषणम्' अतिशोषकरम्, दुर्ब्बलकरम् 'शोकम्' 'अपनुद्यात्' अपनयेत्, दूरीकुर्य्यात् [तत्] 'नहि प्रपश्यामि'। 'भूमौ' पृथिव्याम् 'असपत्नम्' प्रतिद्वन्द्विशून्यम् 'ऋद्धम्' धनपूर्णम् राज्यम् 'अवाप्य' प्राप्य [शोकापनोदनं न स्यात्] 'सुराणाम् अपि आधिपत्यं च' [न शोकम् अपनयेत्]।

8. I do not see that which may dispel my sadness, which is drying up (*i. e.* weakening) my organs. Neither an undisputed kingship on earth nor supremacy over the gods [will dispel it.]

सञ्जय उवाच

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥९॥

९। 'परन्तपः गुडाकेशः हृषीकेशम् एवम् उक्त्वा, न योत्स्ये इति [च] गोविन्दम् उक्त्वा' 'तुष्णीम्' निर्व्वाक् 'बभूव' 'ह' पादपूरणे।

9. Gudákesa, the harasser of foes, having said this to Hrishíkesa and [also] told Govinda 'I will not fight,' became silent.

तमुवाच हृषीकेशः प्रहसन्निव भारत।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥१०॥

१०। हे 'भारत, 'उभयोः सेनयोः मध्ये विषीदन्तम् तम् [अर्ज्जुनम्] 'हृषीकेशः' [तस्य हास्योद्दीपकं मनोभावं दृष्ट्वा] 'प्रहसन्' तम् उपहसन् 'इव इदम् वचः' उवाच।

10. To him [as he sat] depressed between the two armies, Hrishíkesa [amused at his perplexity] said these words, mocking him as it were.

श्रीभगवान् उवाच

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥११॥

११। 'त्वम्' 'अशोच्यान्' शोचितुम् अयोग्यान् भीष्मद्रोणादीन् 'अन्वशोचः' शोचितवानसि,—"दृष्ट्वेमान् स्वजनान् कृष्ण" इत्यादिवाक्येन ; 'प्रज्ञावादान्' पण्डितोचितान् शब्दान्,—"कथं भीष्ममहं संख्ये इत्यादीन्" 'च' 'भाषसे' कथयसि। न तु पण्डितोऽसि, यतः 'पण्डिताः' 'गतासून्' गतप्राणान् बन्धून् 'अगतासून्' जीवितान् 'च',—"बन्धुहीना वयं कथं जीविष्यामः" इति 'न अनुशोचन्ति'।

11. You are sorrowing for persons who are not true objects of sorrow, and at the same time uttering words of wisdom. (But) wise men grieve neither for the dead nor for the living.

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥१२॥

१२। 'न तु एव अहं' 'जातु' कदाचित् 'न आसम्' न अभूवम्, आसम् एव इत्यर्थः ; 'न त्वम्' [न आसीः, आसीः एव] ; 'न इमे' 'जनाधिपाः' नृपाः [न आसन्, आसन् एव]। 'न च एव सर्वे वयम् अतः परम्' 'न भविष्यामः' न पुनः देहान्तरं प्राप्स्यामः, भविष्यामः एव इत्यर्थः। अविनाशित्वात् सर्वे अशोच्याः इति भावः।

12. It is not (true) that I was not at any time and that you and these rulers of men were not; and that all of us shall not be after this time.

देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्ति र्धीरस्तत्र न मुह्यति ॥१३॥

१३। 'यथा अस्मिन् देहे देहिनः' 'कौमारं' बाल्यं 'यौवनं जरा' [भवन्ति] 'तथा देहान्तरप्राप्तिः' [च भवति]; 'तत्र' देहनाशे 'धीरः' 'न मुह्यति' आत्मनः नाशं न मन्यते।

13. As the embodied soul passes through the conditions of childhood, youth and old age in this body, so [at death] it assumes a fresh body. In this matter a wise man is not deluded [that is, he does not regard the death of the body as that of the soul.

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥१४॥

१४। हे 'कौन्तेय' कुन्तीनन्दन, हे 'भारत', 'मात्रास्पर्शाः' मात्राः इन्द्रियवृत्तयः, तासां स्पर्शाः विषयैः सह सम्बन्धाः, ते 'तु' 'शीतोष्णसुखदुःखदाः' [भवन्ति]। ते च] 'आगम अपायिनः' उत्पत्ति-विनाश-शालिनः, 'अनित्याः' [च, अतः तेषाम् अनिवार्य्यत्वात् अस्थिरत्वात् च] 'तान्' 'तितिक्षस्व' सहस्व। धीरस्य तितिक्षा एव कर्त्तव्या इति भावः।

14. O son of Kuntí, O descendant of Bharata, it is the impact of the senses with their objects which

gives cold and heat, pleasure and pain. They come and go, and so are transient. Endure them patiently [as it behoves a wise man.]

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥१५॥

१५। हे 'पुरुष-ऋषभः' पुरुषश्रेष्ठ, 'एते' शीतोष्णादयः 'यं' 'समदुःखसुखं' सुखदुःखे समभावापन्नं 'धीरं पुरुषं' न व्यथयन्ते अभिभवन्ति, 'सः' 'अमृतत्वाय' मोक्षलाभाय 'कल्पते' योग्यः भवति ।

15. O best of men, that wise man, the same (*i. e.* self-poised) in pleasure and pain, whom these (*i. e.* cold, heat &c.) cannot overwhelm, is fit for attaining immortality (*i. e.* liberation).

नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥१६॥

१६। 'असतः' शीतोष्णादेः 'भावः' स्वतन्त्रा निरपेक्षा सत्ता 'न विद्यते'; 'सतः' स्वतन्त्रसत्तावतः आत्मनः 'अभावः' विनाशः 'न विद्यते'। 'अनयोः उभयोः' सत्-असतोः द्वयोः 'अपि तु' 'अन्तः' निर्णयः 'तत्त्वदर्शिभिः दृष्टः'।

16. The unreal (*i. e.* such as cold, heat &c.,) has no [independent] existence, while the real (that is, the self) has no destruction. The real nature of these two has been seen by the seers of truth.

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति ॥१७॥

१७। 'येन' [आत्मना] 'इदं सर्वं' [जगत्] 'ततं' व्याप्तं 'तत् तु अविनाशि' 'विद्धि' जानीहि। 'न कः चित् अस्य' 'अव्ययस्य' अक्षयस्य 'विनाशं कर्तुम्' 'अर्हति' समर्थः भवति। जीव-परमभावौ एकीकृत्य अखण्डम् आत्मतत्त्वं कथयति एतदादिभिः श्लोकैः।

17. Know that [self] to be indestructible by which all this [world] is pervaded. No one can destroy that fadeless one.

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः।
अनाशिनोऽप्रमेयस्य तस्माद् युध्यस्व भारत ॥१८॥

१८। हे 'भारत, नित्यस्य अनाशिनः' 'अप्रमेयस्य' अपरिमेयस्य, अनन्तस्य 'शरीरिणः' देहधारिणः आत्मनः 'इमे देहाः' जीवशरीराणि [ज्ञानिभिः] 'अन्तवन्तः' विनाशशीलाः इति 'उक्ताः'; 'तस्मात्' [अनर्थकं शोकं परित्यज्य] 'युध्यस्व'।

18. O descendant of Bharata, these bodies of the eternal, indestructible, infinite embodied [self] have been pronounced to be destructible [by the wise]; so [giving up your vain sorrow for their destruction], do fight.

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥१९॥

१९। 'यः' 'एनम्' एतम् 'हन्तारं' 'वेत्ति' मन्यते, 'यः च एनम् हतं मन्यते' तौ उभौ [आत्मतत्त्वं] 'न विजानीतः' [यतः तत्त्वतः] न अयं हन्ति [अकर्तृत्वात्, तथा] न हन्यते [अकर्मत्वात्, अविनाशित्वात् च]। कठोपनिषत् १।२।१९ द्रष्टव्या।

19. He who thinks it to be a killer and he who regards it as killed, are both ignorant [of the truth, for in reality] it neither kills nor is killed.

न जायते म्रियते वा कदाचित्
नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥२०॥

२० । [आत्मा] 'कदाचित् न जायते म्रियते वा ; 'न वा अयम् [एकदा] भूत्वा' 'भूयः' पुनरपि 'भविता' भविष्यति । 'अयम् अजः नित्यः' 'शाश्वतः' अपक्षयवर्ज्जितः [तथा] 'पुराणः' चिरन्तनः । 'शरीरे हन्यमाने [अपि अयं] न हन्यते' । कठोपनिषत् १।२।१८ द्रष्टव्या ।

20. [The self] is never born or dies ; it neither [once] comes into being and again ceases to be. It is unborn, eternal, undecaying and everlasting. Even when the body is killed, it is not killed.

वेदाऽविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥२१॥

२१ । हे 'पार्थ, यः एनम् अविनाशिनम् नित्यम् अजम् अव्ययम्' 'वेद' वत्ति, 'सः' पुरुषः कथं कं घातयति कम् [वा] हन्ति' ? न कथं कमपि हन्ति घातयति वा इत्यर्थः ।

21. O son of Prithá, he who knows it to be indestructible, eternal, unborn and fadeless, how can that person kill any one or cause any one to be killed ?

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ॥२२॥

२२। 'यथा नरः जीर्णानि' 'वासांसि' वस्त्राणि 'विहाय' त्यक्त्वा 'अपराणि नवानि [वस्त्राणि] गृह्णाति, तथा देही जीर्णानि शरीराणि विहाय अन्यानि शरीराणि' 'संयाति' परिगृह्णाति ।

22. As man, putting off faded garments, puts on new ones, so the self, giving up worn-out bodies, assumes fresh bodies.

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥२३॥

२३। 'शस्त्राणि एनं न छिन्दन्ति', 'पावकः' अग्निः 'एनं न दहति । आपः च एनं न क्लेदयन्ति', 'मारुतः' वायुः [एनं] 'न शोषयति' ।

23. Weapons do not cut it, fire does not burn it. Water does not make it muddy, and air does not dry it up.

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥२४॥

२४। 'अयम् अच्छेद्यः, अयम् अदाह्यः, अक्लेद्यः अशोष्यः एव च । अयं नित्यः, सर्व्वगतः' 'स्थाणुः' स्थिरस्वभावः 'अचलः' [तथा] 'सनातनः' चिरस्थायी ।

24. It cannot be cut, burnt, made muddy or dried up. It is eternal, all-pervasive, of a stable nature, and everlasting.

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥२५॥

२५। अयम् अव्यक्तः, अचिन्त्यः [तथा] अविकार्य्यः उच्यते। तस्मात् एनम् एवम् विदित्वा न [त्वम्] शोचितुम् अर्हसि।

25. It is said to be unmanifest (or indescribable), unthinkable and unchangeable. Therefore, knowing it as such, you ought not to grieve for it.

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैनं शोचितुमर्हसि ॥२६॥

२६। 'अथ च' यद्यपि 'च एनं' 'नित्यजातं' प्रतिशरीरं जातं 'नित्यं मृतम्' प्रतिशरीरनाशं विनष्टं 'वा मन्यसे', 'तथापि [हे] महाबाहो न एनं शोचितुम् अर्हसि। 'नैवं' इति च पाठः।

26. If you regard it as born and dead again and again, (that is, born with the birth of each body, and dead with its destruction) even then, O mighty-armed hero, you ought not to grieve for it (or grieve 'in this manner' in case the reading is '*naivam*' instead of '*nainam*'.)

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥२७॥

२७। 'हि' यस्मात् 'जातस्य मृत्युः' 'ध्रुवः' निश्चितः, 'मृतस्य च जन्म ध्रुवम्। तस्मात्' [जन्ममरणलक्षणे] 'अपरिहार्य्ये' अवश्यम्भाविनि 'अर्थे' विषये 'न त्वं शोचितुम् अर्हसि'।

27. As to one born death is sure, and to one dead birth (re-birth) is sure, so over a matter which is inevitable, you ought not to grieve.

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥२८॥

२८। हे 'भारत' भरतवंशीय, 'भूतानि' शरीरादीनि द्रव्याणि 'अव्यक्तादीनि' अव्यक्तम् अनुपलब्धम् आदि प्रागुत्पत्तेरवस्था येषां तानि—अदृष्टपूर्व्वावस्थानि इत्यर्थः, 'व्यक्तमध्यानि' व्यक्तम् उपलब्धम् मध्यम् मध्यावस्था स्थित्यवस्था येषां तानि—दृष्ट-स्थित्यवस्थानि इत्यर्थः, 'अव्यक्तनिधनानि' अव्यक्तं निधनं लयः येषां तानि—अज्ञातलयानि इत्यर्थः, 'एव', 'तत्र' एवम्भूतेषु विषयेषु 'का परिदेवना' कः शोकनिमित्तः विलापः ?

28. O descendant of Bharata, objects (like the body) are unknown as to their origin, known only in tbeir middle state (their appearance as created objects,) and [again] unknown as to their destruction. Are such objects worthy of being wept for ?

आश्चर्यवत्पश्यति कश्चिदेनम्
आश्चर्यवद् वदति तथैव चान्यः।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाऽप्येनं वेद न चैव कश्चित् ॥२९॥

२९। 'कः चित्' [जनः] 'एनम्' आत्मानम् 'आश्चर्य्यवत्' अद्भुतम् इव 'पश्यति' मन्यते ; 'तथा एव च अन्यः [एनम्] आश्चर्य्यवत् वदति'। 'अन्यः च एनम् आश्चर्य्यवत् शृणोति ; कः चित् च एव एनम् श्रुत्वा अपि [तत्त्वतः] न वेद'। कठः १।२।७ द्रष्टव्यः।

29. One looks upon the self as something strange; again, one speaks of it as something strange. One hears of it as something strange, and one, even after hearing about it, does not know it (as it really is).

देही नित्यमवध्योऽयं देहे सर्व्वस्य भारत।
तस्मात् सर्व्वाणि भूतानि न त्वं शोचितुमर्हसि ॥३०॥

३०। हे 'भारत,' सर्व्वस्य देहे अयं देही' 'नित्यं' सर्व्वदा 'अवध्यः'। 'तस्मात् त्वं सर्व्वाणि भूतानि न शोचितुम् अर्हसि'।

30. O descendant of Bharata, in the body of all persons this self is always indestructible. You should not therefore grieve for any one.

स्वधर्म्ममपि चावेक्ष्य न विकम्पितुमर्हसि।
धर्म्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ॥३१॥

३१। 'स्वधर्म्मं' क्षात्रधर्म्मम् 'अपि च' 'अवेक्ष्य' दृष्ट्वा 'विकम्पितुम्' विचलितुं, युद्धे पराङ्मुखः भवितुम्, 'न अर्हसि'। 'हि' यतः 'क्षत्रियस्य' 'धर्म्म्यात्' धर्म्मात् अनपेतात्, न्याय्यात्, 'युद्धात् अन्यत् श्रेयः न विद्यते'।

31. Looking to your own duty too, you ought not

to shrink ; because for a Kshatriya (a warrior) there is nothing better than righteous war.

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥३२॥

३२ । हे 'पार्थ' 'सुखिनः' सुभाग्याः 'क्षत्रियाः [एव] ईदृशं' 'यदृच्छया उपपन्नम्' अप्रार्थितम् प्राप्तम् 'अपावृतम्' उन्मुक्तं 'स्वर्गद्वारम् [इव] युद्धं लभन्ते' ।

32. O son of Prithá, it is only lucky Kshatriyas who come across such a battle, one come unasked as an open door to heaven.

अथ चेत् त्वमिमं धर्म्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्म्मं कीर्त्तिञ्च हित्वा पापमवाप्स्यसि ॥३३॥

३३ । 'अथ चेत्' परन्तु यदि 'त्वम् इमं धर्म्म्यं संग्रामं न करिष्यसि' 'ततः' तदा 'स्वधर्म्मं कीर्त्तिं च' 'हित्वा' त्यक्त्वा 'पापम् अवाप्स्यसि' ।

33. But if you do not fight this righteous battle, you would neglect your duty and lose your fame [as a warrior] and [thereby] incur sin.

अकीर्त्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
सम्भावितस्य चाकीर्त्तिर्मरणादतिरिच्यते ॥३४॥

३४ । 'भूतानि' जनाः 'च' 'ते' तव 'अव्ययां' बहुकालस्थायिनीम् 'अकीर्त्तिं'

कथयिष्यन्ति'। 'सम्भावितस्य' सम्मानितस्य 'च अकीर्त्तिः मरणात्' 'अतिरिच्यते' अधिका भवति।

34. Besides, people will speak of your ill-fame for a long time. And in the case of an honoured person, ill-fame is a greater evil than death.

भयाद् रणादुपरतं मंस्यन्ते त्वां महारथाः।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥३५॥

३५। 'महारथाः त्वाम् भयात् रणात्' 'उपरतं' निवृत्तं 'मंस्यन्ते' चिन्तयिष्यन्ति। 'येषां च त्वम्' 'बहुमतः' बहुगुणत्वेन सम्मानितः 'भूत्वा' अभूः, [तेषां] 'लाघवं' लघुतां 'यास्यसि'।

35. The great warriors will think that you have desisted from fighting through fear, and you will be lowered in the estimation of those who thought highly of you.

अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥३६॥

३६। 'तव' 'अहिताः' शत्रवः 'च तव सामर्थ्यं निन्दन्तः बहून्' 'अवाच्यवादान्' वचनायोग्यान् शब्दान् 'वदिष्यन्ति'। 'ततः' 'नु' प्रश्ने 'किं दुःखतरं' [स्यात्] ?

36. And your enemies, speaking ill of your valour, will say many things not worthy of being said. What would be worse than that ?

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥३७॥

३७। 'हतः वा स्वर्गं प्राप्स्यसि, जित्वा वा महीम् भोक्ष्यसे'। 'तस्मात्' हे 'कौन्तेय,' 'युद्धाय' 'कृतनिश्चयः' दृढ़सङ्कल्पः [सन्] 'उत्तिष्ठ'।

37. Either you will be killed and will [thus] reach heaven; or you will win and thus enjoy the world. Therefore, O son of Kuntí, arise with a firm resolution to fight.

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥३८॥

३८। 'सुखदुःखे समे कृत्वा, लाभ-अलाभौ जय-अजयौ [च समौ कृत्वा] ततः युद्धाय युज्यस्व' उद्युक्तः भव। 'एवं' साम्येन युद्धं कुर्वन् 'न पापम् अवाप्स्यसि'।

38. Looking alike on pleasure and pain, gain and loss, victory and defeat, then be ready for fight. If you fight in this spirit, you will not incur sin.

एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥३९॥

३९। सांख्ययोगयोः मौलिकम् असाम्प्रदायिकम् अर्थम् अत्र वदति। "सम्यक् ख्यायते प्रकाश्यते वस्तुतत्त्वम् अनयेति 'संख्या' सम्यक् ज्ञानम्। तस्यां प्रकाशमानम् आत्मतत्त्वं 'सांख्यम्' "—इति श्रीधरस्वामी। हे पार्थ,

'सांख्ये' आत्मतत्त्वविषये करणीया 'एषा' पूर्व्वोक्ता 'बुद्धिः' 'ते' तुभ्यम् अभिहिता ; 'तु' पश्चात्तरे 'योगे' कर्म्मयोगविषये 'इमां' परवर्त्तिषु श्लोकेषु वक्ष्यमाणाम् [बुद्धिं] शृणु, 'यया बुद्ध्या युक्तः [सन्] कर्म्मबन्धम् 'प्रहास्यसि' विशेषेण छेत्स्यसि ।

39. This instruction (which has just been imparted) to you relates to Sánkhya * (the science of the self's true nature) ; hear now this (the one about to be imparted) with reference to Yoga, * equipped with which instruction you will effectively sever the bonds of *karma* (selfish action.)

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्म्मस्य त्रायते महतो भयात् ॥४०॥

४० । 'इह' अत्र कर्म्मयोगे 'न' 'अभिक्रमनाशः' प्रारम्भस्य नाशः निष्फलत्वम् अस्ति ; 'प्रत्यवायः' पापस्पर्शः, अनिष्टप्राप्तिः [च] न विद्यते । 'अस्य धर्म्मस्य' कर्म्मयोगसाधनस्य 'सु अल्पम् अपि [साधकम्] महतः भयात्' 'त्रायते' रक्षति ।

40. In this [practice of *karma-yoga*] the first efforts [even if they are not continued] do not prove fruitless ; and there is no harm or incurring of sin [owing to their discontinuance.] Even a little of this pious practice protects [the aspirant] from great fear.

---

* 'Sánkhya' and 'Yoga' in their original unsectarian meanings, not as names of distinct schools of Philosophy.

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥४१॥

४१। हे 'कुरुनन्दन,' 'इह' श्रेयोमार्गे 'व्यवसायात्मिका' स्थिरप्रज्ञा-जनिता 'एका' [एव] 'बुद्धिः' मतिः, सङ्कल्पः, 'योगमार्गम् अनुसरामि' इति [भवति ; पक्षान्तरे] 'अव्यवसायिनाम् स्थिरप्रज्ञारहितानाम् 'बुद्धयः' मतयः, सङ्कल्पाः 'बहुशाखाः' नानाविषयिन्यः—धनविषयिण्यः, यशोविषयिण्यः, भोगविषयिण्यः इति यावत्, 'अनन्ताः च' [भवन्ति] ।

41. O descendant of Kuru, in this [matter of following the path of good] there is only one single determination which proceeds from a fixed understanding [namely the determination of practising *karma-yoga*, while] the determinations of those devoid of a fixed understanding are many-branched (*i. e.* various, seeking many objects) and infinite in number.

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥४२॥
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥४३॥
भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥४४॥

४२-४४। हे 'पार्थ', 'अविपश्चितः' अज्ञानिनः 'वेदवादरताः' नानाकर्मफल-प्रतिश्रुति-युक्तेषु वेदवाक्येषु अनुरक्ताः, 'नान्यदस्तीतिवादिनः' ईदृशफलभोग्येभ्यः न अन्यत् श्रेयः अस्ति इति वादिनः वदनशीलाः, 'कामात्मानः'

कामाकुलितचित्ताः 'स्वर्गपराः' इन्द्रलोकप्राप्तिपरायणाः 'याम् इमाम्' 'पुष्पिताम्' आपातमनोरमाम् 'जन्म-कर्म्मफल-प्रदाम्' पुनर्जन्मरूप-कर्म्मफल-प्रदायिणीम् 'भोगैश्वर्य्यगतिं प्रति' 'भोगैश्वर्य्ययोः प्राप्त्यर्थं 'क्रियाविशेष-बहुलाम्' बहुल-क्रियाविशेषोपदेशयुक्ताम् 'वाचम् प्रवदन्ति, तया' 'अपहृतचेतसाम्' आकृष्टचित्तानाम् 'भोगैश्वर्य्यप्रसक्तानाम्' भोगैश्वर्य्ययोः प्रवणवतां [जनानां] 'समाधौ' ब्रह्मणि चित्तैकाग्रे 'व्यवसायात्मिका बुद्धिः' स्थिरप्रज्ञाजनिता मतिः, दृढसङ्कल्पः 'न विधीयते' न उत्पद्यते ।

42-44. O son of Prithá, no firm determination, proceeding from a fixed understanding, for *samádhi* (establishing the heart in God) arises in the mind of those who are attached to pleasure and power and whose hearts are carried away by the flowery speech promising re-birth as the fruit of action and inculcating various acts for the attainment of pleasure and power,—(the speech) which those fools utter who are attracted by Vedic texts, who say there is nothing else (than these texts promise), whose hearts are distracted by [low] desires and whose chief object is the attainment of heaven (the abode of Indra.)

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥४५॥

४५। हे अर्ज्जुन, 'वेदाः' 'त्रैगुण्यविषयाः' सत्त्वादिगुणात्मक-कर्म्मफल-प्रतिपादकाः ; [त्वं तु] 'निस्त्रैगुण्यः' कर्म्मफलकामनाशून्यः 'निर्द्वन्द्वः' शीतोष्ण-सुखदुःखादि-परस्परविरोधि-युगलातीतः, 'नित्यसत्त्वस्थः' सदा सत्त्व-गुणान्वितः, सदा स्वरूपप्रतिष्ठितः वा, 'निर्योगक्षेमः' अप्राप्तस्य उपार्ज्जनं योगः,

प्राप्तस्य रक्षणं क्षेमः, तद्रहितः, निस्पृहः इत्यर्थः, [तथा] 'आत्मवान्' आत्मप्रतिष्ठितः, अप्रमत्तः 'भव'।

45. The Vedas treat of the three *gunas* (*i. e.* of things composed of the three primary qualities of nature, *sattvam*, *rajas*, *and tamas*); [but] be thou free from the three *gunas*, free from the conflicting pairs [of heat and cold, pleasure and pain &c.] ever endowed with the quality of goodness (or established in your true nature), free from the desire of acquisition and preservation and self-possessed (or watchful.)

यावानर्थ उदपाने सर्व्वतः संप्लुतोदके ।
तावान् सर्व्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥४६॥

४६। 'सर्व्वतः' सर्व्वत्र 'संप्लुतोदके' जलप्लाविते सति 'उदपाने' वापीकूपतड़ागादि-क्षुद्रजलाशये 'यावान्' यत्परिमाणः 'अर्थः' प्रयोजनम्, [अस्ति] 'विजानतः' विवेकवतः 'ब्राह्मणस्य' ब्रह्मविदः 'सर्व्वेषु वेदेषु' 'तावान्' तत्परिमाणः [एव अर्थः अस्ति]। सर्व्वत्र जलप्लाविते सति यथा उदपाने न किञ्चित् प्रयोजनम् अस्ति, विवेकवतः ब्रह्मविदः तथा सकामकर्म्मविषये वेदे न किञ्चित् प्रयोजनम् अस्ति, इति भावः।

46. For an enlightened Brâhmana (*i. e.* knower of Brahman) there is as much need of the Vedas as there is of small reservoirs of water when every place is flooded with water. [That is, as there is no need of small reservoirs of water when there is a widespread inundation, so there is no need of the Vedas when God is known.]

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥४७॥

४७ [कर्मणि एव ते अधिकारः [अस्ति], कदाचन फलेषु ['अधिकारः' कामः] 'मा' [अस्तु] । 'मा' 'कर्मफलहेतुः' कर्मफलकामो 'भूः' स्याः, [तथा च] 'अकर्मणि मा ते' 'सङ्गः' प्रीतिः 'अस्तु' भवतु ।

47. Action alone is your sphere, its fruit should never be desired by you. Do not make the fruit of action your motive, [but on the other hand] be not fond of inaction.

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥४८॥

४८ । हे 'धनञ्जय' धनं जयति इति, अर्ज्जुननामान्तरम्, 'सङ्गं' कर्मफलकामं 'त्यक्त्वा' 'सिद्ध्यसिद्ध्योः' सफलता-निष्फलता-विषये 'समः' निरपेक्षः 'भूत्वा' 'योगस्थः' ब्रह्मणि स्थितः सन् 'कर्माणि कुरु' । [ईदृशं] 'समत्वम्' [एव] 'योगः उच्यते' ।

48. O Dhananjaya (a name of Arjuna, lit. conqueror of wealth), do your actions without attachment [to their fruits], indifferent to success or failure, and established in union [with God]. It is this indifference (or balanced state of the mind) which is called *yoga*.

दूरेण ह्यवरं कर्म बुद्धियोगाद् धनञ्जय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥४९॥

४९। हे धनञ्जय, 'कर्म्म' सकामकर्म्म 'बुद्धियोगात्' ज्ञानयुक्त-निष्काम-कर्म्मयोगात् 'दूरेण' अत्यन्तम् 'अवरं' निकृष्टम्। [अतः] बुद्धौ (ज्ञानान्वित-कर्म्मयोगे) 'शरणम्' आश्रयम् 'अन्विच्छ' अनुतिष्ठ। 'फलहेतवः' कर्म्मफल-कामाः नराः 'कृपणाः' कृपायोग्याः, दीनाः।

49. O Dhananjaya, [interested] action is by a long way inferior to wisdom (*i. e.* disinterested action done from true knowledge). Take refuge in wisdom. Pitiable are those who desire the fruits of actions.

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद् योगाय युज्यस्व योगः कर्म्मसु कौशलम् ॥५०॥

५०। 'बुद्धियुक्तः' समत्वबुद्ध्या युक्तः साधकः 'इह' अस्मिन् जन्मनि एव, कर्म्मयोगसाधने वा, 'उभे' सुकृत-दुष्कृते' सुकृतं स्वर्गादिप्रापकं सकामं कर्म्म, दुष्कृतं निरयादिप्रापकं सकामं कर्म्म, ते उभे 'जहाति' त्यजति। 'तस्मात्' 'योगाय' कर्म्मयोगाय 'युज्यस्व' उद्युक्तः भव, [यतः] 'कर्म्मसु' [यत्] 'कौशलं' बन्धकानाम् अपि तेषाम् मोक्षपरत्व-सम्पादन-चातुर्य्यम् [सः एव] 'योगः'।

50. Here (*i. e.* in this life or in the practice of *karmayoga*) one endowed with wisdom eschews both meritorious and sinful actions [done from interested motives]. So, strive for *yoga*, which is that skill in doing actions [which turns them into means of liberation].

कर्म्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥५१॥

५१। 'बुद्धियुक्ताः मनीषिणः कर्म्मजं फलं त्यक्त्वा' 'जन्मबन्धविनिर्मुक्ताः' जन्मरूपेण बन्धेन सम्यक् मुक्ताः सन्तः 'अनामयम्' आमयः रोगः, दुःखम्, तत्-शून्यम् दुःखातीतम् 'पदम्' ब्रह्मपदं, मोक्षम् 'गच्छन्ति' प्राप्नुवन्ति ।

51. Sages endowed with wisdom give up the fruits accruing from actions, and [thus] freed from the bonds of [repeated] birth, attain to the condition [of liberation] which is without sorrow.

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्व्वेदं श्रोतव्यस्य श्रुतस्य च ॥५२॥

५२। 'यदा ते बुद्धिः' 'मोहकलिलं' मोहरूपं दुर्गमं वनम् 'व्यतितरिष्यति' सम्यक् अतिक्रमिष्यति, 'तदा' श्रोतव्यस्य 'वेदवाक्येभ्यः ज्ञातव्यस्य, 'श्रुतस्य' तेभ्यः ज्ञातस्य 'च' [विषयस्य] 'निर्व्वेदं' वैराग्यं 'गन्ता असि' प्राप्स्यसि, कर्म्मकाण्डोक्तेषु भोगेषु एव उपेक्षा भविष्यति, इत्यर्थः ।

52. When your understanding will fully come out of the forest of delusion, you will become indifferent to what is heard and to be heard [from the ceremonial Vedas ; that is to the pleasures promised in them.]

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥५३॥

५३। 'श्रुति-विप्रतिपन्ना' श्रुतिभिः नानाकर्म्मफलप्रद-वेदवाक्यैः विप्रतिपन्ना विक्षिप्ता 'ते बुद्धिः यदा' निश्चला' [भूत्वा] 'समाधौ' 'अचला' दृढ़तया 'स्थास्यति तदा' [त्वम्] 'योगम्' 'अवाप्स्यसि' प्राप्स्यसि ।

53. When your understanding, which is [now] distracted by Vedic sayings [promising various fruits of actions] will become calm and be firmly established *in communion, then will you attain the state of yoga.*

अर्जुन उवाच

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥५४॥

५४। [अर्ज्जुन उवाच—] हे 'केशव' दीर्घकेशयुक्त, विष्णो, 'स्थितप्रज्ञस्य' स्थिता प्रतिष्ठिता प्रज्ञा बुद्धिः यस्य सः स्थितप्रज्ञः तस्य, 'समाधिस्थस्य' समाधौ स्थितस्य [जनस्य] 'का भाषा' किं लक्षणम्? 'स्थितधीः' स्थितबुद्धिः 'किं' कथम् 'प्रभाषेत' वाक्यप्रयोगं कुर्य्यात्? 'किम् आसीत' कथं जीवनधारणं कुर्य्यात्? 'व्रजेत किम्' कथं चलनादिकं कुर्य्यात्? "सर्व्वत्र सम्भावनायां लिङ्" इति मधुसूदनः।

54. [Arjuna said] O Kesava (lit. one having long hair, a name of Vishnu) what are the characteristics of a man of steady understanding, one established in communion? How does a man of steady understanding speak, live and move?

श्रीभगवानुवाच

प्रजहाति यदा कामान् सर्व्वान् पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥५५॥

५५। [श्रीभगवान् उवाच—] हे 'पार्थ,' 'यदा' [साधकः] 'आत्मनि एव' स्वस्मिन् एव 'आत्मना' परमात्मदर्शनेन 'तुष्टः' 'सर्व्वान्' 'मनोगतान्' मनसि स्थितान् 'कामान्' 'प्रजहाति' परित्यजति 'तदा' [सः] 'स्थितप्रज्ञः उच्यते'।

55. [The Lord said—] O son of Prithá, when [the aspirant], satisfied with the vision of the [supreme] Self in himself, entirely gives up all the [lower] desires of his heart, he is then called 'steady in understanding.'

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥५६॥

५६। 'दुःखेषु' 'अनुद्विग्नमनाः' (अक्षुभितचित्तः) 'सुखेषु' 'विगतस्पृहः' तृष्णाविरहितः, 'वीतरागभयक्रोधः' वीताः अपगताः काम-भय-क्रोधाः यस्मात् सः 'मुनिः' मननशीलः जनः 'स्थितधीः' स्थिरबुद्धिः 'उच्यते'।

56. One whose mind is free from anxiety in the midst of sufferings, who is free from desire in the midst of pleasures, and devoid of attachment, fear and anger, such a sage is called a man of steady understanding.

यः सर्व्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम्।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥५७॥

५७। 'यः' 'सर्व्वत्र' सर्व्वविषये 'अनभिस्नेहः' अनासक्तः, 'तत्-तत् शुभाशुभं' 'तद्विषयकंसुखदुःखं' 'प्राप्य' [यः] 'न अभिनन्दति' न हृष्यति, 'न द्वेष्टि' न रुष्टः भवति, 'तस्य प्रज्ञा प्रतिष्ठिता' [एव]।

57. He who is without attachment in all things,

who neither rejoices nor is repelled on meeting with pleasures or sufferings proceeding from these things,—his understanding is steady.

यदा संहरते चायं कूर्म्मोऽङ्गानीव सर्व्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥५८॥

५८। 'यदा च' 'अयं' [साधकः] 'इन्द्रियार्थेभ्यः' रूपरसादि-इन्द्रिय-विषयेभ्यः [तस्य] 'इन्द्रियाणि' 'संहरते' प्रत्याहरति, 'कूर्म्मः सर्व्वशः अङ्गानि इव,' यथा कच्छपः सम्यक्रूपेण स्वाङ्गानि उपसंहरति, [तदा] 'तस्य प्रज्ञा प्रतिष्ठिता' [एव] ।

58. And when he [the aspirant] draws away his senses from their objects, as a tortoise fully draws away its limbs, [then] his understanding is steady.

विषया विनिवर्त्तन्ते निराहारस्य देहिनः ।
रसवर्ज्जं रसोऽप्यस्य परं दृष्ट्वा निवर्त्तते ॥५९॥

५९। 'निराहारस्य' इन्द्रियैः विषयग्रहणम् अकुर्व्वतः 'देहिनः' देहवतः जनस्य [सकाशात्] 'विषयाः' रूपरसादयः 'विनिवर्त्तन्ते' विषयानुभवः निवर्त्तते इत्यर्थः ; [किन्तु] 'रसवर्ज्जम्' रसः रागः विषयाभिलाषः, तद्वर्ज्जम्, विषयाभिलाषः न निवर्त्तते इत्यर्थः । 'अस्य' साधकस्य 'रसः अपि' 'परं' परमात्मानं 'दृष्ट्वा' 'निवर्त्तते' नश्यति ।

59. Objects of sense turn away from a person who does not enjoy them (that is his enjoyment of them ceases) ; but his relish (*i. e.* lurking desire) for them

does not cease, But even his (the aspirant's) relish ceases on his seeing the Supreme.

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥६०॥

६० । हे 'कौन्तेय' कुन्तीपुत्र, 'यततः' मोक्षार्थं यत्नशीलस्य 'विपश्चितः' विवेकिनः 'पुरुषस्य हि अपि' 'प्रमाथीनि' विक्षेपकराणि 'इन्द्रियाणि' [अस्य] मनः 'प्रसभं' बलात् 'हरन्ति' विपथगामिनं कुर्वन्ति ।

60. O son of Kuntí, the uncontrolled (lit. destructive, harassing) senses even of a wise man striving [after liberation] forcibly lead [his] mind astray.

*तानि सर्व्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥६१॥

६१ । 'युक्तः' योगी 'तानि सर्व्वाणि' [इन्द्रियाणि] 'संयम्य' वशीकृत्य 'मत्परः' मन्निष्ठः [सन्] 'आसीत' । 'इन्द्रियाणि यस्य हि वशे' [सन्ति] 'तस्य प्रज्ञा प्रतिष्ठिता' ।

61. Bringing them all under control, the *yogi* should remain intent on me. His understanding is steady who has his senses under his control.

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते ॥६२॥

६२। 'विषयान् ध्यायतः पुंसः' 'सङ्गः' आसक्तिः 'तेषु' 'उपजायते' उत्पद्यते। 'सङ्गात्' 'कामः' तृष्णा 'सञ्जायते,' 'कामात् [कुतश्चित् प्रतिहतात्] 'क्रोधः अभिजायते'।

62. If a man intently thinks of certain objects. attachment to them arises in his mind. From attachment arises desire, and from desire [when it is balked] arises anger.

क्रोधाद् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥६३॥

६३। 'क्रोधात्' 'सम्मोहः' अविवेकः कार्य्याकार्य्यविषय-विभ्रमः 'भवति,' 'सम्मोहात्' 'स्मृतिविभ्रमः' शास्त्राचार्य्योपदिष्टार्थ-स्मृतेः विभ्रमः विचलनं, भ्रंशः [भवति]; 'स्मृतिभ्रंशात्' 'बुद्धिनाशः' कर्त्तव्यबुद्धि-विलोपः [भवति], 'बुद्धि-नाशात्' [पुमान्] 'प्रणश्यति' आत्मिकजीवनं त्यजति, 'पुरुषार्थायोग्यो भवति' इति शङ्करः।

63. From anger comes delusion, and from delusion the failure of memory (that is the forgetting of high precepts); from the failure of memory follows the destruction of reason (*i. e.* the sense of duty) and with the loss of reason the man perishes [spiritually].

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥६४॥

६४। 'रागद्वेषवियुक्तैः आत्मवश्यैः इन्द्रियैः विषयान्' 'चरन्' भुञ्जानः

'विधेयात्मा' विधेयः वशवर्त्ती आत्मा मनः यस्य सः 'प्रसादम्' प्रसन्नतां, शान्तिम्, स्वास्थ्यम् (शङ्करः) 'अधिगच्छति' प्राप्नोति ।

64. The self-possessed person who enjoys objects with senses free from attachment and repulsion and under the control of the mind, obtains peace.

प्रसादे सर्व्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्य्यवतिष्ठते ॥६५॥

६५ । 'प्रसादे' [सति] 'अस्य' साधकस्य 'सर्व्वदुःखानां' 'हानिः' विनाशः 'उपजायते' भवति । 'हि' यतः 'प्रसन्नचेतसः' शान्तान्तःकरणस्य 'बुद्धिः' 'आशु' शीघ्रम् 'परि-अवतिष्ठते' प्रतिष्ठिता भवति ।

65. When peace comes, all his (the aspirant's) sufferings are at an end. For the understanding of one whose heart is at peace soon becomes steady.

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥६६॥

६६ । 'अयुक्तस्य' अवशीकृतेन्द्रियस्य 'बुद्धिः' आत्मज्ञानम् 'नास्ति ; अयुक्तस्य' 'भावना' ध्यानशीलता 'च न' [अस्ति] । 'न च' 'अभावयतः' भावनाहीनस्य 'शान्तिः' [अस्ति], 'अशान्तस्य' कुतः सुखम् [भवति] ?

66. One whose senses are uncontrolled has no knowledge [of the self], and he is without the habit of meditation. An unmeditative man can have no peace ; how can one without peace be happy ?

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥६७॥

६७। 'चरताम्' विषयेषु धावताम्, अवशीकृतानाम् 'इन्द्रियाणाम्' [मध्ये] 'यत्' [इन्द्रियम्] 'मनः' 'अनुविधीयते' अनुगच्छति, 'तत्' [इन्द्रियम्] 'अस्य' मनसः, पुरुषस्य वा 'प्रज्ञां' 'हरति' विषयविक्षिप्तां करोति, 'अम्भसि' जले 'वायुः' 'नावम्' नौकाम् इव,—यथा नद्याम् समुद्रे वा वायुः प्रमत्तस्य कर्णधारस्य नौकां सर्व्वतः परिभ्रामयति तद्वत् ।

67. Of the uncontrolled senses that one which the mind follows, leads its reason astray, as in a river or sea the wind [leads astray] a boat [with a careless helmsman].

तस्माद् यस्य महाबाहो निगृहीतानि सर्व्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥६८॥

६८। 'तस्मात्' हे 'महाबाहो' यस्य इन्द्रियाणि इन्द्रियार्थेभ्यः सर्व्वशः 'निगृहीतानि' प्रज्ञाबलेन आकृष्टानि, 'तस्य प्रज्ञा प्रतिष्ठिता' ।

68. Therefore, O mighty-armed hero, his understanding is steady whose senses are fully turned away from the objects of sense.

या निशा सर्व्वभूतानां तस्यां जागर्त्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥६९॥

६९। 'सर्व्वभूतानां' दिव्यज्ञानविहीन-साधारण-जनानां [पक्षे] 'या

निशा' [इव], यत्र ब्रह्मनिष्ठायाम् प्राकृताः जनाः न किञ्चित् अपि सत्यं श्रेयस्करं वा पश्यन्ति, इत्यर्थः, 'तस्यां' 'संयमी' जितेन्द्रियः 'जागर्ति' प्रबुध्यते, तत्र परमार्थं पश्यति, इत्यर्थः। 'यस्याम्' विषयनिष्ठायाम् 'भूतानि' प्राकृताः पुरुषाः 'जाग्रति' प्रबुध्यन्ते, श्रेयोबुद्ध्या प्रवर्त्तन्ते, 'पश्यतः' ज्ञानवतः मुनेः [पक्षे] 'सा निशा' [इव],—तत्र सः किञ्चिदपि परमार्थं न पश्यति, इत्यर्थः।

69. What is night to all [unenlightened] beings, therein awakes he who is self-controlled. Wherein awake [ordinary] beings, that is night to the sage who [really] sees.

आपूर्य्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत्।
तद्वत् कामा यं प्रविशन्ति सर्व्वे
स शान्तिमाप्नोति न कामकामी ॥७०॥

७०। 'आपः' नद्यः 'यद्वत्' यथा [नाना नदीभिः] 'आपूर्य्यमाणम्' पूर्णताप्राप्तम् 'अचलप्रतिष्ठम्' अचलतया अवस्थितम् 'समुद्रम् प्रविशन्ति', 'तद्वत्' तथा 'सर्व्वे' 'कामाः' काम्यविषयाः 'यम्' [ब्रह्मणि तृप्तिमापन्नम् पुरुषम्] 'प्रविशन्ति' भोग्यविषयरूपेण आगच्छन्ति, सः शान्तिम् आप्नोति, 'न' 'कामकामी' भोगकामनाशीलः [शान्तिं प्राप्नोति]।

70. As rivers enter the sea, which is full and unmoved, so it is he into whom objects of desire enter [unsought] who obtains peace, and not he who seeks them.

विहाय कामान् यः सर्व्वान् पुमांश्चरति निःस्पृहः ।
निर्म्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥७१॥

७१ । 'यः पुमान् सर्व्वान् कामान्' 'विहाय' उपेक्ष्य 'निःस्पृहः' 'निर्म्मम:' मम इदम् इति भावनाशून्यः 'निरहङ्कारः' [च भूत्वा] 'चरति' भोगान् भुङ्क्ते, 'सः शान्तिम्' अधिगच्छति' प्राप्नोति ।

71. That person obtains peace who, giving up all desires, enjoy objects of sense with a mind devoid of attachment, selfishness and egotism.

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वाऽस्यामन्तकालेऽपि ब्रह्मनिर्व्वाणमृच्छति ॥७२॥

७२ । हे 'पार्थ,' एषा ब्राह्मी स्थितिः, 'एनाम्' एताम् 'प्राप्य' [साधकः] 'न' 'मुह्यति' मोहं प्राप्नोति । 'अस्याम्' 'अन्तकाले' मरणकाले 'अपि स्थित्वा' [सः] 'ब्रह्मनिर्व्वाणं' ब्रह्मणि लयम्, ब्रह्मयोगेन अहंकारविलोपं 'ऋच्छति' प्राप्नोति ।

72. O son of Prithá, this is the divine standpoint ; on obtaining it [the aspirant] is freed from delusion. Established in this condition even in his last moment, one obtains absorption in Brahman.

कर्म्मयोगो नाम तृतीयोऽध्यायः

——.0:——

अर्जुन उवाच

ज्यायसी चेत् कर्मणस्ते मता बुद्धि र्जनार्दन ।
तत् किं कर्मणि घोरे मां नियोजयसि केशव ॥१॥

१ । [अर्ज्जुनः उवाच,—] हे 'जनार्द्दन,' हे 'केशव,' 'चेत्' यदि 'कर्म्मणः' [सकाशात्] बुद्धिः [एव] 'ज्यायसी' श्रेष्ठा [इति] 'ते' 'मता' सम्मता, 'तत्' तदा 'किं' कथं 'मां' 'घोरे' भयानके, हिंसात्मके 'कर्म्मणि' 'नियोजयसि' प्रवर्त्तयसि ?

1. [Arjuna said,—] O Janárdana, O Kesava, if, in your opinion, wisdom is higher than work, why then do you induce me to undertake this terrible work ?

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥२॥

२ । 'व्यामिश्रेण इव' क्वचित् ज्ञानप्रशंसा क्वचित् कर्म्मप्रशंसा इति एवं द्व्यर्थकेन सन्देहोत्पादकेन इव 'वाक्येन' [त्वम्] 'बुद्धिं मे' 'मोहयसि' आच्छन्नां करोषि इव । 'येन अहं श्रेयः आप्नुयाम् तत् एकं' [वाक्यं] 'निश्चित्य वद' ।

2. You seem to delude my understanding by words

apparently ambiguous. Tell me something sure, through which I may obtain the true good.

श्रीभगवान् उवाच

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ ।
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥३॥

३। [श्रीभगवान् उवाच,—] हे 'अनघ' निष्पाप, 'अस्मिन् लोके द्विविधा' 'निष्ठा' साधनपरता [अस्ति इति] 'मया 'पुरा' पूर्व्वाध्याये 'उक्ता'। 'ज्ञानयोगेन' 'सांख्यानाम्' आत्मानात्म-विवेकिनाम् [निष्ठा उक्ता] 'कर्म्म-योगेन योगिनां' [निष्ठा उक्ता]।

3. [The Lord said,—] O sinless one, I said before [in the last chapter] that there are two kinds of pious endeavour in the world. [I indicate the endeavour] of the Sánkhyas by '*jnánayoga*' and that of the Yogis by '*karmayoga*'.

न कर्म्मणामनारम्भान्नैष्कर्म्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥४॥

४। 'कर्म्मणाम् अनारम्भात्' कर्म्मानुष्ठानेन विना [चित्तशुद्धेरभावात्] 'पुरुषः' 'नैष्कर्म्म्य' कर्म्मशून्यतां, ज्ञानं 'न अश्नुते' न प्राप्नोति। 'न च' 'सन्न्यासनात्' कर्म्मत्यागात् 'एव' [सः] 'सिद्धिं' मोक्षं 'समधिगच्छति' लभते।

4. Unless one does works [on which depends the purity of the heart] one does not gain not-work (*i. e.*

wisdom). Nor does one obtain success (*i. e.* liberation) by merely giving up work.

न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवश: कर्म सर्व: प्रकृतिजैर्गुणै: ॥५॥

५। 'न हि क: चित्' 'जातु' कदाचित् 'क्षणम् अपि अकर्म्मकृत्' [सन्] तिष्ठति। 'हि' यस्मात् 'सर्व्व:' [एव जन:] 'प्रकृतिजै: गुणै:' सत्त्व-रज:-तमोभि:, रागद्वेषादिभि: 'अवश:' अस्वतन्त्र: [सन्] 'कर्म्म कार्य्यते' कर्म्मणि प्रवर्त्तते।

5. No one ever exists even for a moment without doing some work. For all are led to work under compulsion by qualities inherent in Prakriti (Nature).

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् विमूढात्मा मिथ्याचार: स उच्यते ॥६॥

६। 'य:' 'विमूढात्मा' विमूढान्त:करण: 'कर्म्मेन्द्रियाणि' वाक्पाण्यादीनि 'संयम्य' निगृह्य 'मनसा' 'इन्द्रियार्थान्' रूपरसादि-इन्द्रियविषयान् 'स्मरन्' 'आस्ते' तिष्ठति, 'स:' 'मिथ्याचार:' कपटाचार: उच्यते।

6. That fool who, having restrained [only] his organs of action, sits contemplating the objects of sense with his mind, is called a hypocrite.

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियै: कर्मयोगमसक्त: स विशिष्यते ॥७॥

७। हे 'अर्ज्जुन,' यः तु 'मनसा' 'इन्द्रियाणि' चक्षुरादि-ज्ञानेन्द्रियाणि 'नियम्य' ईश्वरपराणि कृत्वा 'असक्तः' फलाभिलाषरहितः [सन्] 'कर्म्मेन्द्रियैः कर्म्मयोगम्' 'आरभते' अनुतिष्ठति, 'सः' 'विशिष्यते' विशिष्टः भवति।

7. O Arjuna, he who, having regulated his senses with his mind, practises *karma-yoga* with his organs of action, with a heart unattached [to its fruits,] is the superior person.

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्राऽपि च ते न प्रसिध्येदकर्मणः ॥८॥

८। 'त्वं' 'नियतम्' अवश्यकर्त्तव्यरूपेण विहितं 'कर्म्म' कुरु, 'हि' यतः 'अकर्म्मणः' सर्व्वकर्म्मणः अकरणात् सकाशात् 'कर्म्म' [एव] 'ज्यायः' श्रेष्ठम्, प्रशस्ततरम्। 'अकर्म्मणः' सर्व्वकर्म्मशून्यस्य 'ते' तव 'शरीरयात्रा' शरीररक्षा, जीवणधारणम् 'अपि' 'न प्रसिध्येत्' न भवेत्।

8. Do your prescribed duties, for action is better than inaction. If you do not act, even the keeping up of your body (*i. e.* life itself) will be impossible.

यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥९॥

९। हे 'कौन्तेय', 'यज्ञार्थात्' "यज्ञः परमेश्वराराधनम्" इति उपाध्यायः, तदर्थं यत् क्रियते कर्म्म तद् यज्ञार्थं, तस्मात् 'कर्म्मणः' 'अन्यत्र' अन्यविधकर्म्मणि प्रवृत्तः 'अयं लोकः' अयं कर्म्मकृत् 'कर्म्मबन्धनः' कर्म्म बन्धनं यस्य सः, कर्म्मभिः बध्यते इत्यर्थः, न तु ईश्वराराधनार्थेन कर्म्मणा। [अतः] 'मुक्तसङ्गः' फला-

सक्तिशून्य: [सन्] 'तदर्थम्' ईश्वरप्रीत्यर्थं 'कर्म्म' 'समाचर' सम्यक् श्रद्धादि-पुर:सरम् आचर। "यज्ञो वै विष्णुरिति श्रुतेर्यज्ञ ईश्वरस्तदर्थं यत् क्रियते तद् यज्ञार्थं कर्म्म" इति शङ्कर:।

9. O son of Kuntí, every one who acts otherwise than in a spirit of sacrifice (*i. e.* worship) is liable to be bound [by his acts.] So act in that spirit, free from attachment.

सहयज्ञा: प्रजा: सृष्ट्वा पुरोवाच प्रजापति: ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥१०॥

१०। 'पुरा' सर्गादौ 'प्रजापति:' प्राणिनां स्रष्टा 'सहयज्ञाः' यज्ञसहिता: 'प्रजा:' प्राणिन: 'सृष्ट्वा' [ता: इदम्] 'उवाच'—'अनेन' यज्ञेन 'प्रसविष्यध्वम्' प्रसव: वृद्धि:, तां लभध्वम् ; 'एष:' यज्ञ: 'व:' युष्माकम् 'इष्टकामधुक्' इष्टान् कामान् दोग्धि प्रापयति इति, अभीष्टभोगप्रद: 'अस्तु'।

10. In the beginning [of creation] the Lord of creatures, having created them together with sacrifice, said, 'Go on increasing by means of this, let it be the supplier of your wants.'

देवान् भावयतानेन ते देवा भावयन्तु व: ।
परस्परं भावयन्त: श्रेय: परमवाप्स्यथ ॥११॥

११। 'अनेन' यज्ञेन 'देवान्' भावयत: हविर्भागै: सम्वर्द्धयत, 'ते देवा:' 'व:' युष्मान् ,भावयन्तु' सम्वर्द्धयन्तु—वृष्ट्यादिना अन्नोत्पत्तिद्वारेण। [एवम्] 'परस्परम् भावयन्त:' [देवा: च यूयं च] 'परं श्रेय:' 'अवाप्स्यथ' प्राप्स्यथ।

11. Honour the gods by this means, and let the gods favour you [by growing food for you through rain and such other means.] Thus helping one another you will attain the highest good.

इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥१२॥

१२ । 'यज्ञभाविताः देवाः वः इष्टान् भोगान् हि दास्यन्ते' । 'यः तैः दत्तान् [अन्नादीन्] एभ्यः' 'अप्रदाय:' अदत्त्वा—'भुङ्क्ते सः' 'स्तेनः' चौरः 'एव' ।

12. Honoured by sacrifices, the gods will give you the objects of enjoyment you desire. He who enjoys things given by them without offering them to the givers, is a thief.

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥१३॥

१३ । 'यज्ञशिष्टाशिनः' यज्ञावशिष्टं ये अश्नन्ति ते 'सन्तः' साधवः 'सर्व्वकिल्बिषैः' सर्व्वपापैः 'मुच्यन्ते' । 'ये तु' 'पापाः' दुराचाराः 'आत्मकारणात्' आत्मनः भोजनार्थम् एव 'पचन्ति, ते' 'अघम्' पापम् एव 'भुञ्जते' ।

13. Those pious men who eat what remains after sacrifices, are freed from all sins. But the impious who cook only for themselves [really] eat sin (*i. e.* unhallowed food.)

अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद् भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥१४॥

१४। 'भूतानि' प्राणिनः [शुक्रशोणितरूपेण परिणतात्] 'अन्नात्' भवन्ति; 'पर्जन्यात्' वृष्टेः 'अन्नसम्भवः' अन्नस्य उत्पत्तिः। 'पर्जन्यः यज्ञात् भवति, यज्ञः' 'कर्मसमुद्भवः' ऋत्विक्-यजमानयोः कर्मणः व्यापारात् समुद्भवः उत्पत्तिः यस्य सः, ऋत्विकादि-व्यापार-समुत्पन्नः ।

14. Creatures arise from food [when reduced to semen and blood] ; and food arises from rain. Rain arises from sacrifice, and sacrifice from action (*i. e.* the efforts made by the priests and the sacrificer).

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माऽक्षरसमुद्भवम् ।
तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥१५॥

१५। 'कर्म' 'ब्रह्मोद्भवं' ब्रह्म वेदः, तस्मात् उद्भूतं तेन विहितत्वात्, 'विद्धि' जानीहि; 'ब्रह्म' वेदः 'अक्षर-समुद्भवम्' परब्रह्मणः निश्वसितम् (बृहदारण्यके २।४।१०) [जानीहि]; 'तस्मात्' 'सर्वगतं' सर्वव्यापि 'ब्रह्म' परब्रह्म सर्व-[कारणरूपेण] 'नित्यं यज्ञे प्रतिष्ठितम्' ।

15. Know that action arises from the Veda [as enjoined by it] and the Veda from the Imperishable [Supreme Being.] Therefore the all-pervading Brahman as [the cause of all] is ever present in sacrifice.

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥१६॥

१६। हे 'पार्थ', 'एवम्' [ईश्वरेण वेदयज्ञपूर्व्वकं] 'प्रवर्त्तितं' विहितं, नियतं 'चक्रं' कर्म्मचक्रं 'यः' 'अघायुः' पापजीवनः 'इन्द्रियारामः' इन्द्रियैः विषयेषु एव यः आरमति सुखं प्राप्नोति इति, इन्द्रियसुखरतः [पुरुषः] 'न अनुवर्त्तयति' न अनुतिष्ठति, सः 'मोघं' व्यर्थं 'जीवति'।

16. O son of Prithá, that sinful man, taking pleasure only in sensuous objects, who does not follow the wheel thus set in motion [by God], lives in vain.

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ॥१७॥

१७। 'यः' मानवः 'तु' 'आत्मरतिः' आत्मनि प्रीतिमान्, 'आत्मतृप्तः' आत्मनि एव च सन्तुष्टः 'स्यात्' 'तस्य' 'कार्य्यं' कर्त्तव्यं 'न विद्यते', विषयेषु अनासक्तत्वात् स कर्म्म कुर्व्वन् एव कर्म्मातीतः, न कर्म्मणा बध्यते इत्यर्थः।

17. He who loves the Self, is satisfied with the Self, and rejoices in the Self, has nothing which he is *bound* to do.

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥१८॥

१८। 'न एव तस्य' 'कृतेन' कर्म्मणा 'इह' [जगति] 'कश्चन' 'अर्थः' पुण्यं [भवति], 'न' 'अकृतेन' अकर्म्मणा [कश्चित् प्रत्यवायः भवति]; 'न च सर्व्वभूतेषु' 'अस्य कश्चित्' 'अर्थ-व्यपाश्रयः' "प्रयोजनालम्बनम्" इति शङ्करः, "मोक्षप्राप्तौ आश्रयणीयः" इति श्रीधरः।

18. Nothing accrues [in the form of merit or demerit] from what he here does or does not. In the world of objects or living beings, there is nothing on which he must depend for realising his object. (*i. e*, liberation).

तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः ॥१८॥

१९ । तस्मात् 'सततं' नित्यं 'असक्तः' फलाकाङ्क्षा-वर्ज्जितः [सन्] 'कार्य्यं' करणीयम् 'कर्म्म समाचर' । 'हि' यतः 'पुरुषः असक्तः' [सन्] 'कर्म्म आचरन्' 'परं' श्रेयः 'आप्नोति' ।

19. So always do your duties without attachment. For when a person does his duty without attachment, he obtains the highest good.

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि सम्पश्यन् कर्तुमर्हसि ॥२०॥

२० । 'जनकादयः कर्म्मणा एव हि संसिद्धिम्' 'आस्थिताः' प्राप्ताः । 'अपि' च 'लोकसंग्रहम्' लोकस्य संग्रहः स्वधर्म्मे प्रवर्त्तनम् निजदृष्टान्तेन, तम् एव' [प्रयोजनं] 'संपश्यन्' दृष्ट्वा [त्वं कर्म्म] 'कर्त्तुम् अर्हसि', त्वया कर्म्म कर्त्तव्यम् एव इत्यर्थः ।

20. It is by action that Janaka and others obtained success (or perfection). Besides, with a view to inducing people [to do their duties] you ought to act.

यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते ॥२१॥

२१। 'श्रेष्ठः [जनः] यत् यत् आचरति' 'इतरः' अपरः, अश्रेष्ठः [जनः] 'तत् तत् एव' [आचरति]। 'सः' श्रेष्ठः जनः 'यत्' 'प्रमाणं कुरुते' दृष्टान्तम् प्रदर्शयति, 'लोकः तत् अनुवर्त्तते'।

21. As a superior person acts, so does an inferior. What he sets up as an example, common people follow.

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥२२॥

२२। हे 'पार्थ', 'त्रिषु लोकेषु' स्वर्ग-मर्त्त्य-रसातलेषु 'न मे किं-चन कर्त्तव्यम् अस्ति', [न च किं-चन] 'अवाप्तम्' अप्राप्तम् 'अवाप्तव्यम् [अस्ति, तथा] 'च' [अहं] 'कर्म्मणि वर्त्ते एव' कर्म्म करोमि एव।

22. O son of Prithá, in the three worlds (*i. e.* heaven, earth and the nether world) I have nothing that I am bound to do. And there is nothing that I have not obtained and must obtain ; and yet I am working.

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥२३॥

२३। हे 'पार्थ', 'यदि हि अहं' 'अतन्द्रितः' अनलसः [सन्] 'जातु' कदाचित् 'कर्म्मणि न वर्त्तेयं' [तदा] 'मनुष्याः' 'सर्व्वशः' सर्व्वप्रकारैः, सर्व्वत्र 'मम' 'वर्त्म' मार्गं, दृष्टान्तम् 'अनुवर्त्तन्ते' अनुवर्त्तेरन् इत्यर्थः।

23. O son of Prithá, if ever I were to cease to work untired, men would everywhere follow my example.

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।
सङ्करस्य च कर्त्ता स्यामुपहन्यामिमाः प्रजाः ॥२४॥

२४। 'चेत्' यदि 'अहं कर्म्म न कुर्य्यां' [तदा] 'इमे लोकाः' 'उत्सीदेयुः' विनश्येयुः। [किं च अहं] 'सङ्करस्य च कर्त्ता स्याम्' [अपि च] 'इमाः प्रजाः' इमान् प्राणिनः 'उपहन्याम्' विनाशयेयम् ।

24. If I did not work, these worlds would perish, and I should be the author of the mixing of castes and should destroy these creatures.

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद् विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसङ्ग्रहम् ॥२५॥

२५। हे 'भारत' अविद्वांसः' अज्ञानिनः 'कर्म्मणि' 'सक्ता' अनुरक्ताः [सन्तः] 'यथा' [कर्म्म] 'कुर्व्वन्ति', 'विद्वान्' ज्ञानी 'तथा' 'असक्तः' अनासक्तः 'लोकसंग्रहं' 'चिकिर्षुः' कर्त्तुम् इच्छुः [सन् कर्म्म] कुर्य्यात् ।

25. O descendant of Bharata, as the ignorant act, attached to action [for the sake of its fruits] so should the wise act, without attachment and with a view to induce people to act.

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन् ॥२६॥

२६। "आत्मा अकर्त्ता" इति उपदेशेन 'अज्ञानां' 'कर्म्मसङ्गिनां' कर्म्मणि आसक्तानां 'बुद्धिभेदं' "मया इदं कर्त्तव्यं, भोक्तव्यं च अस्य फलम्" इति बुद्धेः भेदनं चालनं "न जनयेत्' न उत्पादयेत्। [परन्तु] विद्वान्' 'युक्तः' अनासक्तः [सन्] 'सर्व्वकर्म्माणि समाचरन्' [तेषु तान्] 'जोषयेत्' तान् कर्म्माणि कारयेत् इत्यर्थः। "बुद्धिविचालने कृते सति कर्म्मसु श्रद्धानिवृत्तेः ज्ञानस्य च अनुत्पत्तेः तेषाम् उभयभ्रंशः स्यात् इति भावः"—श्रीधरः।

26. One should not unsettle the intellect of ignorant people attached to action. [On the contrary] the wise should, by performing all actions [remaining all the while] unattached, persuade the former to do them.

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते ॥२७॥

२७। 'कर्म्माणि' 'सर्व्वशः' सर्व्वतः 'प्रकृतेः गुणैः' प्रकृतेः विकारैः इन्द्रियैः [एव] 'क्रियमाणानि' [भवन्ति]। [किन्तु] 'अहङ्कार-विमूढात्मा' अहंकारेण आच्छन्नबुद्धिः [जनः] 'अहं' [तेषां] 'कर्त्ता इति' 'मन्यते'।

27. All actions are being done by the *gunas* (*i. e.* powers or qualities) of Nature. [But] one deluded by egotism thinks I am [their] agent.

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥२८॥

२८। 'तु' किन्तु हे 'महाबाहो,' 'गुणकर्म्मविभागयोः'—"न अहं

गुणात्मकः" इति गुणेभ्यः आत्मनः विभागः, "न मे कर्म्माणि" इति कर्म्मभ्यः आत्मनः विभागः, तयोः विभागयोः 'तत्त्ववित्' 'गुणाः गुणेषु' 'वर्त्तन्ते' प्रवर्त्तन्ते, क्रियां कुर्व्वन्ति, न अहम्, 'इति मत्वा' 'न सज्जते' कर्त्तृत्वाभिनिवेशं न करोति।

28. But, O mighty-armed hero, he who really knows the [self's] distinction from *gunas* and *karma*, does not indulge in egotism (*i. e.* does not regard either as his own) knowing that [in all actions only] *gunas* act on *gunas* (*i. e.* the organs act on the objects.)

प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्म्मसु।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत् ॥२९॥

२९। 'प्रकृतेर्गुणसम्मूढाः' प्रकृतेः गुणैः सम्यक् मोहिताः [जनाः] 'गुणकर्म्मसु' गुणैः कृतेषु कर्म्मसु 'सज्जन्ते' आत्मीयबुद्धिं कुर्व्वन्ति। 'कृत्स्नवित्' सम्यक्दर्शी 'तान्' 'अकृत्स्नविदः' असम्यक्दर्शिनः 'मन्दान्' अल्पप्रज्ञान् 'न विचालयेत्' कर्म्मश्रद्धातः न प्रच्यावयेत्।

29. Those who are deluded by the qualities of Nature, regard the actions done by these qualities as their own actions. One having perfect knowledge should not unsettle those foolish persons of imperfect knowledge.

मयि सर्वाणि कर्माणि संन्यस्याऽध्यात्मचेतसा।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥३०॥

३०। 'मयि सर्व्वाणि कर्म्माणि' 'संन्यस्य' समर्प्य 'निराशीः' निष्कामः

'निर्म्मम:' न इदं कर्म्म मम, परन्तु ईश्वरस्य एव, इतिभावयुक्त:, 'विगतज्वर:' त्यक्तशोक: 'भूत्वा' 'अध्यात्मचेतसा' विवेकबुद्ध्या—"कर्त्रे ईश्वराय भृत्यवत् करोमि इति अनया बुद्ध्या" (शङ्कर:) 'युध्यस्व' युद्धं कुरु ।

30. Offering all actions to me, becoming unattached, selfless and free from sorrow, fight with a heart resting in the [supreme] Self.

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवा: ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभि: ॥३१॥

३१ । [मद्वाक्ये] 'श्रद्धावन्त:' [मयि] 'अनसूयन्त:' असूयां दोषदृष्टिम् अकुर्व्वन्त: 'ये मानवा: इदं मे मतम् अनुतिष्ठन्ति ते अपि कर्म्मभि: मुच्यन्ते' ।

31. Those who, having trust [in me] and cherishing no ill feeling [against me] follow this teaching of mine, are freed from actions (*i. e.* their binding power).

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतस: ॥३२॥

३२ । 'ये तु एतत् मे मतम्' 'अभ्यसूयन्त:' निन्दन्त: 'न अनुतिष्ठन्ति', 'सर्व्वज्ञानविमूढान् तान्' 'अचेतस:' अविवेकिन: 'नष्टान्' "विनाशं गतान्" (शङ्कर:), "सर्व्वपुरुषार्थभ्रष्टान्" (मधुसूदन:) 'विद्धि' जानीहि ।

32. But those who, finding fault with this teaching of mine, do not follow it, know those foolish men, devoid of all knowledge, to be lost.

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥३३॥

३३। 'ज्ञानवान् अपि' 'स्वस्याः प्रकृतेः' स्वकीयस्य स्वभावस्य 'सदृशम्' अनुरूपं कर्म्म 'चेष्टते' करोति। 'भूतानि' प्राणिनः 'प्रकृतिं' स्वभावम् 'यान्ति' अनुगच्छन्ति, 'निग्रहः' शासनं "मम वान्यस्य वा" (शङ्करः) 'किं करिष्यति'? निवर्त्तयितुं न शक्नोति इत्यर्थः।

33. Even wise men act according to their character. All creatures follow their respective nature; what will coercion do?

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ ॥३४॥

३४। 'इन्द्रियस्य' 'अर्थे' विषये, रूपरसादौ 'इन्द्रियस्य' चक्षुरादेः 'रागद्वेषौ' अनुकूले रागः प्रतिकूले द्वेषः, इत्येवं 'व्यवस्थितौ' प्रकृत्या नियतौ। [तथापि] 'तयोः वशं न आगच्छेत्', 'हि' यतः 'तौ' रागद्वेषौ 'अस्य' मुमुक्षोः पुरुषस्य 'परिपन्थिनौ' प्रतिपक्षौ।

34. On the part of each sense, attraction and repulsion are established [by Nature—attraction to the pleasant, repulsion from the unpleasant.] [Yet] one should not yield to them, for they are his enemies (*i. e.* obstructions to his liberation.)

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥३५॥

३५। 'सु-अनुष्ठितात्' 'परधर्म्मात्' निज-गुण-विरूपात् कर्म्मणः 'विगुणः' किञ्चित्-अङ्गहीनः [अपि] 'स्वधर्म्मः' निज-गुणानुरूपं कर्म्म श्रेयान्। 'स्वधर्म्मे' निज-गुणोचित कर्म्मणि [प्रवर्त्तमानस्य] 'निधनं' मरणम् [अपि] 'श्रेयः,' [पक्षान्तरे] 'परधर्मः' 'निज-गुणविरुद्ध-कर्म' 'भयावहः' दुर्गतिप्रापकः।

35. One's own duty, even if imperfectly done, is better than another's duty well discharged. Even death in the performance of one's own duty is desirable, [but] another's duty is dreadful (*i. e.* leads to fearful consequences.)

अर्जुन उवाच

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥३६॥

३६। [अर्ज्जुन उवाच—] 'अथ' विषयान्तरम् उत्थापयति, हे 'वार्ष्णेय' वृष्णिवंशजात,—वृष्णिः यादवविशेषः, [पापं कर्त्तुम्] 'अनिच्छन् अपि अयं पूरुषः केन 'प्रयुक्तः' चालितः, 'बलात् इव नियोजितः' [सन्] 'पापं चरति' पापकर्म आचरति ?

36. [Arjuna said,—] Now, O descendant of Vrishni, by whom or what is a man, even when unwilling to do so, led to commit sin, constrained, as it were, by force.

श्रीभगवान् उवाच

काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥३७॥

३७। [श्रीभगवान् उवाच,—] 'रजोगुणसमुद्भवः' 'महाशनः' महत् अशनं यस्य, दुष्पूरः इत्यर्थः 'महापाप्मा' महापापकारकः—"कामेन प्रेरितो जन्तुः पापं करोति" (शङ्करः)—अत्युग्रः 'एषः कामः एषः क्रोधः' 'एनम्' एतम् 'इह' अत्र, पापकरणविषये, संसारे वा (शङ्करः) 'वैरिणम् विद्धि'। "कामात् क्रोधोऽभिजायते" (२।६२) इति कामक्रोधयोरैक्यम् उक्तम्।

37. [The Lord said,—] This desire (or attraction) this anger (or repulsion), which arises out of the quality of *rajas* (*i. e.* natural attraction) and which is insatiable and a great source of sin,—know this to be the enemy in this matter (or in this world).

धूमेनाऽव्रियते वह्निर्यथाऽऽदर्शो मलेन च।
यथोल्वेनावृतो गर्भस्तथा तेनेदमावृतम् ॥३८॥

३८। 'यथा वह्निः धूमेन' 'आव्रियते' आच्छाद्यते, [यथा] 'आदर्शः' दर्पणः 'मलेन' [आव्रियते], 'यथा' [च] 'गर्भः' भ्रूणः 'उल्वेन' जरायुणा 'आवृतः' 'तथा' 'इदं' ज्ञानं 'तेन' कामेन 'आवृतम्'।

38. As fire is covered by smoke, as a looking glass by dirt, as a foetus by the uterus, so is this (*i. e.* wisdom) clouded by it (*i. e.* desire.)

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥३९॥

३९। हे 'कौन्तेय, ज्ञानिनः नित्यवैरिणा एतेन' 'दुष्पूरेण' दुःखेन पूरणम्

निर्व्वापणम् यस्य इति दुष्पूरः तेन, दुर्निवारेण 'एतेन कामरूपेण' अनलेन ज्ञानम् आवृतम् ।

39. O son of Kuntí, wisdom is clouded by this fire of desire difficult to be extinguished, the constant enemy of the wise.

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥४०॥

४० । 'इन्द्रियाणि मनः बुद्धिः अस्य' 'अधिष्ठानम्' आश्रयः, उपायः 'उच्यते',—इन्द्रियाणां दर्शनश्रवणादिभिः, मनसः सङ्कल्पेन, बुद्धेः अध्यवसायेन कामस्य आविर्भावः भवति, इत्यर्थः । 'एतैः' उपायभूतैः इन्द्रियादिभिः 'एषः' कामः 'ज्ञानम् आवृत्य' 'देहिनम्' देहधारिणम् आत्मानम् 'विमोहयति' ।

40. The senses, the sensorium and the understanding are said to be its instruments. Having clouded wisdom by means of them, it deludes the embodied self.

तस्मात् त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥४१॥

४१ । 'तस्मात्', हे 'भरतर्षभ, त्वम्' 'आदौ' पूर्व्वम् 'इन्द्रियाणि' 'नियम्य' वशीकृत्य 'एनं ज्ञानविज्ञाननाशनं पाप्मानं' [कामं] 'प्रजहि' घातय । "ज्ञानं शास्त्राचार्य्योपदेशजं विज्ञानं निदिध्यासनजम्" इति श्रीधरः ।

41. Therefore, O chief of the descendants of Bharata, having first brought the senses under your control, kill this source of sin, the destroyer of know-

ledge [acquired through instruction] and wisdom [gained through insight.]

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्य: परं मन: ।
मनसस्तु परा बुद्धिर्यो बुद्धे: परतस्तु स: ॥४२॥

४२। [स्थूलदेहात्] 'इन्द्रियाणि' [तेषां सूक्ष्मत्वात् विषय-प्रकाशकत्वात् च] 'पराणि' श्रेष्ठाणि, 'इन्द्रियेभ्य:' [सङ्कल्पविकल्पात्मकं] 'मन:' 'परं' श्रेष्ठम्, 'मनस: तु' [निश्चयात्मिका] 'बुद्धि:' 'परा' श्रेष्ठा [इति पण्डिता:] 'आहु:'। 'य: तु बुद्धे:' 'परत:' अतीत:, तत्-साक्षिरूपेण अवस्थित:, 'स:' [एव आत्मा]।

42. [The wise] say that the senses are higher [than the gross body], the sensorium higher than the senses, and the understanding higher than the sensorium. One who is beyond the understanding is he [the self.]

एवं बुद्धे: परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥४३॥

४३। हे 'महाबाहो', एवं बुद्धे: परं [आत्मानं] 'बुद्ध्वा' 'आत्मानम्' मन: 'आत्मना' निश्चयात्मिकया बुद्ध्या 'संस्तभ्य' निश्चलं कृत्वा 'दुरासदं' दु:खेन आसद: प्राप्ति: स्वरूपनिरूपणं यस्य तं दुर्निर्णेयं 'कामरूपं शत्रुं जहि'।

43. Thus, O mighty-armed hero, knowing him who is beyond the understanding and subduing your mind by your understanding, slay the enemy in the form of desire, whose nature is difficult to comprehend.

कर्म्मब्रह्मार्पणयोगो नाम चतुर्थोऽध्यायः

——:*:——

श्रीभगवान् उवाच

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥१॥

१। [श्रीभगवान् उवाच,—] 'अहम् इदम्' 'अव्ययम्' अक्षयम्, अक्षय-फलत्वात् [कर्म्म-] 'योगम्' 'विवस्वते' आदित्याय 'प्रोक्तवान्' कथितवान्। 'विवस्वान्' सूर्य्यः [स्वपुत्राय] 'मनवे प्राह', 'मनुः' [निजपुत्राय] 'इक्ष्वाकवे' अब्रवीत्।

1. [The Lord said,—] I expounded this fadeless [doctrine of *karma-*] *yoga* to the Sun-god. The Sun-god declared it to Manu, and Manu communicated it to Ikshváku.

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ॥२॥

२। हे 'परन्तप', शत्रुतापन, 'एवं' 'परम्पराप्राप्तम्' गुरुशिष्यपरम्परया आगतं 'योगं राजर्षयः' 'विदुः' जानन्ति स्म। '[परन्तु] 'महता' दीर्घेण 'कालेन' 'इह' [लोके] 'सः' [योगः] 'नष्टः' विच्छिन्न-सम्प्रदायः जातः।

2. O harasser of enemies, thus handed down from one to another, this *yoga* doctrine became known to the royal sages. [But] in course of a long period of time it was lost in this world.

स एवाऽयं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥३॥

३ । 'सः एव अयं पुरातनः योगः मया' 'ते' तुभ्यम् 'अद्य प्रोक्तः', [त्वम] 'मे' मम 'भक्तः असि, सखा च' [असि] 'इति' [हेतोः], 'हि' यतः [च] 'एतत्' 'उत्तमं रहस्यम्' अतिगोप्यम्, अतः अभक्ताय अवक्तव्यम् इति भावः ।

3. I have to-day communicated this ancient [system of] *yoga* to you, as you are my devotee, and friend, and as it is a great secret [incommunicable to the impious.]

अर्जुन उवाच

अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतत् विजानीयां त्वमादौ प्रोक्तवानिति ॥४॥

४ । [अर्जुनः उवाच,—] 'भवतः जन्म' 'अपरम्' अर्वाचीनं, 'विवस्वतः जन्म' 'परं' प्राक्कालीनम् । [तस्मात्] 'त्वम्' 'आदौ [विवस्वते योगं] प्रोक्तवान् इति एतत् कथं' 'विजानीयाम्' ज्ञातुं शक्नुयाम् ?

4. [Arjuna said,—] Your birth took place later, [whereas] the Sun-god's birth was earlier. So, how

can I think that you first expounded [the *yoga* doctrine to the Sun-god ?]

श्रीभगवान् उवाच

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्व्वाणि न त्वं वेत्थ परन्तप ॥५॥

५। [श्रीभगवान् उवाच,—] हे 'अर्ज्जुन,' 'मे तव च बहूनि जन्मानि' 'व्यतीतानि' अतिक्रान्तानि। हे 'परन्तप, अहं तानि सर्व्वाणि' 'वेद' वेद्मि, 'न त्वं [तानि]' 'वेत्थ' जानीषे ।

5. [The Lord said,] O Arjuna, many births of mine and yours are already past. I know them all, but you know them not, O tormentor of foes.

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥६॥

६। 'अजः' जन्मरहितः, 'अव्ययात्मा' अनश्वरस्वभावः 'भूतानाम्' 'ईश्वरः' नियन्ता 'सन् अपि', 'स्वां' स्वकीयां 'प्रकृतिं' स्वभावं, पूर्णत्वम् 'अधिष्ठाय' स्वीकृत्य, "तस्यां स्थित्वा, न ततः प्रच्युत्य" इति उपाध्यायः, 'आत्ममायया' निज-अनिर्व्वचनीय-शक्त्या 'सम्भवामि' "देहवानिव भवामि, जात इव...न परमार्थतो लोकवत्" इति शङ्करः ।

6. Though unborn, of an imperishable essence, and the ruler of all creatures, I, remaining established in my own [perfect] nature, am born through my *Máyá* (*i. e.* power of producing illusions).

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥७॥

७। हे 'भारत, यदा यदा हि धर्म्मस्य' 'ग्लानिः' हानिः 'भवति' [तथा] 'अधर्म्मस्य' 'अभ्युत्थानम्' आधिक्यं [च भवति], 'तदा अहम् आत्मानम्' 'सृजामि' देशे काले च "प्रकटयामि" (उपाध्यायः) ।

7. O descendant of Bhárata, whenever there is a decay of righteousness and an ascendancy of unrighteousness, I put myself forth (*i. e.* manifest myself in time and space).

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥८॥

८। 'साधूनां' 'परित्राणाय' रक्षणाय 'दुष्कृतां' पापकारिणां 'च विनाशाय,' [तथा] 'धर्म्मसंस्थापनाय' धर्म्मस्य दृढीकरणाय 'युगे युगे' प्रतियुगम्, 'सम्भवामि' "प्रकटः भवामि" (उपाध्यायः) ।

8. For the protection of the virtuous, the destruction of the vicious, and the establishment of righteousness, I am born (*i. e.* I manifest myself) in every age.

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥९॥

९। हे 'अर्ज्जुन,' 'यः मे' 'दिव्यम्' अप्राकृतम् 'जन्म कर्म्म च एवं' 'तत्त्वतः'

यथावत् 'वेत्ति,' 'सः देहं त्यक्त्वा पुनः जन्म न' 'एति' प्राप्नोति, 'माम्' [एव] 'एति' आगच्छति ।

9. O Arjuna, he who thus rightly understands my supernatural birth and activity, is not born again after giving up his body, but comes to me (*i. e.* attains union with me.)

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥१०॥

१० । 'वीतरागभयक्रोधाः' रागभयक्रोध वर्ज्जिताः 'मन्मयाः' मदेकचित्ताः 'मामुपाश्रिताः' मां शरणं गताः' 'ज्ञानतपसा' ज्ञानसाधनेन 'पूताः' शुद्धीभूताः 'बहवः' [साधकाः] 'मद्भावम्' मद्रूपत्वम्, मोक्षम् 'आगताः' प्राप्ताः ।

10. Freed from attachment, fear and anger, with hearts wholly given to me, taking refuge in me and purified by the pursuit of wisdom, many [aspirants] have attained my nature.

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥११॥

११ । हे पार्थ,' 'ये' 'यथा' येन प्रकारेण, सकामतया निष्कामतया वा, 'मां' 'प्रपद्यन्ते' भजन्ति' 'तान् अहं' 'तथा' तदपेक्षितफलदानेन 'भजामि' अनुगृह्णामि । 'मनुष्याः' 'सर्व्वशः' सर्व्वप्रकारैः 'मम' 'वर्त्म' भजनमार्गम् 'अनुवर्त्तन्ते' अनुसरन्ति ।

11. O son of Prithá, I favour men according to the way in which they worship me. Men follow my way in all forms.

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥१२॥

१२। 'कर्मणां सिद्धि' कर्मफलं 'काङ्क्षन्तः' अभिलषन्तः [जनाः] 'इह' [लोके] 'देवताः' 'यजन्ते' भजन्ति। 'हि' यस्मात् 'मानुषे लोके' 'कर्मजा सिद्धिः' कर्मजं फलं 'शीघ्रम् भवति' [न तु ज्ञानफलं, ज्ञानस्य दुष्प्राप्यत्वात्]।

12. Those who wish for the fruits of action here, worship the *devas*, for in the world of men actions soon bear fruits.

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥१३॥

१३। कर्मवैचित्र्यप्रदर्शनार्थं चातुर्वर्ण्यं कथयति। 'गुणकर्मविभागशः' सत्त्वरजस्तमः इति गुणविभागः, यजन-राजरक्षा-वाणिज्य-सेवादि-कर्मविभागः 'मया' 'चातुर्वर्ण्यं' चत्वारः वर्णाः एव, इति स्वार्थे ष्यञ् प्रत्ययः, 'सृष्टम्'। 'तस्य' चातुर्वर्ण्यस्य 'कर्त्तारम्' स्रष्टारम् 'अपि माम्' [परमार्थतः] 'अव्ययम् अकर्त्तारम्' [च एव] 'विद्धि'।

13. The fourfold order of castes has been created by me according to the division of qualities and duties. Though its Creator, know me to be [really] unchangeable and a non-agent.

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥१४॥

१४। 'कर्म्माणि मां न' 'लिम्पन्ति' आसक्तं कुर्व्वन्ति, 'न मे कर्म्मफले स्पृहा' [अस्ति]। 'यः माम्' 'इति' एवं, अनासक्तं, निस्पृहम् 'अभिजानाति, सः कर्म्मभिः न बध्यते'।

14. Actions do not make me attached [to them], nor have I any desire for the fruits of actions. He who knows me as such is not bound by actions.

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः।
कुरु कर्मैव तस्मात् त्वं पूर्वैः पूर्वतरं कृतम् ॥१५॥

१५। 'एवं ज्ञात्वा' आसक्तिराहित्येन कृतं कर्म्म बन्धकं न भवति इति मत्वा 'पूर्व्वैः' जनकादिभिः 'मुमुक्षुभिः' मोक्षार्थिभिः 'अपि कर्म्म कृतम्'। 'तस्मात् त्वम् पूर्व्वैः पूर्व्वतरं कृतं कर्म्म एव कुरु'।

15. Knowing this, even those ancients who desired liberation, did actions. Therefore do thou the actions done of yore by the ancients.

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥१६॥

१६। 'किं [परमार्थतः] कर्म्म किं [वा] अकर्म्म' 'अत्र' अस्मिन् विषये 'कवयः' पण्डिताः 'अपि' 'मोहिताः' अज्ञाः, निर्णयासमर्थाः। 'तत्'

तस्मात् 'ते' तुभ्यं 'कर्म्म' कर्म्माकर्म्मतत्त्वं 'प्रवक्ष्यामि यत् ज्ञात्वा अशुभात्' 'मोक्ष्यसे' मुक्तः भविष्यसि ।

16. What [really] is action and what is inaction,—in this matter even learned men are deluded. So I will explain to you [the philosophy of] action, by knowing which you will be free from evil.

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥१७॥

१७। 'कर्म्मणः' शास्त्रविहितस्य 'हि अपि,' 'विकर्म्मणः' शास्त्रप्रतिषिद्धस्य व्यापारस्य 'च [तत्त्वम्] बोद्धव्यम्,' 'अकर्म्मणः' तुष्णीम्भावस्य 'च [तत्त्वम्] बोद्धव्यम्' [यतः] 'कर्म्मणः' [विकर्म्मणः, अकर्म्मणः च] 'गतिः' तत्त्वम् 'गहना' दुर्ज्ञेया ।

17. [The philosophy] of action [prescribed by scripture], of prohibited action, and of inaction is to be understood, [as] the real nature of action [and of the other two] is very difficult to ascertain.

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥१८॥

१८। 'यः' 'कर्म्मणि' ईश्वरार्पिते निष्कामकर्म्मणि 'अकर्म्म' कर्म्माभावं, तादृशकर्म्मणः बन्धकत्वाभावात्, 'पश्येत्,' 'अकर्म्मणि' दुःखबुद्ध्या विहित-कर्म्म-अकरणे च 'यः कर्म्म [पश्येत्], तादृश-अकरणस्य प्रत्यवायोत्-पादकत्वेन बन्ध-हेतुत्वात् च, 'सः मनुष्येषु बुद्धिमान्,' 'युक्तः' योगी 'कृत्स्नकर्म्मकृत्' वस्तुतः सर्व्वकर्म्मकर्त्ता ।

18. He who sees non-activity in action, and activity in inaction, is wise among men, united [to God], and the [real] agent of all actions.

यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥१८॥

१८। 'यस्य सर्व्वे' 'समारम्भाः' कर्म्माणि 'काम-सङ्कल्प-वर्ज्जिताः' तृष्णा-हङ्कार-रहिताः, 'ज्ञानाग्निदग्धकर्म्माणं' ज्ञानाग्निना दग्धानि अकर्म्मतां नीतानि कर्म्माणि यस्य, 'तम्' 'बुधाः' ज्ञानिनः [परमार्थतः] 'पण्डितम् आहुः' ।

19. He whose actions are all freed from desire and egotism, whose actions are [as it were] burnt by the fire of wisdom,—him the wise call a [real] sage.

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः ॥२०॥

२०। 'सः' 'कर्म्मफलासङ्गं' कर्म्मणि तत् फले च आसक्तिं 'त्यक्त्वा' 'नित्यतृप्तः' आत्मानन्देन सदा सन्तुष्टः 'निराश्रयः' योगक्षेम-निरपेक्षः [सन्] 'कर्म्मणि अभिप्रवृत्तः अपि' [परमार्थतः] 'किञ्चित् एव न करोति' ।

20. Having given up attachment to action and its fruit, and being always satisfied [with the self] and not dependent [on anything], he, though engaged in action, [really] does nothing.

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥२१॥

२१। 'निराशी:' निर्गता: आशिष: कामना: यस्मात्, गततृष्ण: 'यत-चित्तात्मा' यतं नियतं चित्तम् आत्मा शरीरं च यस्य 'त्यक्तसर्व्व-परिग्रह:' त्यक्ता: सर्व्वे परिग्रहा: भोगोपकरणानि येन, 'शारीरं' शरीरस्थितिमात्रप्रयोजनं, 'केवलं' कर्त्तृत्वाभिमानवर्ज्जितं 'कर्म्म कुर्व्वन् अपि' 'किल्बिषं' पापं 'न आप्नोति'।

21. One who is freed from desire, whose mind and body are under his control, and who has given up [his attachment to] all objects of enjoyment, does not incur sin even if he does without egotism actions necessary for the maintenance of his body.

यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सर: ।
सम: सिद्धावसिद्धौ च कृत्वाऽपि न निबध्यते ॥२२॥

२२। 'यदृच्छालाभसन्तुष्ट:' अप्रार्थित: अयत्नत: लाभ: यदृच्छालाभ:, तेन सन्तुष्ट:, 'द्वन्द्वातीत:' शीतोष्णादि-सहनशील:, 'विमत्सर:' निर्व्वैरबुद्धि:, 'सिद्धौ असिद्धौ च' 'सम:' हर्षविषादरहित: [जन: कर्म्म] 'कृत्वा अपि' 'न निबध्यते' बन्धं न प्राप्नोति।

22, One who is satisfied with what comes unsought, who is not subject to the pairs of opposites [like heat and cold, pleasure and pain &c.] who is free from hostile feelings, and unaffected by success and failure, is not fettered [by the fruits of action] even though he acts.

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतस: ।
यज्ञायाचरत: कर्म समग्रं प्रविलीयते ॥२३॥

२३। 'गतसङ्गस्य' निष्कामस्य, 'मुक्तस्य' अभिमानादिरहितस्य, "ज्ञानावस्थितचेतसः' ज्ञाने अवस्थितं चेतः चित्तं यस्य तस्य, 'यज्ञायाचरतः' यज्ञाय पूजार्थम् आचरतः कुर्व्वतः [जनस्य] 'कर्म्म' 'समग्रं' अग्रेण सह, सवासनं, निःशेषं 'प्रविलीयते' विनश्यति, अकर्म्मभावम् आपद्यते।

23. The action of him who is without desire, who is free [from egotism &c.] whose heart is established in wisdom, and who acts from a spirit of worship, entirely melts away (*i. e.* loses the binding power of selfish actions.)

ब्रह्मार्पणं ब्रह्म हवि र्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥२४॥

२४। 'ब्रह्मार्पणम्' अर्प्यते हविरादि अनेन इति अर्पणं जुह्वादि, तत् ब्रह्म एव, 'ब्रह्म हविः' अर्प्यमाणं हविः घृतादिकं, तत् अपि ब्रह्म, 'ब्रह्माग्नौ' अग्निः अपि ब्रह्म, तस्मिन् 'ब्रह्मणा' ब्रह्मरूप कर्त्रा 'हुतं' होमः क्रियते,—[एवं] 'ब्रह्मकर्म्मसमाधिना' ब्रह्मरूप-कर्म्मणि समाधिः चित्तैकाग्र्यं यस्य 'तेन' यज्ञसाधकेन 'ब्रह्मैव गन्तव्यम्' ब्रह्म एव प्राप्तव्यम्, न तु स्वर्गादि अश्रेष्ठं फलान्तरम् इत्यर्थः।

24. 'The ladle with which clarified butter is poured is Branman, the butter [to be poured] is Brahman, into Brahman as fire the sacrifice is offered by Brahman [as the sacrificer]'—he who [by means of such monistic conceptions] fixes his mind on Brahman as action, 'verily attains [union with] Brahman.

दैवमेवापरे यज्ञं योगिनः पर्युपासते।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥२५॥

२५। 'अपरे' केचित् 'योगिनः' कर्मयोगिणः 'दैवम्' इन्द्रादिषु देवेषु अर्पितं 'यज्ञम्' 'परि-उपासते' श्रद्धया अनुतिष्ठन्ति। 'अपरे' अन्ये, ज्ञान-योगिनः, 'ब्रह्माग्नौ' ब्रह्मरूपे अग्नौ 'यज्ञेन एव' [उपायेन] 'यज्ञम्' 'उपजुह्वति' प्रतिक्षिपन्ति, "यज्ञादि सर्व्वकर्म्माणि प्रविलापयन्ति" इति श्रीधरः।

25. Some devotees offer sacrifice to the gods. Others, by means of sacrifice itself, offer up sacrifice into the fire of Brahman, [in the way indicated in the last verse.]

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति।
शब्दादीन् विषयानन्य इन्द्रियाग्निषु जुह्वति ॥२६॥

२६। 'अन्ये' नैष्ठिकाः ब्रह्मचारिणः 'श्रोत्रादीनि इन्द्रियाणि' 'संयमाग्निषु जुह्वति' इन्द्रियसंयमं कुर्व्वन्ति इत्यर्थः। 'अन्ये' गृहस्थाः 'शब्दादीन् विषयान् इन्द्रियाग्निषु जुह्वति' "श्रोत्रादिभिः अविरुद्ध-विषयग्रहणं होमं मन्यन्ते" इति शङ्करः।

26. Some offer up hearing and the other senses into the fire of restraint. Others offer up sound and other objects into the fire of the senses (*i. e.*, regard the enjoyment of unprohibited objects as sacrifice.)

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥२७॥

२७। 'अपरे' ध्याननिष्ठाः 'ज्ञानदीपिते' ज्ञानेन प्रज्वलिते 'आत्मसंयमयोगाग्नौ' आत्मनि मनसः संयमः एव योगः, स एव अग्निः, तस्मिन् 'सर्व्वाणि इन्द्रियकर्म्माणि प्राणकर्म्माणि च जुह्वति',—[आत्मसंयतेन] "मनसा इन्द्रियाणां प्राणानाञ्च विरुद्धगति-निवारणाय प्रयतन्ते" इति उपाध्यायः। 'इन्द्रियकर्म्माणि' ज्ञानेन्द्रियाणां श्रोत्रादीनां श्रवणदर्शनादीनि, कर्म्मेन्द्रियाणां वाक्पाण्यादीणां वचनग्रहणादीनि, 'प्राणकर्म्माणि' प्राणापानादीनां श्वासप्रश्वासादीनि।

27. Others offer up into the fire of self-restraint, lighted by wisdom, all the functions of the senses and those of the vital airs.

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥२८॥

२८। 'तथा अपरे' 'संशितव्रताः' तीक्ष्णव्रतधारिणः 'यतयः' प्रयत्नशीलाः साधकाः 'द्रव्ययज्ञाः' द्रव्यदानम् एव यज्ञः येषां ते, 'तपोयज्ञाः' कृच्छ्रचान्द्रायणादि तपः एव यज्ञः येषां ते, 'योगयज्ञाः' योगः चित्तवृत्तिनिरोधरूपः समाधिः एव यज्ञः येषां ते, 'स्वाध्याय-ज्ञानयज्ञाः च' स्वाध्याययज्ञाः ज्ञानयज्ञाः च—स्वाध्यायः वेदपाठः एव यज्ञः येषां ते स्वाध्याययज्ञाः, वस्तुतत्त्वोपलब्धिः एव यज्ञः येषां ते ज्ञानयज्ञाः—['भवन्ति' इति ऊह्येन क्रियापदेन सर्व्वेषां कर्त्तृपदानाम् अन्वयः]।

28. And some earnest aspirants of rigid vows become sacrificers of things, some perform sacrifice in the form of practising austerities, some in that of *yoga*, (*i. e.* restraining the actions of their mind and concen-

trating it in the self), some in the form of studying the Vedas and some in that of acquiring knowledge.

अपाने जुह्वति प्राणं प्राणेऽपानं तथाऽपरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ।
अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति ॥२९॥

२९ । 'अपरे प्राणायामपरायणाः' 'अपाने' अधोवायौ 'प्राणम्' उर्द्ध्ववायुं 'जुह्वति' क्षिपन्ति, वाह्यतः श्वासम् आनीय अन्तर्धारयन्ति ; पूरकम् एतत् । 'तथा प्राणे अपानं जुह्वति' ; रेचकम् एतत् । [तथा] 'प्राणापानगती' श्वास-प्रश्वासक्रिये 'रुद्ध्वा' निरुध्य [कुम्भकं कुर्व्वन्ति] । 'अपरे' 'नियताहाराः' नियतः परिमितः आहारः येषाम्, आहारसङ्कोचमभ्यस्यन्तः, 'प्राणान्' ज्ञानेन्द्रिय-कर्म्मेन्द्रियरूपान् 'प्राणेषु' [परिक्षीण-विरुद्धगतिषु] 'जुह्वति' । "तत्तदिन्द्रियवृत्तिलयं विरुद्धभाव-परिहारपूर्व्वकम् आत्मनि एकभावापन्नतारूपं होमं भावयन्तीत्यर्थः" इति उपाध्यायः । "श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः" इति पातञ्जल-सूत्रम् २।४९ । "श्वासप्रश्वाससद्द्योगिन्यात्मचिन्ता परमात्म-चिन्ता वा तयोर्यमिह स्वभावती गतिच्छेदं साधयति, स एव प्राणायामः" इति उपाध्यायः । 'प्राणायामः' प्राणवायूनां संयमः इति भावार्थः ।

29. Others, those who are devoted to the restraint of the vital airs, offer up the out-going breath into the in-going (*i. e.* draw in air and prevent its going out) and the in-going into the out-going, [thus practising the processes called *pùraka* and *rechaka* respectively] and (the reverse process) restraining the flow of them both [practise the process of *kumbhaka.*] Others, regulating (*i. e.* curtailing) their diet, offer up their

senses into the vital airs (*i. e.* check the unlawful course of the senses by means of the vital airs weakened by curtailed diet.)

सर्वेऽप्येते यज्ञविदो यज्ञक्षयितकल्मषाः ।
यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ॥३०॥
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥३१॥

३०,३१ । 'एते सर्वे अपि यज्ञविदः' 'यज्ञक्षयित-कल्मषाः' यज्ञैः नाशित पापाः 'यज्ञशिष्टामृतभुजः', यज्ञावशिष्टम् अमृततुल्यम् अन्नम् भुञ्जते ये ते 'सनातनम्' नित्यं 'ब्रह्म' 'यान्ति' प्राप्नुवन्ति । हे 'कुरुसत्तम' कुरूणां साधुतम, 'अयं' सर्वप्राणिसाधारणः 'लोकः' [अपि] 'अयज्ञस्य' यज्ञविहीनस्य 'न अस्ति' तेन न प्राप्यते, 'कुतः' केन प्रकारेण 'अन्यः' विशिष्टसाधनसाध्यः परलोकः [तेन प्राप्यते ?]

30,31. All these, who know [the real nature of] sacrifice, and whose sins are wiped out by sacrifice, partake of the nectar (*i. e.* food comparable to nectar) left after the sacrifice, and attain [union with] the eternal Brahman. O chief among the pious Kurus, [even] this world is not for him who does not perform sacrifice, how can the other world [be obtained by him ?]

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान् विद्धि तान् सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥३२॥

३२। 'एवं बहुविधाः यज्ञाः' 'ब्रह्मणः' वेदस्य 'मुखे' द्वारे 'वितताः' विस्तीर्णाः [सन्ति], वेदद्वारेण उच्यन्ते इत्यर्थः। 'तान् सर्व्वान्' 'कर्म्मजान्' कायिक-वाचिक मानस कर्म्मोद्भवान्, अतः कर्म्मातीतस्य आत्मनः संस्पर्शरहितान् 'विद्धि'; 'एवं ज्ञात्वा' [संसारबन्धनात्] 'विमोक्ष्यसे' मुक्तः भविष्यसि।

32. Sacrifice of many such varieties are taught in the Vedas. Know them all to be born of action [and so unrelated to the self, which is above action.] By knowing this you will be freed from the bonds of the world.]

श्रेयान् द्रव्यमयाद् यज्ञाज् ज्ञानयज्ञः परन्तप।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥३३॥

३३। हे 'परन्तप', 'द्रव्यमयात्' द्रव्यसाधनसाध्यात् 'यज्ञात् ज्ञानयज्ञः श्रेयान्'। हे 'पार्थ', 'सर्व्वम्' 'अखिलं' निरवशेषं 'कर्म्म ज्ञाने' 'परिसमाप्यते' पर्य्यवस्यति, पूर्णं भवति।

33. O harasser of foes, sacrifice consisting in [the acquisition of] wisdom is higher than sacrifice consisting in the offering of things. O son of Prithá, all actions, without exception, ends (*i. e.* is fulfilled) in wisdom.

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥३४॥

३४। 'प्रणिपातेन परिप्रश्नेन सेवया' [च] 'तत्' ज्ञानम् 'विद्धि' प्राप्नुहि। 'तत्त्वदर्शिनः ज्ञानिनः' 'ते' तुभ्यं 'ज्ञानम् उपदेक्ष्यन्ति'।

34. Acquire it by obeisance, inquiry and service [to the wise.] Wisemen who have seen the ultimate truth will impart wisdom to you.

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषाणि द्रक्ष्यस्यात्मन्यथो मयि ॥३५॥

३५। 'यत् ज्ञात्वा न पुनः एवं मोहं यास्यसि, [हे] पाण्डव'। 'येन [ज्ञानेन] अशेषाणि भूतानि' [आदौ] 'आत्मनि' प्रत्यगात्मनि, जीवात्मनि, द्रक्ष्यसि 'अथो' अनन्तरम् 'मयि' परमात्मनि [द्रक्ष्यसि]।

35. On acquiring which, O son of Pándu, you will no more be subject to such delusion, and by means of which you will [first] see all things in the [individual] self and then in me [the universal Self.]

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥३६॥

३६। 'चेत्' यदि [त्वं] 'सर्व्वेभ्यः पापेभ्यः पापकृत्तमः अपि असि' [तथापि] 'ज्ञानप्लवेन' ज्ञानरूपपोतेन 'एव सर्व्वं' 'वृजिनं' पापं, पापरूप-अर्णवं 'सन्तरिष्यसि' सम्यक् तरिष्यसि।

36. If you are even the greatest of all sinners, you will surely cross [the ocean of] all sins through the boat of wisdom.

यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा ॥३७॥

३७। हे 'अर्ज्जुन,' 'यथा' 'समिद्धः' प्रदीप्तः 'अग्निः' 'एधांसि' काष्ठानि 'भस्मसात् कुरुते, तथा ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुते', तेषां बन्धकत्वं विनाशयति इत्यर्थः ।

37. O Arjuna, as a blazing fire reduces pieces of wood to ashes, so the fire of wisdom reduces all actions to ashes (*i. e.* destroys their binding power.)

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥३८॥

३८। 'ज्ञानेन सदृशं पवित्रम [किञ्चित् अपि] न हि इह विद्यते'। योग-संसिद्धः' कर्म्मयोगेन योग्यतां प्राप्तः [जनः] 'कालेन' यथासमयं स्वयम् [एव] 'तत्' ज्ञानम 'आत्मनि' [अन्तःकरणे] 'विन्दति' लभते ।

38. There is nothing here so holy as wisdom. One who attains success in *yoga* (*i. e.* practice of disinterested actions) himself finds it [revealed] in his mind in due time.

श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥३९॥

३९। 'श्रद्धावान्' 'तत्परः' एकनिष्ठः 'संयतेन्द्रियः [जनः] ज्ञानं लभते'। 'ज्ञानं लब्ध्वा' [सः] 'अचिरेण' क्षिप्रं 'परां शान्तिम्' 'अधिगच्छति' प्राप्नोति ।

39. One who is reverent and steady, and has his senses under his control, acquires wisdom. Having acquired wisdom he soon obtains the supreme peace.

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥४०॥

४० । 'अज्ञः च' 'अश्रद्दधानः' श्रद्धाविहीनः 'च' 'संशयात्मा' संशयाक्रान्तचित्तः [च] 'विनश्यति' स्वार्थात् भ्रश्यति । 'संशयात्मनः' 'अयं लोकः' धनजनादिः 'न अस्ति,' 'परः' 'परलोकः 'न', 'सुखं' [च] न [अस्ति] ।

40. The ignorant, the irreverent and the sceptical are ruined. For the sceptic there is neither this world, nor the next, uor happiness.

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ॥४१॥

४१ । हे 'धनञ्जय,' 'योगसंन्यस्तकर्माणं' योगेन कर्मयोगेन संन्यस्तानि परमेश्वरे समर्पितानि कर्माणि यस्य तम्, 'ज्ञानसंछिन्नसंशयं' ज्ञानेन संछिन्नः दूरीभूतः संशयः यस्य तम् 'आत्मवन्तम्' अप्रमत्तं 'कर्माणि न निबध्नन्ति' ।

41. O Dhanañjaya, actions do not bind him who surrenders his deed to God by *yoga* (*i. e.* does them as his servant), whose doubts are removed by knowledge, and who is self-possessed.

तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनाऽऽत्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥४२॥

४२। 'तस्मात्' [हे] भारत,' 'ज्ञानासिना' ज्ञानरूपेण खड्गेन 'एनम्' एनत् 'अज्ञान-सम्भूतम् हृत्स्थम् संशयं छित्त्वा योगम्' 'आतिष्ठ' आश्रय, [तथा] युद्धाय 'उत्तिष्ठ' ।

42. Therefore, O descendant of Bharata, cutting off with the sword of wisdom this doubt in your mind, born of ignorance, embrace [the ideal of] *yoga* and get up [to fight.]

संन्यासयोगो नाम पञ्चमोऽध्यायः

अर्जुन उवाच

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥१॥

१। [अर्जुनः उवाच,—] हे 'कृष्ण,' [त्वम् एकदा] 'कर्मणां' 'संन्यासं' त्यागं 'पुनः' 'योगं' कर्मयोगं 'च' 'शंससि' कथयसि । 'एतयोः' [मध्ये] 'यत् एकं श्रेयः तत् मे सुनिश्चितं ब्रूहि' ।

1. [Arjuna said,—] O Krishna, you [sometimes] speak of the renunciation of action, and then again of *yoga* [through action]. Tell me for sure the one which is the better [path] of these two.

श्रीभगवान् उवाच

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ॥२॥

२। [भगवान् उवाच,—] 'संन्यासः' कर्मणां परित्यागः 'कर्मयोगः' ईश्वरे फलार्पणं कृत्वा कर्मानुष्ठानम् 'च उभौ' 'निःश्रेयसकरौ' मोक्षप्रदौ ।

'तु' परन्तु 'तयोः [मध्ये] कर्मसंन्यासात् कर्मयोगः [एव]' 'विशिष्यते' श्रेष्ठः भवति ।

2. [The Lord said,—] Renunciation and *karma-yoga* (*i. e.* doing actions in a spirit of service to God) are both means of liberation. But of the two *karma-yoga* is the better [path].

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात् प्रमुच्यते ॥३॥

३ । हे 'महाबाहो, 'यः [कर्मफलं] न द्वेष्टि, न [च] काङ्क्षति' 'सः' 'नित्यसंन्यासी' नित्यं कर्मानुष्ठानकाले अपि संन्यासी इति एव 'ज्ञेयः' । 'हि' यतः 'निर्द्वन्द्वः' रागद्वेषादिद्वन्द्वशून्यः [जनः] 'सुखम्' अनायासेन 'बन्धात् प्रमुच्यते' ।

3. O mighty-armed hero, he who neither hates nor desires [the fruits of action] must be regarded as ever a *sannyásin* (one who has renounced action). For, one who is free from the pairs of opposites [like desire and hatred, pleasure and pain] is easily liberated from bondage.

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥४॥

४ । 'बालाः' अज्ञाः [एव] 'सांख्ययोगौ' सांख्यं ज्ञानं, योगः कर्म-

योगः तौ 'पृथक् प्रवदन्ति, न [तु] पण्डिताः' [एवं वदन्ति]। तत्र हेतुः,— [अनयोः] 'एकम् अपि' 'आस्थितः' सम्यक् आश्रितवान् 'उभयोः फलम्' मोक्षम् इत्यर्थः, 'विन्दते' प्राप्नोति।

4. [Only] the ignorant, not the wise, say that Sánkhya (*i. e.* the pursuit of wisdom) and Yoga (*i. e.* disinterested action) are different [paths]. [Really] he who fully adopts the one, obtains the fruit (*i. e.* liberation) of both.

यत् सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥५॥

५। 'सांख्यैः' ज्ञाननिष्ठैः संन्यासिभिः 'यत् स्थानम्' यत् पदम्, मोक्षम् इत्यर्थः 'प्राप्यते, तत्' 'योगैः' कर्म्मयोगिभिः 'अपि' 'गम्यते' प्राप्यते। 'यः सांख्यं च योगं च [एकफलत्वेन] एकं पश्यति, सः [एव सम्यक्] पश्यति'।

5. The place (*i. e.* condition) which is attained by the Sánkhyas is attained also by the Yogins. He [alone] sees [rightly] who looks upon the Sánkhya and the Yoga as one.

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥६॥

६। हे 'महाबाहो', 'अयोगतः' कर्म्मयोगं विना 'संन्यासः तु' 'दुःखम् आप्तुम्' दुःखेन प्राप्यः इत्यर्थः, "दुःखहेतुरशक्यः" इति श्रीधरः। 'योगयुक्तः मुनिः' 'न चिरेण' अचिरेण 'ब्रह्म' 'अधिगच्छति' प्राप्नोति।

6. O mighty-armed hero, it is difficult to attain renunciation without [*karma-*] *yoga*. A sage who has adopted *yoga* attains Brahman without delay.

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥७॥

७। 'योगयुक्तः' 'विशुद्धात्मा' निर्म्मलान्तःकरणः 'विजितात्मा' स्ववशीकृत-देहः 'जितेन्द्रियः' 'सर्व्वभूतात्मभूतात्मा' "सर्व्वेषां भूतानाम् आत्मभूतः आत्माकारतां प्राप्तः आत्मा यस्य स सर्व्वभूतात्मभूतात्मा, प्रेम्णा ज्ञानेन च एकतां प्राप्तः" इति उपाध्यायः [साधकः कर्म्म] 'कुर्व्वन् अपि' 'न लिप्यते' कर्म्मभिः न बध्यते ।

7. He who is established in *yoga*, who is pure-hearted, with his body and senses under his control, and who feels unity with the self of all creatures, is not bound even if he does actions.

नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन् ॥८॥
प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्त्तन्त इति धारयन् ॥९॥

८।९। 'युक्तः' समाहितचित्तः 'तत्त्ववित्' परमार्थदर्शी 'पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् प्रलपन्' 'विसृजन्' मलत्यागं कुर्व्वन् 'गृह्णन्' 'उन्मिषन्' नेत्रोन्मीलनं कुर्व्वन् 'निमिषन्' नेत्रनिमीलनं कुर्व्वन् 'अपि'

एतेषु व्यापारेषु 'इन्द्रियाणि' 'इन्द्रियार्थेषु' इन्द्रियविषयेषु 'वर्त्तन्ते' प्रवर्त्तन्ते, क्रियन्ते 'इति' धारयन्' निश्चिन्वन् [अहं] 'किञ्चित् एव न करोमि' इति 'मन्येत' मन्यते ।

8-9. Though seeing, hearing, touching, smelling, eating, speaking, going, sleeping, breathing, passing stools, holding, opening and closing the eyes, the seer, established in *yoga*, knowing that [in all these matters] the senses [and organs] act on objects of sense, thinks,—"I do nothing at all."

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥१०॥

१० । 'यः ब्रह्मणि कर्म्माणि' 'आधाय' समर्थ्य [कर्म्मफले] सङ्गं त्यक्त्वा [कर्म्माणि] करोति, सः पापेन' 'न लिप्यते' न संबध्यते, 'अम्भसा पद्मपत्रम् इव' यथा पद्मपत्रम् अम्भसि स्थितम् अपि तेन अम्भसा न लिप्यते तद्वत् ।

10. He who does actions, offering them to Brahman and giving up attachment [to their fruits] is not touched by sin, as a lotus leaf is not affected by the water [which stands upon it].

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये ॥११॥

११ । 'योगिनः' 'सङ्गं' कर्म्मफलासक्तिं 'त्यक्त्वा' 'आत्मशुद्धये' चित्तशुद्ध्यर्थं

'कायेन मनसा बुद्ध्या' 'केवलैः' ममताशून्यैः 'इन्द्रियैः' 'अपि' च 'कर्म्म कुर्व्वन्ति'।

11. *Yogins* do their actions with their body, sensorium, understanding and senses devoid of egotism, giving up attachment [to the fruits of action] and for the purpose of purifying the heart.

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥१२॥

१२। 'युक्तः कर्म्मफलं त्यक्त्वा' 'नैष्ठिकीं' शाश्वतीं, निष्ठायां भवाम् इति शङ्करः, 'शान्तिम् आप्नोति'। [पक्षान्तरे] 'अयुक्तः' 'कामकारेण' कामतः कर्म्मकरणेन 'फले सक्तः' [सन्] 'निबध्यते' नितरां बन्धं प्राप्नोति।

12. The *yogin*, giving up the fruits of action, attains everlasting peace, [while] one without *yoga*, doing actions from desire [and thus] becoming attached to their fruits, is tightly bound.

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी।
नवद्वारे पुरे देही नैव कुर्वन् न कारयन् ॥१३॥

१३। 'वशी' जितचित्तः 'देही' देहवान् जनः 'मनसा सर्व्वकर्म्माणि' 'संन्यस्य' त्यक्त्वा, ईश्वराय समर्प्य, [अतः परमार्थतः] 'न एव [कर्म्म] कुर्व्वन् न कारयन्' 'नवद्वारे' नेत्रादि नवेन्द्रिययुक्ते 'पुरे' पुरवद् देहे 'सुखम्' सुखेन 'आस्ते' तिष्ठति। 'नवद्वारे'—"नेत्रे-नासिके कर्णौ मुखञ्चेति सप्त शिरो गतानि-अधोगते द्वे पायूपस्थरूपे इत्येवं नवद्वाराणि यस्मिन् पुरे" इति श्रीधरः।

13. The self-controlled embodied person renouncing all actions with his mind [*i. e* offering them to God and thus really] doing nothing and causing others to do nothing, rests happy in the city with nine gates (*i. e.* the body with the two eyes, two ears, two nostrils, the mouth and the organs of excretion and generation).

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥१४॥

१४। 'प्रभुः' ईश्वरः 'लोकस्य कर्तृत्वं कर्म्माणि' [तथा च] 'कर्म्मफलसंयोगं' कर्म्मणा सह तत्फलस्य संयोगं 'न सृजति'। 'तु' परन्तु 'स्वभावः' "अविद्यालक्षणा प्रकृतिः माया" इति शङ्करः, "जीवस्य स्वभावः अविद्याः" इति श्रीधरः, 'प्रवर्त्तते' कर्तृत्वादिकं सृजति। सांख्यमतमेतत्, सांख्यप्रभावितो मायावादश्च। भूमिकायां विचारो द्रष्टव्यः।

14. The Lord does not create either man's activity or actions or the connection of action with its fruit. It is Nature that acts [in this matter].

नादत्ते कस्यचित् पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥१५॥

१५। 'विभुः' सर्व्वव्यापी परमेश्वरः 'कस्यचित् पापं' 'सुकृतं' पुण्यं 'च एव' 'न आदत्ते' न गृह्णाति, यतः तत् प्रकृत्या एव क्रियते, न तु पुरुषेण। 'अज्ञानेन' प्रकृतिपुरुषाविवेकेन 'ज्ञानम् आवृतं तेन' [हेतुना] 'जन्तवः' 'मुह्यन्ति' कुर्म्मः कारयामः इति एवं मोहं गच्छन्ति।

15. The Lord (lit. the all-pervading One) does not take into account either the evil deeds or good deeds of any one. Wisdom is enveloped by ignorance ; hence creatures are deluded [into regarding themselves as agents].

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत् परम् ॥१६॥

१६ । 'तु' पक्षान्तरे 'आत्मनः ज्ञानेन येषां तत् अज्ञानं नाशितं तेषाम् आदित्यवत् [उज्ज्वलं] ज्ञानं तत्' 'परम्' परमात्मानम् 'प्रकाशयति' ।

16. On the other hand, the sunlike [bright] wisdom of those whose ignorance of the self has been dispelled by knowledge, reveals [to them] the Supreme [Spirit].

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥१७॥

१७ । 'तद्बुद्धयः' तस्मिन् परमात्मनि एव निश्चयात्मिका बुद्धिः येषां, 'तदात्मानः' तस्मिन् एव आत्मा चित्तं येषां, 'तन्निष्ठाः' तस्मिन् एव निष्ठा अभिनिवेशः येषां, 'तत्परायणाः' तत् एव परम् अयनम् आश्रयः इति निर्णयः येषां, 'ज्ञाननिर्धूतकल्मषाः' ज्ञानेन निर्धूतं निरस्तं कल्मषं पापं येषां ते 'अपुनरावृत्तिं' 'अपुनर्देहग्रहणं, मोक्षं 'गच्छन्ति' प्राप्नुवन्ति ।

17. Those who have grasped it (*i. e.* the Supreme Spirit) by their reason, whose hearts are attached to it, who are devoted to it, who have realised it as their su-

preme goal, and whose impurity has been wiped away by wisdom, obtain liberation (lit. not coming again to the world).

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥१८॥

१८। 'विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि' 'शुनि' कुक्कुरे 'श्वपाके' श्वनः पचति भक्षयति इति श्वपाकः चण्डालः तस्मिन्, 'च एव पण्डिताः समदर्शिनः' [भवन्ति]। गुणतारतम्येऽपि चैतन्यांशे समदर्शनं सम्भवति, न तु पक्षपातविकारात्मके ।

18. Upon the Bráhmana endowed with learning and modesty, the cow, the elephant, the dog and the dog-eater (*i. e.* the Chandála) wisemen look impartially (*i. e.* in so far as the divine essence is in all of them, not ignoring the degrees of its manifestation).

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्मात् ब्रह्मणि ते स्थिताः ॥१९॥

१९। 'येषां मनः साम्ये स्थितं तैः इह एव' 'सर्गः' संसारभावः 'जितः' निरस्तः। 'हि' यतः 'ब्रह्म निर्दोषं समं [च]', 'तस्मात् ते' 'ब्रह्मणि [एव] स्थिताः' ब्रह्मभावं प्राप्ताः ।

19. The world (*i. e.* worldliness) has been conquered even here by those whose minds are established in impartiality. As Brahman is sinless and impartial, therefore they are established in Brahman (*i. e.* possessed of Brahmic attributes).

न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसम्मूढो ब्रह्मविद् ब्रह्मणि स्थित: ॥२०॥

२० । 'ब्रह्मवित् स्थिरबुद्धि:' 'असंमूढ:' मोहवर्जित: [तथा] 'ब्रह्मणि स्थित:' [सन्] 'प्रियं' प्रीतिकरं विषयं 'प्राप्य' न 'प्रहृष्येत्' अतीवहर्षवान् भवेत्, 'अप्रियम्' अप्रीतिकरं विषयं 'च' प्राप्य न 'उद्विजेत्' अतीव विषण्ण: भवेत् ;

20. The knower of Brahman, with a steady understanding, free from delusion, and established in Brahman, should not be overpleased with pleasant objects and over-displeased with unpleasant objects.

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत् सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥२१॥

२१ । 'बाह्यस्पर्शेषु' बाह्येन्द्रियै: स्पृश्यन्ते इति स्पर्शा:, तेषु, बाह्येन्द्रियविषयेषु 'असक्तात्मा' अनासक्तचित्त: जन:, 'आत्मनि' आत्मोपलब्धौ 'यत् सुखम्' [अनुभूयते, तत्] 'विन्दति' लभते । 'स:' 'ब्रह्मयोगयुक्तात्मा' ब्रह्मयोगेन समाहितचित्त: [सन्] 'अक्षयं सुखम्' 'अश्नुते' भुनक्ति ।

21. He whose heart is unattached to external objects obtains the joy which is to be found in the Self. He, with his mind steadied by communion with Brahman, enjoys everlasting bliss.

ये हि संस्पर्शजा भोगा दु:खयोनय एव ते ।
आद्यन्तवन्त: कौन्तेय न तेषु रमते बुध: ॥२२॥

२२। "हे 'कौन्तेय,' 'ये हि' 'संस्पर्शजाः' विषयेभ्यः जाताः 'भोगाः' सुखानि 'ते' 'दुःखयोनयः' दुःखस्य कारणभूताः 'एव,' [तथा] 'आद्यन्तवन्तः' उत्पत्तिविलयधर्म्माः, अनित्याः। 'तेषु' 'बुधः' विवेकी 'न रमते' न प्रीतिम् अनुभवति।

22. O son of Kuntí, those pleasures which are derived from external objects are really sources of pain and of a transient nature. A wise man is not attracted by them.

शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥२३॥

२३। 'यः इह एव' 'शरीरविमोक्षणात् प्राक्' प्राक्देहपातात्, जीवन् एव, 'कामक्रोधोद्भवं' 'वेगं' अन्तःकरणक्षोभं 'सोढुं' सहितुं, प्रतिरोद्धुं 'शक्नोति', 'सः' 'युक्तः' योगी, 'सः सुखी नरः'।

23. He who can resist even here, before liberation from his body, the impulse proceeding from desire and anger, is a *yogin*, a happy man.

योऽन्तः सुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥२४॥

२४। 'यः' 'अन्तःसुखः' अन्तर् आत्मनि एव सुखं यस्य, 'अन्तरारामः' आत्मनि एव आरामः शान्तिः, आनन्दः यस्य, 'तथा यः' अन्तःज्योतिः' आत्मा एव ज्योतिः ज्ञानप्रकाशः यस्य,—"अन्तर्दृष्ट्या साक्षात् अनुभूतं तत्त्वं येन" इति

उपाध्यायः, 'सः योगी' 'ब्रह्मभूतः' ब्रह्मभावापन्नः, "ब्रह्मणा सह एकत्वम् आपन्नः" इति उपाध्यायः, [सन्] 'ब्रह्मनिर्व्वाणम्' ब्रह्मणि अहंकारविलयं, "ब्रह्मणि निर्व्वाणं लयम्" इति श्रीधरः "ब्रह्मणि निर्वृतिं मोक्षम् इह जीवन् एव" इति शङ्करः, 'अधिगच्छति' प्राप्नोति ।

24. He who finds his happiness, his rest and his light within (*i e.* in the self alone), that *yogin*, becoming Brahman (*i. e.* attaining the character of Brahman), obtains [the] extinction [of his egotism] in Brahman.

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥२५॥

२५ । 'क्षीणकल्मषाः' विगतपापाः 'छिन्नद्वैधाः' संशयमुक्ताः, 'यतात्मानः' संयतचित्ताः, 'सर्व्वभूतहिते रताः' 'ऋषयः' सम्यग्दर्शिनः 'ब्रह्मनिर्व्वाणं लभन्ते' ।

25. Those sages whose sins are wiped away, whose doubts are gone, whose minds are controlled, and who are engaged in doing good to all creatures, obtain [spiritual] extinction [or absorption] in Brahman.

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥२६॥

२६ । 'कामक्रोधवियुक्तानां' 'यतचेतसां' संयतचित्तानां 'विदितात्मनां'

यतात्मनाम्=ज्ञातात्मतत्त्वानां 'यतीनां' साधकानाम् 'अभितः' उभयतः, जीवतां मृतानाञ्च, न देहान्ते एव, 'ब्रह्मनिर्व्वाणं वर्त्तते'।

26. There is absorption in Brahman on both sides [of life, not simply after death] for those aspirants who are freed from desire and anger, whose minds are controlled, and who know the Self.

स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥२७॥
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥२८॥

२७,२८। 'यः मोक्षपरायणः मुनिः बाह्यान्' 'स्पर्शान्' विषयान् 'बहिः' चिन्तावहिर्भूतान् 'कृत्वा', 'चक्षुः' दृष्टिं 'च' 'भ्रुवोः अन्तरे' भ्रूमध्ये [स्थापयित्वा], "अत्यन्तं नेत्रयोर्निमीलने निद्रया मनो लीयते, उन्मीलने च बहिः प्रसरति, तदुभयदोषपरिहारार्थम् अर्द्धनिमीलनेन भ्रूमध्ये दृष्टिं निधाय" इति श्रीधरः, 'नासाभ्यन्तरचारिणौ' उच्छ्वास-निश्वासरूपेण नासिकयोः अभ्यन्तरे चरन्तौ 'प्राणापानौ' [ऊर्द्ध्वाधोगतिरोधेन] 'समौ कृत्वा' कुम्भकं कृत्वा 'यतेन्द्रियमनोबुद्धिः' [अतः] विगतेच्छाभयक्रोधः [संवृत्तः], 'सः सदा मुक्तः एव'।

27,28. The sage whose goal is liberation, and who, having turned out [from his mind the thought of] external objects, fixed his vision between the two eye-brows [in order to avoid both distraction and sleepiness] and equalised [by the process of *kumbhaka*] the

in-going and out-going breaths passing through the nostrils, has controlled his senses, sensorium and understanding and [thus] got rid of desire, fear and anger, is always free.

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥२९॥

२९ । [एवम्भूतः साधकः] 'यज्ञतपसां भोक्तारं' यज्ञानां तपसां च सारग्रहीतारं, 'सर्व्वलोकमहेश्वरं सर्व्वभूतानां' 'सुहृदं' प्रत्युपकार निरपेक्षतया उपकारिणं 'मां ज्ञात्वा शान्तिम्' 'ऋच्छति' प्राप्नोति ।

29. [The aspirant described above] having known me as the recipient of sacrifices and austerities [in their inmost essence], the great ruler of all worlds, and the disinterested friend of all creatures, obtains peace.

अभ्यासयोगो नाम षष्ठोऽध्यायः

——— ⁂ ———

श्रीभगवान् उवाच

अनाश्रितः कर्म्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥१॥

१। 'यः कर्म्मफलम्' 'अनाश्रितः' अनपेक्षमाणः [सन्] 'कार्य्यं' करणीयं 'कर्म्म' करोति, सः [एव] संन्यासी च योगी च, न [तु] 'निरग्निः' अग्नि-साध्यकर्म्मत्यागी, 'न च' 'अक्रियः' अनग्निसाध्यकर्म्मत्यागी [वस्तुतः संन्यासी योगी वा]।

1. He who does what his duty is, without desiring its fruit, is [alone a true] *sannyásin* (a renouncer) and [a true] *yogin*, and not he who gives up fire-sacrifices and actions [not requiring fire].

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।
न ह्यसंन्यस्तसङ्कल्पो योगी भवति कश्चन ॥२॥

२। हे 'पाण्डव, [श्रुतयः] यं संन्यासम् इति प्राहुः तं योगम् एव' 'विद्धि' जानीहि, यत उभयत्र त्यागः एव लक्षणः, तृष्णात्यागस्तु त्यागसारः, योगः च

त्यागात्मकः, 'हि' यतः 'न कश्चित्' 'असंन्यस्तसङ्कल्पः' अत्यक्तफलाभिलाषः 'योगी' 'भवति' भवितुम् अर्हति। "ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्य्यं चरन्ति" इति बृहदारण्यकश्रुतिः (४।४।२२)।

2. O son of Pándu, what [the scriptures] call *sannyása* (*e. g. Brihadáranyaka* IV. 4. 22.), know that to be really *yoga* [as renunciation is the thing intended in both, and the renunciation of desire is the essence of renunciation. *Yoga*, again, consists in giving up desire] for one who has not given up desire cannot be a *yogin*.

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥३॥

३। 'योगम्' ज्ञानयोगम् 'आरुरुक्षोः' आरोढुम् प्राप्तुम् इच्छतः 'कर्म्म' 'कारणम्' साधनम् 'उच्यते'। 'तस्य योगारूढस्य' 'शमः' विक्षेपककर्म्मत्यागः 'एव' 'कारणम्' ज्ञानपरिपाके सहायः 'उच्यते'।

3. For one who aspires to rise to *yoga*, action is said to be a help. For the person who has risen to *yoga*, cessation of [distracting] action is said to be the help.

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते।
सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते ॥४॥

४। 'यदा' [साधकः] 'न इन्द्रियार्थेषु न [च] कर्म्मसु' 'अनुषज्जते'

आसक्तिं करोति 'तदा' [एषः] 'सर्व्वसंकल्पत्यागी' सर्व्वाभिलाषसंन्यासी 'योगारूढ़:' उच्यते ।

4. When [an aspirant] is no more attached to actions and the objects of the senses, then such a renouncer of all desires is said to have risen to *yoga*.

उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥५॥

५। 'आत्मना' विवेकयुक्तेन मनसा 'आत्मानम्' जीवम् 'उद्धरेत्' ऊर्द्धं नयेत्, 'न आत्मानम्' 'अवसादयेत्' अधोनयेत्। 'हि' यतः 'आत्मा एव आत्मनः बन्धुः, आत्मा एव आत्मनः रिपुः' ।

5. One should lift up the self with the self and should not lower it ; for the self alone is the friend of the self and also its enemy.

बन्धुरात्माऽऽत्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्त्तेतात्मैव शत्रुवत् ॥६॥

६। 'येन आत्मना एव आत्मा' 'जितः' वशीकृतः 'तस्य आत्मा आत्मनः बन्धुः'। 'तु' पक्षान्तरे 'अनात्मनः' अजितात्मनः 'आत्मा एव' 'शत्रुवत्' बाह्यशत्रुः इव 'शत्रुत्वे वर्त्तेत' अनिष्टम् आचरेत् ।

6. In the case of him who has brought his self under control, the self is the friend of the self. On the other hand, in the case of one whose self is uncontrolled,

it is the self which does harm like an [external] enemy.

जितात्मनः प्रशान्तस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥७॥

७। 'जितात्मनः प्रशान्तस्य आत्मा शीतोष्ण-सुखदुःखेषु तथा मानापमानयोः' 'परम्' अत्यर्थं 'समाहितः' योगयुक्तः [भवति] इति उपाध्याय-सम्मता व्याख्या। श्रीधरस्तु—"जित आत्मा येन तस्य प्रशान्तस्य रागादि-रहितस्यैव परं केवलम् आत्मा शीतोष्णादिषु सत्स्वपि समाहित आत्मनिष्ठो भवति नान्यस्य।"

7. The self of the self-controlled man remains perfectly in *yoga* [even] in the midst of heat and cold, pleasure and pain and also in honour and disgrace. Or, it is *only* the self of the self-controlled man [and not that of any other] that remains &c.

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥८॥

८। 'ज्ञानविज्ञानतृप्तात्मा' ज्ञानम् उपदेशिकं, विज्ञानम् अपरोक्षानुभवः, ताभ्यां तृप्तः निराकाङ्क्षः आत्मा चित्तं यस्य, 'कूटस्थः' विषयसन्निधौ अपि विकारशून्यः, गिरिशृङ्गस्थः इति भावार्थः, 'विजितेन्द्रियः' 'समलोष्टाश्मकाञ्चनः' भोग्यविषयेषु आसक्तिशून्यत्वात् मृत्पिण्ड-पाषाण-सुवर्णेषु समभावापन्नः 'योगी' 'युक्तः' समाहितः इति उच्यते।

8. The aspirant (*yogin*) who is satisfied with know-

ledge [acquired through instruction] and wisdom [gained from direct intuition], who is unshaken [in the midst of temptations], who has brought his senses under his control, and to whom [because of his unattachment to objects of enjoyment] a lump of earth, a stone, and gold are of the same value, is said to be established in *yoga*.

सुहृन् मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥९॥

९। 'सुहृन्मित्रार्युदासीन-मध्यस्थ-द्वेष्य बन्धुषु' सुहृत् प्रत्युपकारम् अनपेक्ष्य उपकर्त्ता, मित्रं स्नेहवशेन उपकारकः, अरिः शत्रुः, उदासीनः विवदमानानाम् उभयोः अपि उपेक्षकः, मध्यस्थः विवदमानानाम् उभयोः अपि हितैषी, द्वेष्यः अप्रियः, बन्धुः सम्बन्धेन उपकर्त्ता, एतेषु, [तथा] 'साधुषु अपि च' 'पापेषु' दुराचारेषु 'समबुद्धिः' रागद्वेषशून्यः [साधकः एव] 'विशिष्यते' सर्व्वतः उत्कृष्टः भवति ।

9. [The aspirant] who is of the same mind to the disinterested well-wisher, the loving friend, the enemy, the indifferent on-looker, the well-wishing mediator, the despised one, the beneficent relative, and to the virtuous and the sinful, is superior to all.

योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥१०॥

१०। अभ्यासयोगवर्णनम् आरभ्यते । 'योगी एकाकी' 'रहसि' एकान्ते

'स्थितः' 'यतचित्तात्मा' संयत-मनोदेहः 'निराशीः' निराकाङ्क्षः [तथा] 'अपरिग्रहः' द्रव्यादि-बहावेष्टन-शून्यः [सन्] 'सततम्' अहरहः 'आत्मानं' 'युञ्जीत' परमात्मनि समाहितं कुर्य्यात् ।

10. Seated alone in a solitary place, with his mind and body at rest, with no desire [for external objects] and without [many external] appendages, the *yogin* should, day after day, fix his self [in the supreme Self].

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥११॥
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युञ्ज्याद् योगमात्मविशुद्धये ॥१२॥

११,१२। 'शुचौ' शुद्धे 'देशे' स्थाने 'आत्मनः' स्वस्य 'स्थिरम्' अचलं नात्युच्छ्रितं न अतीव उच्चं 'नातिनीचं' चैलाजिनकुशोत्तरं चैलं वस्त्रम्, अजिनं व्याघ्रादिचर्म्म, चैलाजिने कुशेभ्यः उत्तरे उपरितने यस्य तत्—कुशानाम् उपरि चर्म्म, तदुपरि वस्त्रम् आस्तीर्य्य इत्यर्थः, 'आसनं' प्रतिष्ठाप्य, तत्र आसने उपविश्य मनः एकाग्रं कृत्वा 'यतचित्तेन्द्रियक्रियः' संयता चित्तस्य इन्द्रियाणाञ्च क्रिया यस्य [तथाभूतः सन्] 'आत्मविशुद्धये' अन्तःकरणस्य शुद्ध्यर्थम् 'योगं' 'युञ्ज्यात्' अभ्यसेत् ।

11,12. Having placed one's seat in a clean spot,—a seat immovable, neither too high nor too low, and composed of cloth, skin and *kusa* grass put one above the other,—and having seated oneself there and concentrating one's mind and controlling its movements

and those of the senses, one should practise *yoga* with the object of purifying one's heart.

समं कायशिरोग्रीवं धारयन्नचलं स्थिर: ।
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्॥१३॥
प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थित: ।
मन: संयम्य मच्चित्तो युक्त आसीत मत्पर: ॥१४॥

१३,१४। 'ब्रह्मचारिव्रते स्थितः' इन्द्रियसंयमादि-साधनशीलः 'प्रशान्तात्मा' 'विगतभीः' शङ्कातीतः [साधकः] 'कायशिरोग्रीवं' शरीरमध्यभाग-मस्तक-कण्ठं 'समम्' अवक्रम् 'अचलं [च] धारयन्' कुर्व्वन्, 'स्थिरः' [भूत्वा] 'स्वं नासिकाग्रं' 'संप्रेक्ष्य' दृष्ट्वा [इव] अर्द्धनिमीलितनेत्रः भूत्वा इति भावः, 'दिशः च [इतस्ततः] अनवलोकयन्' अपश्यन्, 'मनः संयम्य मच्चित्तः मत्परः' [सन्] 'युक्तः' योगनिरतः, समाहितः 'आसीत' वर्त्तेत ।

13,14. [The aspirant], established in the practices [of controlling his senses, &c.] proper to a *Brahmachárin*, serene-hearted, free from fear, having held erect and unmoved his body, (its middle part), head and neck, becoming motionless, looking [as it were] at the tip of his nose (*i. e.* with his eyes half-closed) and not looking around, controlling his mind, with his heart given to me and aiming only at [union with] me, should remain [seated] in the state of *yoga*.

युञ्जन्नेवं सदाऽऽत्मानं योगी नियतमानस: ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥१५॥

१५। 'एवम्' उक्तप्रकारेण 'सदा आत्मानं युञ्जन्' समाहितं कुर्व्वन्

'नियतमानसः' संयतमनाः 'योगी' 'निर्व्वाणपरमां' निर्व्वाणं परं प्राप्यं यस्यां तां, "मोक्षपर्य्यवसायिनीम्" इति मधुसूदनः, 'मत्संस्थां' मयि स्थितिरूपां 'शान्तिम्' 'अधिगच्छति' प्राप्नोति ।

15. Thus constantly placing his self in the state of *yoga*, the *yogin*, with his mind controlled, attains the peace which consists in abiding in me and which ends in absorption in me.

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः ।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥१६॥

१६। हे 'अर्ज्जुन, न' 'अति-अश्नतः' अत्यन्तम् अधिकं भुञ्जानस्य 'तु' 'न च' 'एकान्तम्' अत्यन्तम् 'अनश्नतः' अभुञ्जानस्य, 'न च' 'अतिस्वप्नशीलस्य' अतिनिद्राशीलस्य, 'जाग्रतः' अतिमात्रं निद्राहीनस्य 'न एव च' योगः 'अस्ति' ।

16. O Arjuna, neither one who eats too much, nor one who eats too little, neither an over-sleepy person, nor an over-waking person can have *yoga*.

युक्ताहारविहारस्य युक्तचेष्टस्य कर्म्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥१७॥

१७। 'युक्ताहारविहारस्य' परिमिताहारगतिशीलस्य, 'कर्म्मसु' 'युक्तचेष्टस्य' परिमित-श्रमशीलस्य, 'युक्तस्वप्नावबोधस्य' परिमितनिद्राजागरणशीलस्य दुःखहा क्लेशक्षयकृत् 'योगः भवति' ।

17. It is only he who eats and walks moderately,

labours moderately at his work, and sleeps and wakes moderately, who can have the *yoga* that destroys pain.

यदा विनियतं चित्तमात्मन्येवावतिष्ठते।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥१८॥

१८। 'यदा' [साधकस्य] 'चित्तम्' 'विनियतं' विशेषेण निरुद्धं [सत्] 'आत्मनि एव' 'अवतिष्ठते' निश्चलं भवति, [यदा च सः] 'सर्वकामेभ्यः' दृष्टादृष्ट-काम्यविषयेभ्यः 'निःस्पृहः' तृष्णाशून्यः [भवति] 'तदा' [सः] 'युक्तः' प्राप्त-योगः 'इति उच्यते'।

18. When the mind [of the aspirant], fully restrained, rests entirely in the self, [and when he becomes] free from desire [for all objects of desire, he] is said to be established in *yoga*.

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥१९॥

१९। 'यथा' 'निवातस्थः' वातशून्यदेशे स्थितः 'दीपः' 'न इङ्गते' न चलति, 'आत्मनः योगं युञ्जतः' आत्मविषयं योगम् अभ्यस्यतः 'यतचित्तस्य' संयतान्तःकरणस्य 'योगिनः' 'सा' [एव] 'उपमा' 'स्मृता' चिन्तिता, कथिता। अचञ्चलं तच्चित्तं तद्वत्तिष्ठति इत्यर्थः।

19. As a lamp placed in a windless spot does not flicker,—that is regarded as the similitude of a *yogin* of restrained mind practising self-communion.

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनाऽऽत्मानं पश्यन्नात्मनि तुष्यति ॥२०॥
सुखमात्यन्तिकं यत्तद् बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवाऽयं स्थितश्चलति तत्त्वतः ॥२१॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन् स्थितो न दुःखेन गुरुणाऽपि विचाल्यते ॥२२॥
तं विद्याद् दुःखसंयोगवियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥२३॥

२०-२३। अथ योगलक्षणं कथयति सार्द्धत्रिभिः श्लोकैः। 'यत्र' यस्मिन् अवस्थाविशेषे 'योगसेवया' योगानुष्ठानेन 'निरुद्धं' विषयेभ्यः सम्यक् आकृष्टं 'चित्तम्' 'उपरमते' स्थिरं भवति, 'यत्र च' 'आत्मना' शुद्धेन मनसा 'आत्मानम् पश्यन् आत्मनि एव तुष्यति,' न तु विषयेषु, 'यत् बुद्धिग्राह्यम् अतीन्द्रियम् अत्यन्तं सुखं तत् यत्र' 'वेत्ति' अनुभवति, 'यत्र च' 'अयं [साधकः] स्थितः' [सन्] 'तत्त्वतः' आत्मस्वरूपात् 'न एव' 'चलति' विच्युतः भवति, 'यं च लब्ध्वा अपरं लाभं ततः अधिकं न मन्यते, यस्मिन् स्थितः' [सन्] 'गुरुणा' महता, "गुणवत्-पुत्रवियोगादिरूपेण" (उपाध्यायः) 'दुःखेन अपि' 'न विचाल्यते' न अभिभूयते, 'तम्' 'दुःखसंयोगवियोगं' दुःख-स्पर्श-शून्यम् [अवस्थाविशेषं] 'योगसंज्ञकं' योगशब्दवाच्यं 'विद्यात्' जानीयात्। 'सः' [योगः] 'निश्चयेन' दृढतया, अनिर्विण्णचेतसा निर्वेदरहितेन, शैथिल्यशून्येन चेतसा चित्तेन 'योक्तव्यः' अभ्यसनीयः।

20-23. [That condition] in which the mind, fully drawn away from external objects by the practice of *yoga*, is at rest, in which, seeing the self by the self,

one is satisfied with the self, in which one feels that intense joy, transcending sense, which reason [alone] can experience, in which, being established, he [the aspirant] does not move away from his real nature, gaining which one does not think any other gain to be greater than it, in which, being established therein, one is not overwhelmed even by a great calamity,—one should know that condition, free from the touch of pain, to be what is called *yoga*. It is to be practised with firmness and with a heart free from indifference.

सङ्कल्पप्रभवान् कामांस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥२४॥
शनैः शनैरुपरमेद् बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥२५॥

२४,२५ । 'सङ्कल्पप्रभवान्' विषयाभिनिवेश-जातान्—"सङ्कल्पो दुष्टेष्वपि विषयेषु शोभनत्वादिदर्शनेन शोभनाध्यासः" इति मधुसूदनः,—'सर्व्वान् कामान्' 'अशेषतः' निःशेषेण 'त्यक्त्वा, मनसा एव' 'इन्द्रियग्रामम्' इन्द्रियसमूहं 'समन्ततः' सर्व्वस्मात् विषयात् 'विनियम्य' सम्यक् निगृह्य, 'धृतिगृहीतया' धैर्य्ययुक्तया 'बुद्ध्या' 'शनैः शनैः' अभ्यासक्रमेण 'उपरमेत्' स्थिरः विषयनिवृत्तः भवेत् । 'मनः' 'आत्मसंस्थं' आत्मनि स्थितं 'कृत्वा' [आत्मनः अन्यत्] 'न किञ्चित् अपि चिन्तयेत्' ।

24,25. Giving up without exception all desires arising from attention to external objects, and fully drawing away, with the mind, the senses from all sides, one should slowly become quiescent with patient deter-

mination. Fixing the mind in the self, one should not think of anything [else].

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥२६॥

२६। 'चञ्चलम् अस्थिरं मनः' 'यतः यतः' यं यं विषयं प्रति 'निश्चरति' गच्छति, 'ततः ततः' तस्मात् तस्मात् विषयात् 'एतत्' 'नियम्य' निरुध्य, प्रत्याहृत्य, 'आत्मनि एव' 'वशं नयेत्' स्थिरं कुर्य्यात्।

26. Towards whatever objects the restless and unsteady mind goes, drawing it from all of them one should fix it in the self.

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥२७॥

२७। 'उत्तमं सुखम्' 'एनम्' एतं 'प्रशान्तमनसं हि' 'शान्तरजसं' विक्षेपात्मक-रजोगुणशून्यम् 'अकल्मषं' पापवर्ज्जितम् 'ब्रह्मभूतम्' ब्रह्मभावप्राप्तं 'योगिनं' [स्वयमेव] 'उपैति' आगच्छति।

27. The highest bless comes [of itself] to this *yogin* whose mind is at profound rest, in whom *rajas* (Nature's distracting quality) is destroyed, who is sinless and has become possessed of the divine nature.

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥२८॥

२८। 'एवम्' 'आत्मानं' मनः 'सदा' 'युञ्जन्' समाहितं कुर्व्वन् 'विगत-

कल्मषः' विनष्टपापः 'योगी' 'सुखेन' अनायासेन 'ब्रह्मसंस्पर्शं' ब्रह्मानुभवरूपम् 'अत्यन्तं' निरतिशयं 'सुखम्' 'अश्नुते' प्राप्नोति ।

28. Thus always fixing his mind [in God], the *yogin*, freed from sin, easily attains the supreme bliss of touching (*i. e.* directly realising) Brahman.

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥२९॥

२९। इदानीं योगसाधनस्य स्थायिफलं दर्शयति पञ्चभिः श्लोकैः। 'योगयुक्तात्मा' योगेन समाहितचित्तः 'सर्व्वत्र समदर्शनः' [साधकः] 'आत्मानम्' 'सर्व्वभूतस्थम्' सर्व्वभूतेषु अवस्थितम् 'सर्व्वभूतानि च आत्मनि' [अवस्थितानि] 'ईक्षते' पश्यति ।

29. [The permanent effect of practising *yoga* is described in this and the four following verses. The aspirant] whose mind has been united [to God] and who sees unity everywhere, beholds the self as existing in all things and all things as existing in the self.

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥३०॥

३०। 'यः मां सर्व्वत्र पश्यति, मयि च सर्व्वं पश्यति तस्य अहं न' 'प्रणश्यामि' अदृश्यः भवामि, 'सः च मे न' 'प्रणश्यति' अदृश्यः भवति, "कृपादृष्ट्या तं विलोकयानुगृह्णामि" इति श्रीधरः ।

30. He who sees me in all things and all things

in me,—I am never invisible to him, and he is never invisible to me (*i. e.* ever a recipient of my grace.)

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्त्तमानोऽपि स योगी मयि वर्त्तते ॥३१॥

३१ । 'यः' 'एकत्वमास्थितः' अभेदम् आश्रितः 'सर्व्वभूतस्थितं मां भजति, सः योगी' 'सर्व्वथा वर्त्तमानः अपि' सर्व्वावस्थायां स्थितः अपि, "भगवदाज्ञावशाद् यां काञ्चिदवस्थां स्वीकृत्य विद्यमानोऽपि" इति उपाध्यायः, 'मयि वर्त्तते' ।

31. The *yogin* who worships me as existing in all things, with a consciousness of unity, abideth in me, in whatever condition he may be.

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥३२॥

३२ । हे 'अर्ज्जुन, यः' 'सर्व्वत्र' सर्व्वप्राणिषु 'सुखं वा दुःखम्' 'आत्मौपम्येन' स्वसादृश्येन 'समं पश्यति,'—"यथा मम सुखं प्रियं दुःखञ्चाप्रियं तथाऽन्येषामपीति सर्व्वत्र समं पश्यन् सुखमेव सर्व्वेषां यो वाञ्छति, न तु कस्यापि दुःखम्" इति श्रीधरः—'सः योगी' 'परमः' सर्व्वयोगिनां मध्ये श्रेष्ठः 'मतः' अभिमतः ।

32. O Arjuna, he who looks impartially upon the joys and sorrows of all beings as if they where his own, is regarded as the best of all *yogins.*

अर्जुन उवाच

योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याहं न पश्यामि चञ्चलत्वात् स्थितिं स्थिराम् ॥३३॥

३३। [अर्ज्जुनः उवाच,—] हे 'मधुसूदन,' 'साम्येन' समत्वसाधनेन 'यः अयं योगः त्वया प्रोक्तः' [मनसः] 'चञ्चलत्वात् अहम् एतस्य' 'स्थिरां' दीर्घकालां 'स्थितिं' न पश्यामि।

33. [Arjuna said,—] O Madhusúdana, the *yoga* by means of equanimity, which you teach,—I do not see that it can last long, owing to the restlessness [of the mind].

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम्।
तस्याऽहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥३४॥

३४। हे 'कृष्ण, मनः हि चञ्चलं', 'प्रमाथि' देहेन्द्रिय-क्षोभकरं 'बलवत्' 'दृढं' दुर्निरोधं। अहं तस्य निरोधं वायोः [निरोधम्] इव सुदुष्करं मन्ये।

34. O Krishna, the mind is restless, causing trouble [to the body and senses], strong and hard to curb. I regard it's restraint to be as difficult as that of the wind.

श्रीभगवान् उवाच

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥३५॥

३५। [भगवान् उवाच,—] हे 'महाबाहो, मनः दुर्निग्रहं' 'चलं चञ्चलम् [एतत्] 'असंशयम् [एव]'। 'तु' किन्तु, हे 'कौन्तेय', 'अभ्यासेन' समानप्रत्ययस्य आवृत्त्या, 'वैराग्येण' विषयवैतृष्ण्येन 'च' [तत् मनः] 'गृह्यते' निगृहीतं भवति।

35. [The Lord said,—] O mighty-armed hero, the mind is undoubtedly restless and hard to curb. But, O son of Kuntí, it can be restrained by constant repetition [of the same thought] and by indifference [to external objects].

असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥३६॥

३६। 'असंयतात्मना' अवशीकृतचित्तेन जनेन 'योगः' 'दुष्प्रापः' दुर्लभः, 'इति मे' 'मतिः' अभिमतः। 'तु' 'वश्यात्मना' संयतचित्तेन 'उपायतः' यथोक्तेन उपायेन 'यतता' प्रयत्नं कुर्वता साधकेन [योगः] 'अवाप्तुं' प्राप्तुं 'शक्यः'।

36. My opinion is that it is difficult for a man of uncontrolled mind to attain *yoga* ; but it is attainable by a self-controlled person endeavouring [to attain it] through the [aforesaid] means.

अर्जुन उवाच

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥३७॥

३७। [अर्ज्जुनः उवाच,—] हे 'कृष्ण,' 'श्रद्धयोपेतः' श्रद्धया युक्तः [परन्तु] 'अयतिः' अप्रयत्नवान् [कश्चित् जनः प्रथमं योगे प्रवृत्तः सन्, तत्परं यत्नशैथिल्येन] 'योगात् चलितमानसः' [सञ्जातः] 'योगसंसिद्धिम् अप्राप्य कां गतिं गच्छति' ?

37. [Arjuna said,—] O Krishna, [if] a man, endowed with faith [but] not with earnest endeavour [at first engages in, but afterwards lets] his mind swerve from, *yoga*, what condition does he,—not having attained success in *yoga*,—come to ?

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥३८॥

३८। हे 'महाबाहो,' [सः] 'अप्रतिष्ठः' असिद्धः जनः 'ब्रह्मणः पथि' ब्रह्मप्राप्तिमार्गे 'विमूढः' हृतज्ञानः [तथा] 'उभयविभ्रष्टः' कर्म्ममार्गात् योगमार्गात् च विच्युतः [सन्] 'कच्चित्' किं 'न नश्यति' 'छिन्नाभ्रम् इव' यथा पूर्व्वस्मात् मेघात् विश्लिष्टः मेघान्तरम् अप्राप्तः मेघः मध्ये विलीयते तद्वत् ?

38. O mighty-armed hero, does not this unsuccessful man, pèrplexed as to the way to Brahman, and deviating from both [the *karma* and the *yoga* paths] perish like a cloud separated [from the mass of which it formed a part] ?

एतं मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्यास्य छेत्ता नह्युपपद्यते ॥३९॥

३९। हे 'कृष्ण, एतत् मे संशयम्' [त्वम्] 'अशेषतः' निःशेषेण 'छेत्तुम् अर्हसि' त्वया एव संशयः निरसनीयः इत्यर्थः। 'हि' यतः 'अस्य संशयस्य त्वत् अन्यः छेत्ता न' 'उपपद्यते' सम्भवति ।

39. O Krishna, you should completely remove this doubt of mine, as no one else than you can remove it.

श्रीभगवान् उवाच

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत् कश्चिद् दुर्गतिं तात गच्छति ॥४०॥

४०। [भगवान् उवाच,—] हे 'पार्थ, न एव इह [लोके] न' 'अमुत्र' परलोके तस्य विनाशः विद्यते । 'हि' यतः, हे 'तात' प्रिय, 'न कश्चित् [अपि]' 'कल्याणकृत्' शुभकारी जनः 'दुर्गतिं गच्छति' ।

40. O son of Prithá, there is no ruin for him either here or hereafter ; for, O dear, no one who does good deeds comes to grief.

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥४१॥

४१। 'योगभ्रष्टः पुण्यकृतां लोकान् प्राप्य' [तत्र] 'शाश्वतीः समाः' बहून् संवत्सरान् 'उषित्वा' वाससुखम् अनुभूय [तत्परं] शुचीनां' शुद्धानां 'श्रीमतां' धनिनां 'गेहे' गृहे 'अभिजायते' जन्म लभते ।

41. Going to the regions of the righteous and living there for many years, the man who has fallen from *yoga* is born [again] in a house of pure-hearted rich men.

अथवा योगिनामेव कुले भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥४२॥

४२। 'अथवा' [सः] 'धीमतां' ज्ञानिनां 'योगिनाम् एव कुले' 'भवति' जायते। '[इह] लोके यत् ईदृशं जन्म, एतत् हि [पूर्व्वम् अपेक्ष्य] दुर्लभतरम्' ।

42. Or he is re-born in a house of wise *yogins.* Such birth in the world is surely more difficult to obtain [than the former].

तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥४३॥

४३। हे 'कुरुनन्दन,' 'तत्र' परजन्मनि [सः] 'पौर्व्वदैहिकं' पूर्व्वदेहभवं 'बुद्धिसंयोगं' बुद्ध्या योगमत्या योगफलेन च संयोगं संस्पर्शं लभते, 'ततः' पूर्व्वजन्मकृतात् साधनात् 'च' 'भूयः' अधिकतरं 'संसिद्धौ' सिद्धिनिमित्तं 'यतते' यत्नं करोति ।

43. There, O descendant of Kuru, he gains connection with the *yogic* tendency and experience he had in his former life, and strives after success more earnestly than he did in that life.

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥४४॥

४४। 'अवशः अपि' कुतश्चित् अन्तरायात् अनिच्छन् अपि 'सः तेन

पूर्व्वाभ्यासेन एव' 'ह्रियते' योगमार्गं आकृष्यते। योगस्य जिज्ञासुः अपि [सः] 'शब्दब्रह्म' वेदं, वेदोक्तकर्म्मफलम् 'अतिवर्त्तते' अतिक्रामति, ततोऽधिकं फलं प्राप्नोति।

44. Even though not inclined to exert himself [owing to certain obstacles], he is drawn by that former habit [towards *yoga*]. Even when he has become an inquirer after *yoga*, he goes beyond the Vedas (*i. e.* the fruits of performing Vedic rites).

प्रयत्नाद् यतमानस्तु योगी संशुद्धकिल्विषः।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥४५॥

४५। 'तु' पक्षान्तरे 'प्रयत्नात्' सम्यक् यत्नेन सह यतमानः साधनशीलः 'योगी' 'संशुद्धकिल्विषः' विगतपापः [तथा] 'अनेकजन्म-संसिद्धः' अनेकेषु जन्मसु सञ्चितेन योगफलेन सिद्धिं प्राप्तः [सन्] 'ततः परां गतिं याति'।

45. On the other hand, the *yogin* who strives with great care, is purged of his sins, and gaining success [through *yogic* experience gained] in many lives, at last attains the supreme goal.

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद् योगी भवार्जुन ॥४६॥

४६। 'योगी तपस्विभ्यः' 'अधिकः' श्रेष्ठः, 'ज्ञानिभ्यः अपि अधिकः, कर्म्मिभ्यः] च अधिकः' 'मतः' ममाभिमतः, तस्मात् [हे] अर्ज्जुन, योगी भव।

46. According to me a *yogin* is superior to those who practise austerities, superior to the learned, and superior to those who perform [prescribed] actions. Therefore be a *yogin*, O Arjuna.

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥४७॥

४७। 'सर्व्वेषां योगिनाम् अपि' [मध्ये] 'यः श्रद्धावान्' [सन्] 'मद्गतेन' मयि समाहितेन 'अन्तरात्मना' अन्तःकरणेन 'मां भजते, सः युक्ततमः मे मतः'।

47. And among all the *yogins*, he who worships me reverently and with his heart devoted to me, is in my opinion the best *yogin*.

ज्ञानयोगो नाम सप्तमोऽध्यायः

---:*:---

श्रीभगवान् उवाच

मय्यासक्तमनाः पार्थ योगं युञ्जन् मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥१॥

१। [श्रीभगवान् उवाच,—] 'हे पार्थ, मयि आसक्तमनाः' [तथा] 'मदाश्रयः' मदेकशरणः [सन्] 'योगं 'युञ्जन्' अभ्यस्यन् 'यथा माम् असंशयं समग्र [च] ज्ञास्यसि, तत् शृणु' ।

1. [The Lord said,—] O son of Prithá, hear how you will know me fully and without doubt after practising *yoga* with your heart devoted to me and with the consciousness that I am the only refuge.

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यज् ज्ञातव्यमवशिष्यते ॥२॥

२। [अहं] 'ते' तुभ्यं 'सविज्ञानम्' अनुभवसहितम् [शास्त्रीयं] 'इदं ज्ञानम्' 'अशेषेण' साकल्येन 'वक्ष्यामि, यत् ज्ञात्वा' 'इह' अत्र विषये 'भूयः' अधिकम् 'अन्यत् ज्ञातव्यं' 'न अवशिष्यते' अवशिष्टं न तिष्ठति ।

2. I will impart to you in full this [scriptural]

knowledge, accompanied with direct consciousness, after knowing which there remains nothing more to be known on the subject.

मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये।
यततामपि सिद्धानां कश्चिन् मां वेत्ति तत्त्वतः ॥३॥

३। 'मनुष्याणां सहस्रेषु कश्चित्' 'सिद्धये' योगसिद्धिलाभाय 'यतति' यत्नं करोति। 'यततां' यत्नं कुर्व्वतां 'सिद्धानां अपि कश्चित् मां' 'तत्त्वतः' यथावत् 'वेत्ति' जानाति।

3. Scarcely one among thosuands of men strives after success [in *yoga* *], Even among those who strive with success scarcely one knows me as I really am.

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥४॥

४। प्रतिज्ञातम् ईश्वरतत्त्वं संक्षेपतः कथयति भूमिरिति द्वाभ्याम्। 'भूमिः आपः अनलः वायुः खं मनः बुद्धिः अहंकारः एव च इति इयं मे अष्टधा' 'भिन्ना' विभक्ता 'प्रकृतिः'। 'प्रकृतिः' इति मुख्यं सांख्यम्, 'मे प्रकृतिः' इति सांख्येन सह वेदान्तस्य समन्वयः।

4. [The promised knowlege is given briefly in

* Which is of various kinds, including such as have little to do with right knowledge.

this and the following verse,—] Earth, water, fire, air, ether, the sensorium, the understanding and egoity, —this is my nature diversified into eight forms.

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्य्यते जगत् ॥५॥

५। हे 'महाबाहो, इयं [प्रकृतिः] अपरा एव' [पराप्रकृतेरधीनत्वात्], 'तु' पक्षान्तरे 'इतः' अस्याः 'परां मे अन्यां' 'जीवभूतां' जीवस्वरूपां 'प्रकृतिं' 'विद्धि' जानीहि, 'यया [चेतनया प्रकृत्या] इदं [विषयरूपं] जगत् धार्य्यते'।

5. This is [my] lower [nature]; know, on the other side, my higher nature, different from this, of the form of the individual self, by which this [objective] world is supported.

एतद्योनीनि भूतानि सर्वाणीत्युपधारय।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥६॥

६। 'सर्व्वाणि भूतानि' 'एतद्योनीनि' एताभ्यां कारणाभ्यां जातानि इति 'उपधारय' बुध्यस्व। 'अहम्' [एव] 'कृत्स्नस्य' सर्व्वस्य 'जगतः' 'प्रभवः' स्रष्टा, 'तथा' 'प्रलयः' संहर्त्ता।

6. Know that all things proceed from this twofold cause. I [in my twofold nature] am the Creator and Destroyer of the whole world.

मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥७॥

७। हे 'धनञ्जय', 'मत्तः' मत्सकाशात् परतरं न किञ्चित् अस्ति । 'सर्व्वम् इदं मयि' 'प्रोतं' ग्रथितं, 'सूत्रे मणिगणाः इव' यथा सूत्रे मणिसमूहाः ग्रथिताः तिष्ठन्ति ।

7. O Dhananjaya, there is nothing higher than I. All this is strung in me as gems in a thread.

रसोऽहमप्सु कौन्तेय प्रभाऽस्मि शशिसूर्य्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥८॥

८। ईश्वरस्य सर्व्वसारत्वं प्रपञ्चयति त्रिभिः श्लोकैः । हे 'कौन्तेय,' 'अहम् अप्सु' 'रसः' तरलत्वम्, 'शशिसूर्य्ययोः प्रभा', 'सर्व्ववेदेषु' 'प्रणवः' ओंकारः, 'खे' आकाशे 'शब्दः,' [तथा] 'नृषु' पुरुषेषु पौरुषम् 'अस्मि' ।

8. O Son of Kunti, I exist as fluidity in water, light in sun and moon, the syllable 'Om' in the all Vedas, sound in ether and manhood in men.

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥९॥

९। 'पृथिव्यां च [अहं] पुण्यः गन्धः', 'विभावसौ' अग्नौ [च] 'तेजः' अस्मि । [अहं] 'सर्व्वभूतेषु जीवनं तपस्विषु च तपः अस्मि' ।

9. And I exist in earth as pure smell, and in fire

as heat. I exist as life in all creatures and as austerity in practisers of austerities.

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥१०॥

१०। हे 'पार्थ, मां सर्व्वभूतानां' 'सनातनं' नित्यं 'बीजं विद्धि'। 'अहं बुद्धिमतां बुद्धिः [तथा] तेजस्विनां तेजः अस्मि'।

10. O son of Prithá, know me as the everlasting seed of all things. I am the intelligence of the intelligent and the power of the powerful.

बलं बलवतामस्मि कामरागविवर्जितम् ।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥११॥

११। हे 'भरतर्षभ' भरतवंशीयानां श्रेष्ठ, 'अहं बलवतां च कामरागविवर्जितं बलं [तथा] भूतेषु धर्म्माविरुद्धः कामः अस्मि'।

11. O chief of the descendants of Bharata, I am the strength, free from desire and attachment, of the strong, and desire, [unopposed to virtue, in [all] creatures.

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ।
मत्त एवेति तान् विद्धि न त्वहं तेषु ते मयि ॥१२॥

१२। 'ये च एव' 'सात्त्विकाः' सत्त्वगुणजाताः 'भावाः' पदार्थाः, 'ये

'राजसाः' रजोगुणजाताः 'तामसाः' तमोगुणजाताः 'च' 'भावाः' पदार्थाः 'तान् मत्तः [जातान्] एव इति विद्धि'; 'तु' किन्तु 'तेषु अहं न' [वर्त्ते] नाहं तदधीन इत्यर्थः, 'ते [एव मदधीनाः सन्तः] मयि' [वर्त्तन्ते]। गुणत्रय-विभागः चतुर्दशाध्याये द्रष्टव्यः।

12. Know that those things that proceed from [the qualities of] *sattva*, (luminosity), *rajas* (passion) and *tamas* (*enertia*), really proceed from me ; but I am not in them (*i. e.* not subject to them), they are in me (*i. e.* dependent on me). [The three primal qualities are trated of in chapter XIV].

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥१३॥

१३। 'एभिः' 'त्रिभिः' त्रिविधैः 'गुणमयैः' सत्त्वादिगुणविकारैः 'भावैः' पदार्थैः 'मोहितम् इदं सर्वं जगत्' 'एभ्यः परं' एभिः अस्पृष्टम् [अतः एव] 'अव्ययम्' निर्विकारं 'मां न अभिजानाति'।

13. Deluded by these three [kinds of] things consisting of the qualities [of nature], this whole world knows me not as transcending them [and so] immutable.

दैवी ह्येषा गुणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥१४॥

१४। 'मम एषा दैवी गुणमयी माया' 'दुरत्यया' दुःखेन अत्ययः अति-

क्रमणं यस्याः सा, दुस्तरा। 'ये माम् एव' 'प्रपद्यन्ते' शरणत्वेन आयान्ति, 'भजन्ति, 'ते एतां मायां' 'तरन्ति' अतिक्रामन्ति।

14. This divine *máyá* (illusive power) of mine, consisting of the qualities [of nature], is difficult to get rid of. Those who take refuge in me are freed from it.

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः।
माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः ॥१५॥

१५। 'मायया अपहृतज्ञानाः मूढाः' [तथा] 'आसुरं भावम् आश्रिताः' असुरसदृशस्वभावं प्राप्ताः 'नराधमाः' 'दुष्कृतिनः' पापकारिणः 'मां न प्रपद्यन्ते'। आसुरः भावः षोडशाध्याये वर्णितः।

15. Fools, who have been robbed of their wisdom by *Máyá*, and sinners, the worst of men, who have assumed the demoniac character, do not take refuge in me.

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥१६॥

१६। हे 'अर्जुन,' हे 'भरतर्षभ,' 'चतुर्विधाः' 'सुकृतिनः' पुण्यकर्माणः 'जनाः मां भजन्ते'। के ते इति वदति,—(१) 'आर्तः' रोगादिना पीडितः, (२) 'जिज्ञासुः' ज्ञानेच्छुः, (३) 'अर्थार्थी' धनकामः' (४) 'ज्ञानी' तत्त्ववित् 'च'।

16. O Arjuna, O chief of the descendants of

Bharata, four kinds of virtuous people worship me, the sufferer, the seeker of knowledge, the seeker of wealth and the wiseman (*i. e.* he who knows the Absolute).

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥१७॥

१७। 'तेषां' [मध्ये] 'नित्ययुक्तः' सदा मन्निष्ठः 'एकभक्तिः' एकस्मिन् मयि एव भक्तिः यस्य सः 'विशिष्यते' श्रेष्ठः भवति । 'अहं ज्ञानिनः' 'अत्यर्थम्' अत्यन्तम् 'प्रियः हि, सः च मम प्रियः' ।

17. Of them, the wiseman, who is ever in the state of *yoga* and devoted to the One only, is the best. Verily I am exceedingly dear to the wiseman and he too is dear to me.

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥१८॥

१८। 'एते सर्व्वे एव' 'उदाराः' महान्तः, 'ज्ञानी तु' 'आत्मा एव' परमात्मना सह एकः 'इति' [मे] 'मतम्' निश्चयः। 'हि' यतः 'सः' 'युक्तात्मा' समाहितचित्तः [सन्] 'अनुत्तमां' न विद्यते उत्तमा यस्याः ताम्, सर्व्वोत्तमां 'गतिं माम्' 'आस्थितः' आश्रितवान् ।

18. All these indeed are great, but I regard the wiseman as really [one with] the self; for, with his mind under his control, he has taken to me as the highest goal.

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥१९॥

१९। 'बहूनां जन्मनाम् अन्ते' बहुजन्मार्ज्जित-पुण्यफलेन 'वासुदेवः' जगति वसति इति, किंवा जगत् अस्मिन् वसति इति, सर्व्वगतं ब्रह्म [एव] 'सर्व्वं' चराचरम् 'इति' [दृष्ट्वा] 'ज्ञानवान् मां' 'प्रपद्यते' शरणं गच्छति ; [यः एवं सर्व्वात्मानं मां प्रतिपद्यते] 'सः' महात्मा सुदुर्लभः ।

19. At the end of many births (*i. e.* through merit acquired in many lives) the wiseman, [having realised the truth] that Vásudeva (the all-pervading One) is all-in-all, takes refuge in me. Such a high-souled man is very hard to find.

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥२०॥

२०। 'तैः तैः' पुत्र-पशु-भोगादि-विषयैः 'कामैः' हृतज्ञानाः [जनाः] 'तं तं' तत्-तत्-देवताराधनाविषयं 'नियमम्' 'आस्थाय' स्वीकृत्य 'स्वया प्रकृत्या' 'नियताः' चालिताः [सन्तः] 'अन्यदेवताः' मद्व्यतिरिक्ताः देवताः 'प्रपद्यन्ते' भजन्ते ।

20. People robbed of their wisdom by those desires (*i. e.* desires for sons, beasts, pleasures &c.) and adopting those rules (*i. e.* rules regulating the worship of minor deities), worship other deities, led by their respective natures.

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥२१॥

२१ । 'यः यः भक्तः' 'यां यां' 'तनुं' विग्रहवतीं देवतां 'श्रद्धया अर्चितुम् इच्छति, तस्य तस्य' [भक्तस्य] 'ताम्' तद्देवताविषयाम् 'अचलां भक्तिम्' 'अहम् एव' 'विदधामि' अर्पयामि ।

21. When any devotee wishes to worship any embodied deity with reverence, it is I who give his unshaken reverence for that deity.

स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान् मयैव विहितान् हि तान् ॥२२॥

२२ । 'सः तया श्रद्धया युक्तः तस्याः' 'राधनम्' पूजनम् 'ईहते' करोति, 'ततः' तस्मात् राधनात् तस्याः देवतायाः वा 'मया एव विहितान् कामान् च लभते' ।

22. Endowed with that reverence, he performs the worship of that deity and receives therefrom the desired object as ordained by me.

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥२३॥

२३ । 'तेषाम्' 'अल्पमेधसाम्' अल्पप्रज्ञानां 'तत् फलम्' 'अन्तवत्' विनाशि 'तु भवति' । 'देवयजः' देवोपासकाः 'देवान्' 'यान्ति' प्राप्नुवन्ति, 'मद्भक्ताः माम् अपि यान्ति' ।

23. The fruit gained by those men of small intelli-

gence is perishable. The worshippers of the gods obtain [union with] the gods, while my worshippers attain [union with] me.

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥२४॥

२४ । 'अबुद्धयः' अविवेकिनः 'मम' 'अव्ययं' निर्व्विकारम् 'परम्' 'अनुत्तमं' सर्व्वोत्तमं' 'भावं' स्वरूपम् 'अजानन्तः' 'अव्यक्तम्' अप्रकाशं, प्रपञ्चातीतं 'मां' 'व्यक्तिमापन्नं' प्रकाशं गतं, मनुष्यादिसशरीमभावं प्राप्तं मन्यन्ते ।

24. People without understanding, not knowing my higher, immutable and transcendent nature, think of me, who am unmanifest, as possessed of a manifest [*i. e.* perceptible and limited] nature,

नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥२५॥

२५ । 'योगमायासमावृतः' "योगो गुणानां युक्तिर्घटनं सैव माया योगमाया" इति शङ्करः, "योगः सृजाशक्तीनां सम्मेलनं स एव माया प्रकट-भावापन्ना प्रकृतिः" इति उपाध्यायः,—'तया समावृतः' [सन्] 'अहं सर्व्वस्य [सकाशे] 'प्रकाशः न' [भवामि] । 'अयं मूढः लोकः माम् अजम् अव्ययम् [इति] न जानाति' ।

25. Being veiled by my creative and illusive power, I am not manifest to all. This deluded world knows me not as unborn and immutable.

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥२६॥

२६। हे 'अर्जुन, अहं समतीतानि वर्त्तमानानि भविष्याणि च भूतानि' 'वेद' जानामि, 'मां तु कःचन न जानाति'।

26. O Arjuna, I know all things, past, present, and future ; but no one knows me.

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।
सर्वभूतानि सम्मोहं सर्गे यान्ति परन्तप ॥२७॥

२७। हे 'भारत,' हे 'परन्तप,' 'सर्गे' सृज्यते इति सर्गः, तस्मिन्, सृष्टिकाले 'इच्छाद्वेषसमुत्थेन' इच्छाद्वेषजातेन 'द्वन्द्वमोहेन' शीतोष्णादि-परस्परविरुद्ध-युगल-निमित्तेन विवेकभ्रंशेन 'सर्व्वभूतानि' 'सम्मोहं' मूढ़तां 'यान्ति' प्राप्नुवन्ति।

27. O descendant of Bharata, O tormentor of foes, at the time of their birth all creatures are affected by the delusion caused by the pair of opposites (heat and cold, pleasure and pain &c.) and arising from desire and aversion.

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥२८॥

२८। 'येषां पुण्यकर्म्मणां जनानां तु पापम्' 'अन्तगतं' नष्टं, 'द्वन्द्वमोह-निर्म्मुक्ताः ते दृढव्रताः [सन्तः] मां भजन्ते'।

28. But those righteous men whose sins have come to an end, are freed from the delusion caused by the pair of opposites and they worship me with firm determination.

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥२९॥

२९ । 'ये माम् आश्रित्य' 'जरामरणमोक्षाय' जरामरणयोः मुक्तिलाभार्थं 'यतन्ति' यत्नं कुर्व्वन्ति 'ते तत् ब्रह्म,' 'कृत्स्नम्' सर्व्वम् 'अध्यात्मम्' आत्मविषयं तत्त्वम्, 'अखिलं' समस्तं 'कर्म्म च' 'विदुः' जानन्ति ।

29. Those who, depending on me, endeavour after liberation from old age and death, come [gradually] to know Brahman, all things pertaining to the self, and all actions.

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥३०॥

३० । 'ये' 'युक्तचेतसः' समाहितचित्ताः [जनाः] 'साधिभूताधिदैवम्' अधिभूतेन अधिदैवेन च सह, 'साधियज्ञं च' अधियज्ञेन च सह 'मां विदुः' 'ते' 'प्रयाणकाले' मरणसमये 'अपि मां' 'विदुः' न विस्मरन्ति इत्यर्थः । अधिभूतादिशब्दा उत्तराध्यायारम्भे व्याख्याताः ।

30. Those men of controlled minds who know me with *adhibhúta*, *adhidaiva*, and *adhiyajna* (terms explained in the beginning of the next chapter), realise me even at the time of death.

अक्षरब्रह्मयोगो नाम अष्टमोऽध्यायः

———:*:———

अर्जुन उवाच

किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥१॥

१। [अर्ज्जुनः उवाच,—] हे 'पुरुषोत्तम, तत् ब्रह्म किम् ? अध्यात्मम् किं ? कर्म्म किम् ? अधिभूतं च किं प्रोक्तम् ? अधिदैवं च किम् उच्यते ?

1. [Arjuna said,—] O best of persons, what is that Brahman ? What is *adhyátma* ? What is action ? What is that which is called *adhibhútam* ? And what is that which you call *adhidaivam* ?

अधियज्ञः कथं कोऽत्र देहेऽस्मिन् मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥२॥

२। [अर्ज्जुनप्रश्नशेषः,—] हे 'मधुसूदन, अत्र देहे कः अधियज्ञः ? कथं [सः] अस्मिन् [स्थितः यज्ञम् अधितिष्ठति] ? प्रयाणकाले च नियतात्मभिः कथं [त्वं] ज्ञेयः असि' ?

2. [Arjuna's questions continue,—] O Madhusùdana, who is the *adhijajna* in this body ? How, [placed

here, does he direct the sacrifice] ? And how are you to be known by men of steadied mind at the time of death ?

श्रीभगवान् उवाच

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥३॥

३ । [भगवान् उवाच,—] 'परमं' श्रेष्ठं, सर्व्वसीमातीतम् 'अक्षरम्' न क्षरति, व्येति, इति, अव्ययम् [एव] ब्रह्म ; 'स्वभावः' स्वस्य ब्रह्मणः जीवरूपेण भवनं, जीवः आत्मानं देहम् अधिकृत्य वर्त्तमानः इति 'अध्यात्मम् उच्यते'। 'भूतभावोद्भवकरः' भूतवस्तुनः सृष्टवस्तुनः उत्पत्तिकरः 'विसर्गः' त्यागः, ब्रह्मपक्षे आत्मत्यागः ; जीवपक्षे आत्मत्यागः द्रव्यत्यागः वा 'कर्म्मसंज्ञितः' कर्म्मशब्द-वाच्यः । व्याख्याकारैः तु वस्तुत्यागः इत्येव व्याख्यातः ।

3. [The Lord said,—] The transcendent immutable One is Brahman ; his becoming [the individual self] is said to be *adhyátma* (the embodied self). The offering [of self or things] which causes the origination of created things is called *karma* (action).*

---

* All the commentators I have consulted seem to miss the real significance of the author's explanation of *karma* here. They all take it in the secondary sense of *yajna*, whereas primarily it seems to signify that eternal act of self-sacrifice by which the Creator, as stated in the *Purusha Sukta* and other Vedic passages, creates the world. *That* is the type and model of all other sacrifices, sacrifices in the secondary sense.

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥४॥

४ । 'क्षरः भावः' विनश्वरः देहादिपदार्थः अधिभूतम्, भूतम् प्राणिमात्रम् अधिकृत्य भवति इति [उच्यते] ; 'पुरुषः' प्रथमः शरीरी हिरण्यगर्भः सर्व्व-देवतानाम् अधिपतिः 'अधिदैवतम्' [उच्यते] । हे 'देहभृताम् वरः,' शरीर-धारिणां मध्ये श्रेष्ठ अर्ज्जुन, 'अहम् एव अत्र [देहे स्थितः] 'अधियज्ञः' देहधारणादि-सर्व्वयज्ञानाम् अधिपतिः ।

4, Perishable things [are called] *adhibhùtam* ; the Person (*i. e.* the first embodied being, Hiranya-garbha, the chief of all deities) is *adhidaivatam*. O chief of embodied beings (Arjuna), I myself am the *Adhiyajna* (*i. e.* the director of all sacrifices) [seated] in this [body].

अन्तकाले च मामेव स्मरन् मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥५॥

५ । 'अन्तकाले च माम् एव' 'स्मरण्' चिन्तयन् 'कलेवरं' 'मुक्त्वा' त्यक्त्वा 'यः' 'प्रयाति' परलोकं गच्छति, 'सः' 'मद्भावं' मद्रूपतां 'याति' प्राप्नोति, 'अत्र न संशयः अस्ति' ।

5. And, at the time of death, he who leaves his body and departs, with his thoughts fixed in me alone, assumes my nature. There is no doubt about it.

यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥६॥

६। हे 'कौन्तेय,' 'जन्तुः' मरणकाले 'यं यं' 'भावं' पदार्थं 'स्मरन्' [जीवः] 'कलेवरं त्यजति,' [सः] 'सदा' 'तद्भावभावितः' 'तत्भावनया पूरितचित्तः, प्रभावितमनाः, [सन्] 'तं तं भावम् एव' तत् तत् वस्तुरूपम् एव 'एति' प्राप्नोति।

6. O son of Kuntí, at the time of death, whatever object one thinks of when leaving his body, [he , with his mind pervaded by the thought of that object, assumes [the form of] that object.

तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयम्॥७॥

७। 'तस्मात् सर्व्वेषु कालेषु माम्' 'अनुस्मर' चिन्तय 'युध्य च' [तथा मदनुस्मरण-दृष्टान्तरूपेण ममाज्ञया] युध्यस्व। 'मयि अर्पितमनोबुद्धिः' [सन् त्वम्] 'माम् एव' मद्भावम् एव, न भावान्तरम् 'एष्यसि' प्राप्स्यसि ; 'असंशयः' अत्र संशयः नास्ति।

7. Therefore think of me at all times, and [as an example of your constant thought of me] fight [in obedience to me]. With your thought and understanding fixed in me, you will undoubtedly attain to my nature alone [and not any other].

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन्॥८॥

८। हे 'पार्थ,' 'अभ्यासयोगयुक्तेन' 'अभ्यासः सजातीयप्रत्ययप्रवाहः,

सः एव योगः उपायः, तेन युक्तेन संयतेन, एकाग्रेण इत्यर्थः, 'नान्यगामिना' अनन्यविषयगामिना 'चेतसा' चित्तेन 'दिव्यं परमं पुरुषम् अनुचिन्तयन्' [साधकः तम् एव] 'याति' प्राप्नोति ।

8. O son of Prithá, contemplating [him] with a mind steadied by *abhyásayoga*, (*i. e.* repeated thought of the same object) and not thinking of any other object, one reaches the supreme divine Person.

कविं पुराणमनुशासितार-
मणोरणीयांसमनुस्मरेद् यः ।
सर्वस्य धातारमचिन्त्यरूप-
मादित्यवर्णं तमसः परस्तात् ॥९॥
प्रयाणकाले मनसाचलेन
भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्
स तं परं पुरुषमुपैति दिव्यम् ॥१०॥

९, १० । 'कविं' सर्व्वज्ञं, 'पुराणं' चिरन्तनम्, 'अनुशासितारं' नियन्तारम्, 'अणोः' सूक्ष्मात् अपि 'अणीयांसं' सूक्ष्मतरं, 'सर्व्वस्य' 'धातारं' पोषकम्, 'अचिन्त्यरूपम्' 'आदित्यवर्णम्' आदित्यवत् स्व-पर-स्वरूप-प्रकाशकः वर्णः स्वरूपं यस्य तं, 'तमसः परस्तात्' मोहान्धकारातीतं 'यः प्रयाणकाले अचलेन मनसा, भक्त्या योगबलेन च एव युक्तः' [सन्] 'भ्रुवः मध्ये प्राणं सम्यक् आवेश्य' तत्र प्राणक्रियाभ्याससहकारेण परमपुरुषचिन्तापरायणः सन्, इति (उपाध्यायकृत-व्याख्यासारः), 'अनुस्मरेत्,' 'सः तं दिव्यं पुरुषम्' 'उपैति' प्राप्नोति । श्वेताश्वतरोपनिषत् ३।८ द्रष्टव्या ।

9,10. He who, with a steadied mind, [being] endowed with reverence and force of *yoga*, and placing his vital breath fully between his eye-brows (*i. e.* realising the presence of God at that spot in the course of his breathing), contemplates at the time of death the omniscient and eternalOne, the All-ruler, subtler than the subtle, the Supporter of all, of the nature of the sun (*i. e.* revealing himself and other things) and beyond the darkness [of ignorance], attains that supreme and divine Person.

यदक्षरं वेदविदो वदन्ति
विशन्ति यद् यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण प्रवक्ष्ये ॥११।

११। 'यत्' 'ब्रह्मविदः' वेदज्ञाः 'अक्षरं वदन्ति' एतद् वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति" इति बृहदारण्यकोपनिषदि (३।८।८), 'यत्' 'वीतरागाः' विगततृष्णाः 'यतयः' साधकाः 'विशन्ति' प्रविशन्ति, 'यत्' [प्राप्तुम्] 'इच्छन्तः [ब्रह्मचारिणः] ब्रह्मचर्यं चरन्ति,' 'तत्' 'पदं' पद्यते गम्यते इति, प्राप्यं प्राप्तुपायं 'ते' तुभ्यं 'संग्रहेण' संक्षेपेण 'प्रवक्ष्ये' कथयिष्यामि। कठोपनिषत् १।२।१५ द्रष्टव्या ।

11. That which the knowers of the Vedas call 'the Immutable', which aspirants free from desire enter into, desiring [to attain] which [initiates] practise *brahmacharya* (*i. e.* continence and other austerities) that Goal (*i. e.* the way to that) I will tell you in brief.

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥१२॥
ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥१३॥

१२, १३ । 'सर्व्वद्वाराणि' सर्व्वेन्द्रियाणि 'संयम्य' स्वस्व विषयेभ्यः प्रत्याहृत्य, 'मनः' 'हृदि' हृदिप्रकाशिते आत्मनि 'निरुध्य,' 'आत्मनः' स्वस्य 'प्राणम्' 'मूर्द्धि' "भ्रुवःमध्ये तदुपरि च" मधुसूदनः—'आधाय' स्थापयित्वा, 'योगधारणाम्' 'आस्थितः' आश्रितवान् सन्, 'ओम्' इति 'ब्रह्म' ब्रह्मवाचकम् 'एकाक्षरम्' 'व्याहरन्, उच्चारयन्, [तद्वाच्यं च] 'माम्' 'अनुस्मरन्, 'यः देहं त्यजन् प्रयाति सः परमां गतिं याति' । कठोपनिषत् १।२।१५,१६ द्रष्टव्या ।

12,13. He who, closing all the gates [of external knowledge], confining the mind to the heart (*i. e.* to the self manifest in the heart), placing his vital breath in the head, attaining the *yogic* concentration, repeating the single syllable 'Om', which represents the Absolute, and contemplating me [along with the repetition], leaves his body and goes to the other world, reaches the supreme goal.

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥१४॥

१४ । हे 'पार्थ, यः अनन्यचेताः [सन्] नित्यशः मां स्मरति, अहं तस्य नित्ययुक्तस्य योगिनः सुलभः [अस्मि] ।

14. O son of Prithá, I am easily attainable by the ever-steadied *yogin* who constantly thinks of me with a heart not given to any other object.

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥१५॥

१५। 'माम् उपेत्य [अतः च] परमां संसिद्धिम् गताः महात्मानः दुःखालयम्' 'अशाश्वतम्' अनित्यं 'पुनर्ज्जन्म न प्राप्नुवन्ति'।

15. Having reached me [and thus] acquired the highest perfection, these great souls do not attain re-birth, which is the source of misery and which is not everlasting.

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥१६॥

१६। हे 'अर्ज्जुन,' 'आब्रह्मभुवनात्' अपरब्रह्मलोकम् आरभ्य सर्व्वेभ्यः लोकेभ्यः 'लोकाः' जनाः 'पुनरावर्त्तिनः' पुनर्जन्मागताः [भवन्ति]। किम्वा "सह ब्रह्मभुवनेन लोकाः सर्व्वे पुनरावर्त्तिनः पुनरावर्त्तनस्वभावाः" इति शङ्करः। "ब्रह्मलोकस्यापि विनाशित्वात्" इति श्रीधरः। हे 'कौन्तेय, माम् उपेत्य तु पुनर्जन्म न विद्यते'।

16. O Arjuna, from all worlds beginning from the world of [the lower] Brahman, people return (*i. e.* come back to embodied life. * Or, as Sankara says, all worlds, with the world of Brahman, are subject to change). But, O son of Kuntí, for those who reach me there is no re-birth.

---

* We have not yet met with any Upanishadic text in support of this doctrine, even if 'Brahmabhuvana' be made to mean

सहस्रयुगपर्यन्तमहर्यद् ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥१७॥

१७ । 'सहस्रयुगपर्य्यन्तम्' सहस्रयुगपरिमाणं 'ब्रह्मणः' प्रजापतेः यत् अहः [तत् अहः, तथा] 'सहस्रयुगपर्य्यन्तां' तत्परिमाणां 'रात्रिं' [ये] 'विदुः' जानन्ति, 'ते' [एव] 'अहोरात्रविदः जनाः' ।

17. Those who know [the lower] Brahman's day as consisting of a thousand epochs and his night as of the same length, are really knowers of day and night.

अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे ।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥१८॥

१८ । 'अहरागमे' ब्रह्मणः दिवसस्य उपक्रमे 'अव्यक्तात्' ईश्वरशक्त्याः 'सर्व्वाः' 'व्यक्तयः' चराचराणि भूतानि 'प्रभवन्ति' प्रादुर्भवन्ति । 'रात्र्यागमे' [ताः सर्व्वाः] 'तत्र' 'अव्यक्तसंज्ञके' अव्यक्तनाम्न्यां परमेशशक्तौ 'एव प्रलीयन्ते'।

18. On the dawning of [Brahman's] day all manifestations (*i. e.* created objects) come forth from the unmanifested (*i. e.* the creative power of God). On the approach of [Brahman's] night they are merged in the same [power] called the unmanifested.

'the world of the lower Brahman. The last words of the *Chhándogya*, '*Na cha purnar ávartate*', as also those of the *Brahma Sútras*, '*Anávrittih sabdát*', are clearly against it. (Cf. Introduction.)

भूतग्राम: स एवायं भूत्वा भूत्वा प्रलीयते ।
रात्र्यागमेऽवश: पार्थ प्रभवत्यहरागमे ॥१८॥

१९ । हे 'पार्थ,' [य: पूर्व्वस्मिन् कल्पे आसीत्] 'स: एव' 'भूतग्राम:' प्राणिसमूह: 'अवश:' कर्म्मपरतन्त्र: [सन्] 'अहरागमे प्रभवति,' [तथा] 'भूत्वा भूत्वा' पुन: पुन: आविर्भूत: सन् 'रात्र्यागमे प्रलीयते' ।

19. O son of Prithá, the same assemblage of creatures [that existed in the previous cycle] are born on the coming of [the cosmic] day under the law of *karma* (*i. e.* the effect of their past deeds) and appearing again and again, are merged on the approach of [the cosmic] night.

परस्तस्मात्तु भावोऽन्योऽव्यक्तो ऽव्यक्तात् सनातन: ।
य: स सर्व्वेषु भूतेषु नश्यत्सु न विनश्यति ॥२०॥

२० । 'तु' पक्षान्तरे, 'तस्मात्' पूर्व्वोक्तात् 'अव्यक्तात् पर:' 'अन्य:' तद्विलक्षण: 'य:' 'सनातन:' अनादि: 'अव्यक्त:' अतीन्द्रिय: 'भाव:' सत्पदार्थ: [अस्ति], 'स: सर्व्वेषु भूतेषु नश्यत्सु [अपि] न विनश्यति' ।

20. On the other hand, that supersensible and eternal Reality, higher than and distinct from the unmanifested [already mentioned], does not perish even when all creatures are destroyed.

अव्यक्तोऽक्षर इत्युक्तस्तमाहु: परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥२१॥

२१ । [स:]' अव्यक्त: अक्षर: इति उक्त:,' [ज्ञानिन:] 'तं परमां गतिम्

आहुः' 'एषाऽस्य परमा गतिः" इति बृहदारण्यकादिश्रुतेः (बृह: ४।३।३२), 'यं प्राप्य' [साधकाः] 'न निवर्त्तन्ते' न पुनः संसारगतिं प्राप्नुवन्ति । 'तत् [एव] मम परमं धाम' "स वेदैतत् परमं ब्रह्मधाम" इति मुण्डकश्रुतेः (३।२।१) ।

21. That unmanifested One is called the Immutable ; [the wise] call him the supreme Goal, having reached whom [aspirants] do not return [to worldly life]. That is my highest abode.

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥२२॥

२२ । हे 'पार्थ, सः परः पुरुषः, भूतानि यस्य' 'अन्तःस्थानि' अन्तर्वर्त्तीनि, 'येन [च] इदं सर्व्वं' 'ततं' व्याप्तं', 'अनन्यया' एकान्तया 'भक्त्या [एव] लभ्यः' ।

22. O son of Prithá, that supreme Person, in whom all things are comprehended, and by whom all this is pervaded, is to be attained [only] by undivided devotion.

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥२३॥

२३ । हे 'भरतर्षभ, यत्र काले तु योगिनः' 'प्रयाताः' मृताः 'अनावृत्तिम्' अपुनर्जन्म 'यान्ति,' [यत्र काले तु प्रयाताः] 'आवृत्तिं' पुनर्जन्म [यान्ति] 'तं कालं वक्ष्यामि' । "कालशब्देन कालाभिमानिनीभिः आतिवाहिकीभिः देवताभिः प्राप्यौ मार्गौ उपलक्ष्येते" इति श्रीधरः ।

23. O chief of the descendants of Bharata, I will now tell you of the times in which, when dead, *yogins* attain [respectively) to non-return (*i. e:* the cessation of re-birth) and return (*i. e.* re-birth). [According to the commentators the term *kála*, time, in the text indicates the path to be followed under the lead of the deities presiding over time.]

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥२४॥

२४। 'अग्निः, ज्योतिः, अहः,' 'शुक्लः शुक्लपक्षः, 'षण्मासाः उत्तरायणम्' उत्तरायणरूपाः षण्मासाः,—[एतैः उपलक्षितः यः मार्गः] 'तत्र प्रयाताः ब्रह्मविदः जनाः ब्रह्म गच्छन्ति'। अग्निरादयः सर्व्व एव तत्तदभिमानिन्यो देवताः, इति शङ्करादिभिर्व्याख्याताः। छान्दोग्योपनिषदः पञ्चमाध्याये दशमः खण्डः द्रष्टव्यः।

24. Fire, light, day time, the bright fortnight, and the six months called the northern path [of the sun].—knowers of Brahman dying at this time [*i. e.* according to the commentators, following the path indicated by these objects, all of which symbolise their presiding deites] reach Brahman.

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥२५॥

२५। 'धूमः रात्रिः, तथा' 'कृष्णः' कृष्णपक्षः, 'षण्मासाः दक्षिणायणम्,'

दक्षिणायनरूपा: षण्मासा:,—[एतै उपलक्षित: य: मार्ग:] 'तत्र' [प्रयात:] 'योगी' कर्मयोगी 'चान्द्रमसं ज्योति:' तदुपलक्षितं स्वर्गलोकं 'प्राप्य' 'निवर्त्तते' पुनर्जन्म प्राप्नोति।

25. Smoke, night, the dark fortnight, and the six months called the southern path [of the sun],—the *yogin* (*i. e.* the *karma-yogin*, follower of the Vedic ceremonial religion), [dying] at this time, (*i. e.* following the path led by the deities symbolised by these objects) reaches the lunar light (*i. e.* the heaven symbolised by it) [and then] returns [to the world].

शुक्लकृष्णे गती ह्येते जगत: शाश्वते मते।
एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुन: ॥२६॥

२६। 'शुक्लकृष्णे' शुक्ला च कृष्णा च, ज्ञानमयत्वात् शुक्ला तदभावात् कृष्णा, 'एते हि गती' एतौ मार्गौ 'जगत: शाश्वते' [गती] 'मते' अभिप्रेते। [तयो:] 'एकया' शुक्लया [साधक:] 'अनावृत्तिं याति', 'अन्यया' कृष्णया 'पुन: आवर्त्तते'।

26. These two ways, the bright and the dark, are regarded as the everlasting [ways] of the [created] world. By the one [the aspirant] obtains cessation of birth, and by the other [he] returns [to embodied existence.]

नैते सृती पार्थ जानन् योगी मुह्यति कश्चन।
तस्मात् सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥२७॥

२७। 'हे 'पार्थ, 'एते सृती' एतौ मार्गौ 'जानन् क:चन' 'योगी' 'न

मुह्यति' न मोहं प्राप्नोति। 'तस्मात्, [हे] अर्ज्जुन, सर्व्वेषु कालेषु योगयुक्तः भव'।

27. O son of Prithá, having known these two paths, no *yogin* is [ever] deluded. Therefore, O Arjuna, be in the state of *yoga* at all times.

वेदेषु यज्ञेषु तपःसु चैव
दानेषु यत् पुण्यफलं प्रदिष्टम्।
अत्येति तत् सर्वमिदं विदित्वा
योगी परं स्थानमुपैति चाद्यम् ॥२८॥

२८। 'वेदेषु, यज्ञेषु, तपःसु, दानेषु च एव यत् पुण्यफलं' 'प्रदिष्टम्' अङ्गीकृतम्, [मया उक्तम्] इदं सर्व्वं विदित्वा योगी तत् सर्व्वम् 'अत्येति' अतिक्रामति, 'परम्' 'आद्यं' जगन्मूलभूतं 'स्थानं' ब्रह्मपदम् 'च उपैति'।

28. Knowing this, the *yogin* obtains more than all the fruits of meritorious deeds that have been promised for the [study of the] Vedas, [all] sacrifices, austerities and charities, and attains to the supreme, primeval place.

आध्यात्मयोगो नाम नवमोऽध्यायः

———:*:———

श्रीभगवान् उवाच

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥१॥

१। [श्रीभगवान् उवाच,—अहं] 'अनसूयवे' दोषदृष्टिरहिताय 'ते' तुभ्यम् 'इदं गुह्यतमं ज्ञानं विज्ञानसहितं प्रवक्ष्यामि, यत् ज्ञात्वा [त्वम्] अशुभात् मोक्ष्यसे। ७।२ टीका द्रष्टव्या।

1. [The Lord said,—] To you, who are devoid of fault-finding, I will impart this most hidden [scriptural] truth accompanied with direct consciousness, by knowing which you will be freed from evil.

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥२॥

२। 'इदं' [ज्ञानं] 'राजविद्या' विद्यानां राजा, 'राजगुह्यं' रहस्यानां राजा, 'पवित्रम्' 'उत्तमं' अत्यन्तपावनं, उत्कृष्टम्, 'प्रत्यक्षावगमं' साक्षात् अनुभवसिद्धं, दृष्टफलं वा, 'धर्म्यं' धर्मात् अनपेतं 'सुसुखं कर्तुम्' अनायासेन साधयितुं शक्यम् [तथा] 'अव्ययम्' अक्षयफलम्। 'राजविद्या राजगुह्यं "राज्ञां विद्या

राज्ञां गुह्यम् इति वा" इति श्रीधरः। "राज्ञां विद्या राज्ञां गुह्यमिति समासे त्वविद्याद् ब्रह्मविद्याधिगतेति मन्यते" इति उपाध्यायः।

2. This [truth] is the chief of sciences, the chief of secret doctrines, most purifying, directly realisable, unopposed to righteousness, very easy to be practised, and of undying effect.

अश्रद्दधानाः पुरुषा धर्म्मस्यास्य परन्तप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥३॥

३। हे 'परन्तप, 'अस्य धर्म्मस्य' अस्मिन् धर्म्मे 'अश्रद्दधानाः' आस्थारहिताः 'पुरुषाः माम् अप्राप्य' 'मृत्युसंसारवर्त्मनि' मृत्युव्याप्ते संसार-मार्गे 'निवर्त्तन्ते' परिभ्रमन्ति।

3. O harasser of foes, men having no faith in this doctrine fail to reach me, and wander in the world pervaded by death.

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥४॥

४। 'अव्यक्तमूर्त्तिना' अतीन्द्रिय-स्वरूपेण 'मया' 'इदं सर्व्वं जगत्' 'ततं' व्याप्तम्। 'सर्व्वभूतानि' 'मत्स्थानि' मयि स्थितानि, 'न च अहं तेषु अवस्थितः'। सप्तमाध्याये द्वादशतमः श्लोकः द्रष्टव्यः।

4. All this world is pervaded by me, whose nature is beyond the senses. All things rest in me, but I do not rest in them.

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥५॥

५। [लौकिकार्थे] 'न च भूतानि मत्स्थानि,' 'मे' मम 'ऐश्वरम्' अलौकिकं 'योगम्' अघटन-घटन-चातुर्य्यं 'पश्य'—'मम' 'आत्मा' परं स्वरूपं 'भूतभृत्' भूतानां धारयिता, 'भूतभावनः' भूतानां पालयिता, 'न च' भूतस्थः भूतसंश्लिष्टः ।

5. [In the usual sense] things do not rest in me ; behold my inscrutable power,—my self (*i. e.* essence) upholds and maintains things, but does not rest in (*i. e.* is not mixed up with) them.

यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥६॥

६। 'यथा नित्यम् आकाशस्थितः महान् वायुः' 'सर्व्वत्रगः' [अपि] निरवयवम् आकाशं न स्पृशति, 'तथा सर्व्वाणि भूतानि मत्स्थानि इति' 'उपधारय' बुद्ध्यस्व ।

6. As the great wind which rests in ether and goes everywhere [but does not touch the formless nature of ether], so do things, you should realise, rest in me [but do not touch my transcendent nature.]

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥७॥

७। हे 'कौन्तेय', 'कल्पक्षये' कल्पान्ते, प्रलयकाले, 'सर्व्वभूतानि' 'मामिकां'

मदीयां 'प्रकृतिम्' (अपरां शक्तिं, ७।४,५) 'यान्ति,' 'कल्पादौ' सृष्टिकाले अहं तानि पुनः विसृजामि ।

7. O son of Kuntí, at the end of a cycle all things return to my [lower] nature; at the beginning of [every] cycle I create them again.

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥८॥

८। 'प्रकृतेः वशात्' प्राचीनकर्म्मनिमित्त-तत्तत्-स्वभाववशात् 'अवशम्' अस्वतन्त्रम् 'इमं' 'भूतग्रामम्' प्राणिसमूहम् [अहं] 'स्वां' स्वीयां 'प्रकृतिम्' 'अवष्टभ्य' अधिष्ठाय 'पुनः पुनः विसृजामि ।

8. With the instrumentality of my [lower] nature I create again and again this assemblage of creatures, devoid of freedom, being subject to [their respective] natures [moulded by previous deeds].

न च मां तानि कर्म्माणि निबध्नन्ति धनञ्जय ।
उदासीनवदासीनमसक्तं तेषु कर्म्मसु ॥९॥

९। हे 'धनञ्जय,' 'तेषु' विश्वसृष्ट्यादिषु 'कर्म्मसु' 'असक्तं' आसक्तिरहितम् 'उदासीनवत्' आसीनं मां तानि कर्म्माणि न निबध्नन्ति ।

9. O Dhananjaya, those actions do not bind me, who, unattached to them, remain as one unconcerned.

मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्त्तते ॥१०॥

१०। 'अध्यक्षेण' अधिष्ठात्रा 'मया' [चालिता सती] 'प्रकृतिः सचराचरं [विश्वं]' 'सूयते' जनयति। हे 'कौन्तेय,' 'अनेन' मदधिष्ठानेन 'हेतुना जगत्' 'विपरिवर्त्तते' पुनः पुनः जायते (श्रीधरः), विविधावस्थां भजते (उपाध्यायः)।

10. [Led] by me as Supervisor, Nature produces the world containing movable and immovable things. O son of Kuntí, because of this [my supervision] the world arises again and again (or, assumes various forms.)

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥११॥

११। 'मम' 'भूतमहेश्वरं' भूतानां महान्तं नियन्तृरूपं परं भावम् 'अजानन्तः मूढाः मानुषीं तनुमाश्रितं माम्' 'अवजानन्ति' अवमन्यन्ते ।

11. Fools, not knowing my higher nature as the great Ruler of creatures, disregard me as assuming the human form.

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥१२॥

१२। [एते] 'विचेतसः' विक्षिप्तचित्ताः जनाः 'मोहिनीं' बुद्धिभ्रंशकरीं

'राक्षसीं' हिंसादिप्रचुराम् 'आसुरीं' कामदर्पादिबहुलां 'प्रकृतिं' 'श्रिताः' आश्रिताः 'मोघाशाः' निष्फलाशाः 'मोघकर्माणः' निष्फलकर्माणः मोघज्ञानाः' निष्फलज्ञानाः [च भवन्ति] ।

12. Vain are the hopes, deeds and learning of these people of distracted minds, who have assumed the deluding nature of Rákshasas (man-eating giants) and Asuras (demons).

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥१३॥

१३ । हे 'पार्थ,' 'दैवीं प्रकृतिम् आश्रिताः महात्मनः तु मां' 'अव्ययं' 'भूतादिं' जगत्कारणं 'ज्ञात्वा अनन्यमनसः भजन्ति' । दैवासुरसम्पत्तिविभागः षोडशाध्याये व्याख्यातः ।

13. On the other hand, O son of Prithá, high-souled persons, endowed with the divine nature, know me as the immutable cause of the world and worship me with undivided hearts.

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥१४॥

१४ । [ते] दृढव्रताः नित्ययुक्ताः च यतन्तः मां सततं कीर्तयन्तः भक्त्या नमस्यन्तः च माम् उपासते ।

14. These aspirants, of firm determination, ever

steadied in mind, worship me by constantly singing my praises and bowing down to me with reverence.

ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥१५॥

१५। 'अन्ये च अपि मां ज्ञानयज्ञेन' 'यजन्तः' पूजयन्तः 'उपासते'। 'विश्वतः मुखं' विश्वतः सर्व्वतः मुखम् आननं यस्य तं सर्व्वात्मकं 'मां' [केचित्] 'एकत्वेन' अभेदभावनया, [केचित्] 'पृथक्त्वेन' जीव-परमयोर्भेदभावनया [केचित् वा] बहुधा' बहुवस्तुरूपेण बहुदेवरूपेण वा [उपासते] ।

15. Others again worship me by offering the sacrifice consisting in knowledge. [Some worship] me, who am the essence of all, as [absolutely] one, [some] as different [from them] and some as multiform.

अहं क्रतुरहं यज्ञः स्वधाऽहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥१६॥

१६। सर्व्वात्मकतां प्रपञ्चयति अहं क्रतुरिति चतुर्भिः (श्रीधर :) । 'अहं' 'क्रतुः' श्रौतः अग्निष्टोमादिः, 'अहं' यज्ञः' 'स्मार्त्तः पञ्चयज्ञादिः, 'अहं' 'स्वधा' पित्रर्थं श्राद्धादिः, [तथा] 'औषधं' औषधिसम्भवम् अन्नम् भेषजं वा । 'अहं मन्त्रः,' 'अहम् एव' 'आज्यम्' हविः, घृतम्, 'अहम् अग्निः, अहं' [च] 'हुतं' होमः ।

16. I am the *kratu* (Vedic sacrifice), I am the *yajna* (the sacrifice prescribed in the law books), I am *svadhá* (the offering made to dead ancestors), I am vegetable food or medicine, I am *mantra* (Vedic text),

I am [the saorificial] butter, [the sacrificial] fire, and the act of offering.

पिताहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोङ्कार ऋक् साम यजुरेव च ॥१७॥
गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥१८॥

१७,१८। 'अहम् अस्य जगतः पिता, माता, धाता, पितामहः, पवित्रं वेद्यं, ओंकारः, ऋक्, साम, यजुः एव च। [अहं] गतिः, भर्त्ता, प्रभुः, साक्षी, निवासः, शरणं, सुहृत्, प्रभवः, प्रलयः, स्थानं,' 'निधानं' धनम् 'अव्ययं बीजं [च]'।

17, 18. I am the Father, Mother, Preserver, and Grandfather of this universe. [I am] the sacred Object to be known, [the sacred syllable] 'Om,' and [the Vedas,—] *Rik*, *Sáman*, and *Yajus*. [I am] the Goal, the Maintainer, the Lord, the Witness, the Abode, the Refuge, the Friend, the Source, the [cause of] dissolution, the [resting] Place, the Treasure, and the imperisable Seed [of all things.]

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥१९॥

१९। हे 'अर्ज्जुन,' 'अहं' 'तपामि', तापं करोमि, 'अहं' 'वर्षं' वृष्टिरूपं रसम् 'निगृह्णामि' आकर्षामि, 'उत्सृजामि' प्रक्षिपामि 'च'। 'अहम् अमृतं च एव मृत्युः च,' 'सत्' स्थूलम्, 'असत्' सूक्ष्मं 'च'।

19. O Arjuna, I give forth heat, I draw and send forth rain. I am death and immortality, and I am the gross and the subtle.

त्रैविद्या मां सोमपाः पूतपापा
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोक-
मश्नन्ति दिव्यान् दिवि देवभोगान् ॥२०॥

२० । 'त्रैविद्याः' वेदत्रयोक्तकर्म्मपराः 'सोमपाः' सोमपायिनः 'पूतपापाः' शोधितकल्मषाः [सन्तः] 'मां यज्ञैः' इष्ट्वा' पूजयित्वा 'स्वर्गतिं' स्वर्गगमनं 'प्रार्थयन्ते'। 'ते' 'पुण्यं' पुण्यफलरूपं 'सुरेन्द्रलोकम्' इन्द्रलोकम् 'आसाद्य' प्राप्य 'दिवि' स्वर्गे 'दिव्यान्' उत्तमान् 'देवभोगान्' 'अश्नन्ति' भुञ्जते ।

20. The followers of the teachings of the three [Vedas], the drinkers of the *Soma* juice, being purged of their sins, worship me [in the form of Vedic gods] and pray for going to heaven. Reaching the world of [Indra] the lord of the gods as the reward of their pious deeds, they enjoy in heaven the excellent pleasures of the gods.

ते तं भुक्त्वा स्वर्गलोकं विशालम्
क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्ममनुप्रपन्ना
गतागतं कामकामा लभन्ते ॥२१॥

२१ । 'ते तं विशालं स्वर्गलोकं भुक्त्वा [भोगप्रापके] पुण्ये क्षीणे [सति]

मर्त्त्यलोकं विशन्ति'। 'कामकामाः' भोगाभिलाषिणः 'त्रयीधर्म्ममनुप्रपन्नाः' वेदत्रयविहित-धर्म्मानुगताः [जनाः] 'एवं' 'गतागतं' गमनागमनं 'लभन्ते'।

21. Having enjoyed the great heavenly regions, they, when the merit [which gained these regions for them] is exhausted, re-enter the world of mortals. Those who, desirous of pleasures, follow the religion of the three Vedas thus earn going and coming [as their reward].

अनन्याश्चिन्तयन्तो मां ये जनाः पर्य्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥२२॥

२२। 'ये जनाः अनन्याः [सन्तः] मां चिन्तयन्तः मां' 'पर्य्युपासते', भजन्ति 'अहं तेषां' 'नित्याभियुक्तानां' सततं मन्निष्ठानां 'योगक्षेमं' धनादिलाभं तत्-रक्षणं च 'वहामि' प्रापयामि।

22. Those who worship me by meditating on me with an undivided heart,—for them, who are ever devoted to me, I secure both the acquisition and preservation of their requirements.

येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयाऽन्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्व्वकम् ॥२३॥

२३। हे 'कौन्तेय ये अपि' 'भक्ताः' श्रद्धया अन्विताः [सन्तः] अन्यदेवताः यजन्ते, ते अपि माम् एव' 'अविधिपूर्व्वकं' मोक्षप्रापकं विधिं विना 'यजन्ति'।

23. O son of Kuntí, even those pious men who

worship other deities with faith, virtually worship me [though] irregularly (i. e. not accroding to the method which secures liberation).

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥२४॥

२४ । 'अहं हि' अहम् एव 'सर्व्वयज्ञानां भोक्ता च' 'प्रभुः' फलदाता 'एव च' । 'तु' किन्तु 'ते माम्' 'तत्त्वेन' यथावत् 'न अभिजानन्ति,' 'अतः' 'च्यवन्ति' पतन्ति, संसारे पुनरावर्त्तन्ते ।

24. I alone am the recipient of all sacrifices and the giver of their fruits. But they know me not as I really am, and so they fall (i. e. return to the world.)

यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥२५॥

२५ । 'देवव्रताः देवान् यान्ति, पितृव्रताः पितॄन् यान्ति,' 'भूतेज्याः' विनायक-मातृगणादिषु इज्या पूजा येषां ते 'भूतानि यान्ति', 'मद्याजिनः' मदुपासकाः 'अपि' च 'मां यान्ति' ।

25. Those who are devoted to the gods reach the gods ; those devoted to the manes reach the manes ; those who worship the elemental spirits reach the same, and those who worship me reach me.

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥२६॥

२६। 'यः' 'मे' मह्यं 'भक्त्या पत्रं पुष्पं फलं तोयं' 'प्रयच्छति' ददाति, [तस्य] 'प्रयतात्मनः' शुद्धचित्तस्य 'भक्त्या' 'उपहृतं' समर्पितं 'तत्' पत्रादिकम् 'अहम्' 'अश्नामि' प्रीत्या गृह्णामि, तत्सूचितभक्तिमात्रेण मे प्रीतिः स्यात्, न बाह्यवस्तुना, इति भावः ।

26. He who offers me with reverence a leaf, a flower, a fruit, or water, from [such] a pure-hearted man I accept this offering made with reverence.

यत् करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम् ॥२७॥

२७। हे 'कौन्तेय,' 'यत् करोषि,' 'यत्' 'अश्नासि' खादसि, 'यत्' 'जुहोषि' हवनं निर्वर्त्तयसि, 'यत् ददासि', 'यत् तपस्यसि' तपः चरसि 'तत्' [सर्वं] 'मदर्पणं' मयि अर्पितं यथा स्यात् तथा 'कुरुष्व' ।

27. O son of Kuntí, whatever you do, whatever you eat, whatever sacrifice you offer, whatever alms you give, whatever austerities you practise, do all this as an offering to me. (Cf. St. Paul's first Epistle to the Corinthians, X. 31.).

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥२८॥

२८। 'एवं' [कुर्व्वन् त्वं] 'कर्म्मबन्धनैः' कर्म्मबन्धनकारकैः 'शुभाशुभफलैः'

'मोक्ष्यसे' [तथा] 'संन्यासयोगयुक्तात्मा' मयि कर्म्मसमर्पणरूपयोगेन शुद्धचित्तः [तथा] 'विमुक्तः' [सन्] 'माम्' 'उपैष्यसि' प्राप्स्यसि ।

28. [By doing] so you will be freed from the good and evil fruits which bind one to actions, and with your heart purified by the *yoga* of renunciation, you will be liberated and will reach me.

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥२९॥

२९। 'अहं सर्व्वभूतेषु' 'समः' तुल्यभावापन्नः ; 'न मे द्वेष्यः' 'न' [विशेषतः] 'प्रियः' [कश्चित्] अस्ति । 'ये तु मां भक्त्या भजन्ति, ते मयि' [वर्त्तन्ते] 'तेषु च अपि अहं' [वर्त्ते] ।

29. I am the same to all created beings ; there is no one hateful or [specially] dear to me. But they who worship me with reverence are in me and I am in them. (Cf. S. John, xiv. 20. and xvii. 21.)

अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥३०॥

३०। 'सुदुराचारः' अतीव कुत्सितकर्म्मा 'अपि' 'चेत्' यदि 'अनन्यभाक्' अनन्यभक्तः सन्, देवतान्तर-भजनम् अकुर्व्वन्, 'मां भजते, सः साधुः एव मन्तव्यः', 'हि' यतः 'सः' 'सम्यक् व्यवसितः' शुभचेष्टान्वितः ।

30. Even if a most sinful man worship me, and

not any other god, he must be reckoned a righteous man ; for his endeavour is right.

क्षिप्रं भवति धर्म्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥३१॥

३१। [एवम्बिधः जनः] 'क्षिप्रं' शीघ्रं 'धर्म्मात्मा' शुद्धचित्तः भवति, 'शश्वत् शान्तिं' शाश्वतीं नित्यां शान्तिम् उपशमं 'निगच्छति' प्राप्नोति। हे 'कौन्तेय' [सन्दिग्धचित्तानां पुरतः] 'प्रतिजानीहि' प्रतिज्ञापूर्व्वकं ब्रूहि [यत्] 'न मे भक्तः' 'प्रणश्यति' विनाशं गच्छति।

31. [Such a man] speedily becomes pure-hearted and attains everlasting peace. O son of Kuntí, say with assurance [to those who doubt] that my devotee never perishes.

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥३२॥

३२। हे 'पार्थ', 'ये अपि' 'पापयोनयः' 'पापजन्मानः, अवैधसंयोगजाः', [ते अपि] 'स्त्रियः' स्त्रीजात्यः न तु ब्रह्मवादिन्यः (उपाध्यायः), 'वैश्याः' कृष्यादिमात्ररताः (मधुसूदनः) न तु शास्त्रानुचिन्तकाः (उपाध्यायः) 'तथा' 'शूद्राः' नीचवृत्तिकाः न तु दासीगर्भज-नारदवत्-भगवद्गुण श्रवण-कीर्त्तन-निरताः (उपाध्यायः) 'ते अपि मां हि' 'व्यपाश्रित्य' आश्रयत्वेन गृहीत्वा 'परां गतिं यान्ति'।

32. O son of Prithá, taking refuge in me, even they who are of sinful birth, and also women, Vaisyas and Súdras, attain to the supreme goal.

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥३३॥

३३। 'किं पुनः' [वक्तव्यं यत्] 'पुण्याः' सदाचाराः 'ब्राह्मणाः, तथा भक्ताः राजर्षयः' [मां व्यपाश्रित्य परां गतिं यान्ति ? अतः त्वम्] 'इमम् अनित्यम् असुखं लोकं प्राप्य' अस्य अनित्यत्वम् असुखत्वं च अनुभूय: इत्यर्थः, [नित्यं सुखं च] 'मां भजस्व' ।

33. Is it necessary [to say that] righteous Brahmanas and pious royal sages [attain to the supreme goal by taking refuge in me] ? Having come to this transient and joyless world (*i. e.* having realised its transiency and joylessness) worship me [who am the eternal source of joy].

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥३४॥

३४। [त्वं] 'मन्मनाः, मद्भक्तः, मद्याजी [च] भव, माम् [एव च] नमस्कुरु'। 'एवम्' एभिः प्रकारैः 'आत्मानं' मनः 'युक्त्वा' समाहितं कृत्वा 'मत्परायणः' [सन्] 'माम् एव' 'एष्यसि' प्राप्स्यसि ।

34. Fix your mind in me ; be my devotee and worshipper ; and bow down to me. Steadying your mind by these means and making me your supreme aim, you will surely come to me.

विभूतियोगो नाम दशमोऽध्यायः

——— o:*:o ———

श्रीभगवान् उवाच

भूय एव महाबाहो शृणु मे परमं वचः।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥१॥

१। [श्रीभगवान् उवाच, हे] 'महाबाहो' 'भूयः एव' पुनरपि 'मे' मम 'परमं' प्रकृष्टं पूर्वोक्तादपि उत्कृष्टं 'वचः' वाक्यं 'शृणु', 'यत्' [वचः] 'प्रीयमाणाय' मद्वचनात् प्रेयसे प्रीतिमनुभवते 'ते' तुभ्यं 'अहं' 'हितकाम्यया' हितेच्छया इष्टप्राप्तीच्छया 'वक्ष्यामि' कथयिष्यामि।

1. [The Lord said—] O mighty-armed, hear again my excellent words, which, out of a desire for your well-being, I will tell you who are delighted [to hear] me.

न मे विदुः सुरगणाः प्रभवं न महर्षयः।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥२॥

२। 'सुरगणाः' देवाः 'मे' मम 'प्रभवं' उत्पत्तिं "'प्रभवं' प्रभावं प्रभुशक्त्यातिशयं प्रभवनं अनेकविभूतिभिः आविर्भावं वा" इति (मधुसूदनः) 'न' 'विदुः'

जानन्ति, 'महर्षयश्च' [मे प्रभवं] 'न' [विदुः], 'हि' यतः 'अहं देवानां महर्षीणां च' 'सर्व्वशः' सर्व्वैः प्रकारैः उत्पादकत्वेन बुद्धिप्रवर्त्तकत्वेन निमित्तत्वेन च 'आदिः' कारणम्, अतस्ते मत्प्रभवं न जानन्तीत्यर्थः।

2. The gods know not my origin, nor do the great sages (or seers of *mantras*) ; for I am the cause of all the gods and the great sages

यो मामजमनादिं च वेत्ति लोकमहेश्वरम्।
असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥३॥

३। 'यः' 'मां' 'अनादिं' न विद्यते आदिः कारणं यस्य तं आदिरहितं 'अजं' जन्मरहितं 'लोकमहेश्वरं' लोकानामधीशं 'च' 'वेत्ति' जानाति 'सः' 'मर्त्त्येषु' मनुष्येषु 'असंमूढः' संमोहवर्ज्जितः [सन्] 'सर्व्वपापैः' 'सर्व्वैः दुष्कृतैः' 'प्रमुच्यते' प्रकर्षेण मुक्तो भवति।

3. He who knows me as beginningless and unborn and as the great Lord of worlds, is liberated from all sins, being free from delusion among mortals.

बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः।
सुखं दुःखं भवोऽभावो भयं चाभयमेव च ॥४॥
अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥५॥

४,५। 'बुद्धिः' सूक्ष्मार्थविचारसामर्थ्यं सारासारविवेकनैपुण्यं, 'ज्ञानं' आत्मादिवस्तूनां अवबोधः, 'असंमोहः' कर्त्तव्येषु विवेकपूर्व्विका प्रवृत्तिः 'क्षमा'

सहिष्णुता, आक्रुष्टस्य ताडितस्य वा अविकृतचित्तता, 'सत्यं' यथायथभाषणं, 'दमः' बाह्येन्द्रियसंयमः, 'शमः' अन्तःकरणसंयमः, 'सुखं', 'दुःखं', 'भवः' उद्भवः जन्म, 'अभावः' नाशः, मृत्युः, 'भयं', 'अभयं' 'एव च', 'अहिंसा' परपीडनादिनिवृत्तिः, 'समता' समचित्तता, रागद्वेषादिशून्यता, आत्मौपम्येन सर्व्वत्र सुखदुःखादिदर्शनं, 'तुष्टिः' सन्तोषः, 'तपः' विधिसम्मतः शारीरक्लेशः, 'दानं' 'यशः' सत्कीर्त्तिः तन्निमित्ता लोकश्लाघा. 'अयशः' दुष्कीर्त्तिः तन्निमित्ता लोकनिन्दा, [एते] 'भूतानां' प्राणिनां 'पृथक्विधाः' भिन्नलक्षणाः 'भावाः' 'मत्तः' मत्सकाशात् परमेश्वरसंकल्पात् इत्यर्थः 'एव' 'भवन्ति' जायन्ते ।

4, 5. Understanding, knowledge, freedom from delusion, forgiveness, truth (*i. e.* truthfulness), control of the senses, restraint of the passions, pleasure, pain, birth, death, fear, and also fearlessness, harmlessness, equanimity, contentment, austerity, charity, fame and infamy—these different characteristics of created beings are from me.

महर्षयः सप्त पूर्व्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥६॥

६ । 'सप्त महर्षयः' भृगुप्रभृतयः, "भृगं मरीचिम् अत्रिञ्च पुलस्त्यं पुलहं क्रतं । वशिष्ठञ्च महातपाः सोऽसृजण्मनसा सुतान्" इति मधुसूदनधृतं पुराणवचनम् । [एतेभ्यः अपि] 'पूर्व्वे' अन्ये 'चत्वारः' सनकादयः [महर्षयः] "सनत्कुमारः सनकः सनन्दनः सनातन" इति 'तथा' 'मनवः' स्वायम्भुवादयः चतुर्द्दश * [एते] 'मद्भावाः' मदीया भावाः प्रभावा येषु ते मत्प्रभावयुक्ताः मद्गतभावनाः इति शङ्करः, 'मानसाः जाताः' हिरण्यगर्भात्मनः मम (परमेश्वरस्य)

* The names of the fourteen Manus in order are :—

मनसैव (मनसः सङ्कल्पमात्रादेव) उत्पादिताः यथा उत्पन्नाः इत्यर्थः, 'लोके' पृथिव्यां 'इमाः' [मनुष्याः] 'येषां' 'प्रजाः' सन्ततयः पुत्रपौत्रादिरूपेण इति भावः [भवन्ति]।

6. The seven great sages, the four preceding ones, and also the Manus (the fourteen successive progenitors of men or sovereigns of the earth), whose progeny these (people) in the world (*i. e.*, mankind) are, were imbued with my nature and born of my mind.

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः।
सोऽविकम्पेन योगेन युज्यते नात्र संशयः ॥७॥

७। 'यः' 'मम' 'एतां' प्रागुक्तां 'विभूतिं' विस्तारं सर्व्वात्मकत्वं विविधभावरूपेणावस्थितिं विविधार्थसम्पादन-सामर्थ्यं सर्व्वशक्तिमत्त्वं सर्व्वज्ञत्वं वा 'च' 'तत्त्वतः' याथार्थ्येन 'वेत्ति', 'सः' 'अविकम्पेन' अविचलितेन निःसंशयेन ['अविकल्पेन' इति वा पाठः] 'योगेन' समाधिना इति मधुसूदनः, सम्यग् दर्शनेन" इति श्रीधरः, 'युज्यते' युक्तो भवति, सम्पन्नो भवति, 'अत्र' 'संशयः' सन्देहः 'न' [अस्ति]।

7. He who knows in truth this my all-pervadingness and omnipotence (or omniscience) becomes possessed of unshaken union [with me]. There is no doubt about it.

1. स्वायम्भुव, 2. स्वारोचिष, 3. औत्तमि, 4. तामस, 5. रैवत, 6. चाक्षुष, 7. वैवस्वत, 8. सावर्णि, 9. दक्षसावर्णि, 10. ब्रह्मसावर्णि, 11. धर्मसावर्णि, 12. रुद्रसावर्णि, 13. रौच्यदेवसावर्णि and 14. इन्द्रसावर्णि—Apte's Dictionary.

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥८॥

८। 'अहं' परं ब्रह्म 'सर्व्वस्य' जगतः 'प्रभवः' उत्पत्तिहेतुः, 'मत्तः' [एव च] 'सर्व्वं' सर्व्वस्य बुद्ध्यादि 'प्रवर्त्तते' भवति, मत्तः अन्तर्यामिस्वरूपात् सर्व्वं जगत् प्रवर्त्तते चेष्टते इति विश्वनाथः, 'इति' एवं 'मत्वा' अवबुध्य 'बुधाः' पण्डिताः अवगततत्त्वार्थाः 'भावसमन्विताः' भावेन प्रेम्णा समन्विताः संयुक्ताः प्रीतियुक्ताः [सन्तः] 'मां' 'भजन्ते', सेवन्ते, उपासते ।

8. I am the origin of all. From me all proceeds. Understanding this, the wise worship me with love.

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥९॥

९। 'मच्चित्ताः' मयि चित्तं येषां ते मच्चिन्तनपराः, मद्गतहृदयाः, 'मद्गत-प्राणाः' मय्यर्पितजीवनाः [बुधाः] 'मां' 'परस्परं' अन्योन्यं 'बोधयन्तः' अवगमयन्तः 'कथयन्तः' संकीर्त्तयन्तः 'च' [सन्तः] 'नित्यं' 'तुष्यन्ति' परितोषं यान्ति, 'रमन्ति' रतिं प्रीतिम् आनन्दं प्राप्नुवन्ति 'च' ।

9. With their minds fixed on me, with their hearts devoted to me, enlightening one another, and speaking to one another about me, they (the wise) are always contented and happy.

तेषां सततयुक्तानां भजतां प्रीतिपूर्व्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥१०॥

१०। 'सततयुक्तानां' मयि नित्यासक्तानां 'प्रीतिपूर्व्वकं' [मां] 'भजतां'

सेवमानानां 'तेषां' 'तं' 'बुद्धियोगं' सम्यग्दर्शनरूपं योगं तत्त्वज्ञानं 'ददामि' 'येन' [बुद्धियोगेन] 'ते' 'मां' 'उपयान्ति' प्राप्नुवन्ति ।

10. To those ever-united with me and worshipping me with love, I give that enlightenment by means of which they come to me.

तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥११॥

११ । 'तेषां' 'अनुकम्पार्थं' दयाहेतोः 'एव' 'अहं' 'आत्मभावस्थः' अन्तः-करणाशयस्थः तेषां बुद्धिवृत्तौ स्थितः [सन्] 'भास्वता' दीप्तिशालिना 'ज्ञानदीपेन' 'अज्ञानजं' अविवेकतः जातं 'तमः' मोहान्धकारमित्यर्थः 'नाशयामि' ।

11. Out of compassion for them, I, manifesting myself in their hearts, dispel the darkness born of ignorance by the shining lamp of knowledge.

अर्जुन उवाच

परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥१२॥
आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥१३॥

१२,१३ । [अर्जुनः उवाच] 'भवान्' 'परं ब्रह्म' परमात्मा 'परं' 'धाम' आवासः, तेजः इति शङ्करः, आश्रयः प्रकाशो वा इति मधुसूदनः 'परं' प्रकृष्ट' 'पवित्रं' पावनं [च] । 'सर्व्वे' 'ऋषयः', 'देवर्षिः नारदः', तथा' 'असितः',

'देवलः' 'व्यासः' [च] 'त्वां' 'शाश्वतं' नित्यं 'पुरुषं' 'दिव्यं' स्वप्रकाशं 'आदिदेवं' सर्व्वदेवानां आदौ भवं 'अजं' जन्मरहितं 'विभुं' व्यापकं [च] 'आहुः', [त्वं] 'स्वयं' 'च' 'एव' 'मे' मह्यं [तथा] 'ब्रवीषि'।

12, 13. Thou art the Supreme Brahman, the Supreme Refuge and the Most Holy. All the sages, the divine sage Nárada, as also Asita, Devala, and Vyása, declare thee to be the eternal Person, self-luminous, the primeval Deity, unborn and all-pervading. Thou thyself also tellest me (that).

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
न हि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः ॥१४॥

१४। [हे] 'केशव', 'मां' 'यत्' [त्वं] 'वदसि' 'एतत्' 'सर्व्वं' [अहं] 'ऋतं' सत्यं 'मन्ये' अवधारयामि। [हे] 'भगवन्', 'ते' तव 'व्यक्तिं' प्रभवं (शङ्करः) अभिव्यक्तिं (श्रीधरः) 'देवाः' 'न' 'विदुः' जानन्ति, [तथा] 'दानवाः' [च] 'न' [विदुः]। 'हि' पादपूरणे, यस्मात् इति मधुसूदनः ।

14. O Kesava, all this that thou tellest me I believe to be true. O glorious One, neither the gods nor the demons know of they origin (or manifestation).

स्वयमेवात्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ॥१५॥

१५। [हे] 'पुरुषोत्तम', 'भूतभावन' भूतानाम् प्राणिनाम् उत्पादक, 'भूतेश' भूतानां नियन्तः, 'देवदेव' देवानां ईश्वर, 'जगत्पते' विश्वपालक, 'त्वं' 'स्वयं'

'एव' 'आत्मना' आत्मनः शक्त्या न तु साधनान्तरेण इति भावः 'आत्मानं' 'वेत्थ' जानासि, नान्यः त्वां जानाति इत्यर्थः ।

15. O Supreme Person, Source and Ruler of created beings, God of gods, [and] Lord of the universe, thou thyself alone knowest thyself by thyself (*i. e.* by thine own inherent power of knowing).

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥१६॥

१६ । 'याभिः' 'विभूतिभिः' आत्मनः महात्म्यविस्तारैः 'त्वं' 'इमान्' 'लोकान्' 'व्याप्य' पूरयित्वा 'तिष्ठसि', 'ताः' 'दिव्याः' अद्भुताः (श्रीधरः) असर्वज्ञैः ज्ञातुमशक्याः (मधुसूदनः) 'विभूतयः' 'अशेषेण' साकल्येन 'वक्तुम्' 'अर्हसि' ।

16. Be pleased to relate, without exception, thy own divine manifestations, with which thou pervadest these worlds.

कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन् ।
केषु केषु च भावेषु चिन्त्योऽसि भगवन् मया ॥१७॥

१७ । [हे] 'योगिन्' निरतिशयैश्वर्य्यादिशक्तिशालिन्, 'सदा' [त्वां] 'परिचिन्तयन्' ध्यायन् [अहं] 'कथं' कैः विभूतिभेदैः 'त्वां' 'विद्या'' जानीयां ? [हे] 'भगवन्', 'केषु' 'केषु' 'भावेषु' वस्तुषु 'च' [त्वं] 'मया' 'चिन्त्यः' चिन्तनीयः ध्येयः 'असि' ?

17. O Yogin, how can I, by constant meditation, know thee ? O Glorious One, in what aspects art thou to be contemplated by me ?

विस्तरेणात्मनो योगं विभूतिं च जनार्दन ।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ॥१८॥

१८ । [हे] 'जनार्द्दन' जनासुरहन्तः * (असुराणां जनानां नरकादिगमयितः ; त्वाम् अभ्यु दयनिःश्रेयसपुरुषार्थ-प्रयोजनं सर्व्वैर्जनैर्याच्यसे इति सर्व्वजनप्रार्थित-पुरुषार्थ वा : जायते इति जनः दृश्यवर्गः तं अर्दति व्याप्नोति इति सर्व्वव्यापिन् इति वा), 'आत्मनः' 'योगं' सर्व्वज्ञत्व-सर्व्वशक्तिमत्त्वादिलक्षणं ऐश्वर्य्यातिशयं 'विभूतिं ध्येयपदार्थानां विस्तरं (शङ्करः) च विस्तरेण 'भूयः' पुनः 'कथय', 'हि' यतः 'अमृतं' तव वाक्यामृतं 'शृण्वतः' 'मे' मम 'तृप्तिः' परितोषः 'न' 'अस्ति' ।

18. O Janárdana, relate again at length thine own divine power and manifestation, for there is no satiety for me in hearing thy ambrosial (life-giv ing) words.

श्रीभगवान् उवाच

हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥१९॥

१९ । [श्रीभगवान् उवाच] 'हन्त' (इत्यव्ययं हर्षे अनुकम्पायां वाक्यारम्भे वा) 'कुरुश्रेष्ठ', 'दिव्याः' 'आत्मविभूतयः' आत्मनः मम विभूतयः 'प्राधान्यतः' प्राधान्येन (प्रधानभूताः काश्चित् एव विभूतीः इत्यर्थः) 'ते' तुभ्यं 'कथयिष्यामि', 'हि' यस्मात् 'मे' मम 'विस्तरस्य' विभूतिविस्तरस्य 'अन्तः' 'न' 'अस्ति' ।

* समुद्रान्तर्वासिना जननाम्नोऽसुरान् आर्द्दितवान् जनार्द्दनः इत्यमरटीकायां भानुजिभरतः ।

19. Well, O best of Kurus, I will relate to you the most prominent ones among mine own divine manifestations, for there is no end to my manifestations.

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥२०॥

२० । [हे] 'गुड़ाकेश' (गुड़ाका=निद्रा आलस्यं वा+ईश) जितनिद्र (अतः ध्यानसमर्थ), 'अहं' 'सर्व्वभूताशयस्थितः' सर्व्वेषां भूतानां' प्राणिनां आशये अन्तःकरणे अवस्थितः 'आत्मा' । 'अहम्' 'एव' भूतानाम्' 'आदिः' कारणं, 'मध्यं' स्थितिः, 'अन्तः' प्रलयः 'च' ।

20. O Gudakeśa (conqueror of sleep or sloth), I am the Self existing in the hearts of all created beings. I am also the beginning, the middle and the end of all created things.

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥२१॥

२१ । 'अहम्' 'आदित्यानां' द्वादशदेवविशेषाणां [मध्ये] 'विष्णुः', 'ज्योतिषां' प्रकाशकानां [मध्ये] 'अंशुमान्' रश्मिमान् 'रविः' सूर्यः ; 'मरुतां' वायूनां सप्तदेवविशेषानां [मध्ये] 'मरीचिः' नाम वायुः 'अस्मि' ; 'अहं' नक्षत्राणां [मध्ये] 'शशी' चन्द्रमाः [अस्मि] ।

21. Of the Ádityas (twelve solar deities), I am Vishnu ; among luminaries, I am the radiant Sun ; among the Maruts (storm-gods), I am Marichi ; among the stars (asterisms or lunar mansions), I am the Moon.

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥२२॥

२२। [अहं] 'वेदानां' [मध्ये] 'सामवेदः' 'अस्मि' गानमाधुर्य्येण अतिरमणीयत्वात्, 'देवानां' 'वासवः' इन्द्रः 'अस्मि', 'इन्द्रियाणां' चक्षुरादीनां एकादशानां 'मनः' 'च' 'अस्मि', 'भूतानां' प्राणिनां सम्बन्धिनी 'चेतना' बुद्धिवृत्तिः ज्ञानशक्तिः 'अस्मि'।

22. Of the Vedas, I am the Sáma-Veda; among the gods, I am Indra (the king of the gods); among the senses, I am the sensorium; in living beings, I am consciousness (or sentiency).

रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम्।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥२३॥

२३। 'अहं' 'रुद्राणां' एकादशानां [मध्ये] 'शङ्करः' 'च' 'अस्मि', 'यक्षरक्षसां' यक्षाणां रक्षसां च 'वित्तेशः' कुवेरः [अस्मि], 'वसूनां' अष्टानां 'पावकः' अग्निः 'च' 'अस्मि'; 'शिखरिणां' शिखरवतां उच्चशृङ्गयुक्तानां पदार्थानां पर्व्वतानां मध्ये 'मेरुः' [अस्मि]।

23. Of the Rudras, I am Sankara; of the Yakshas and Rákshasas, I am Kuvera (the Lord of wealth); of the Vasus, I am Agni; of peaked mountains, I am Meru (the Golden Mount).

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम्।
सेनानीनामहं स्कन्दः सरसामस्मि सागरः ॥२४॥

२४। [हे] 'पार्थ' पृथातनय अर्ज्जुन, 'मां' 'पुरोधसां' पुरोहितानां

(राजपुरोहितानामिति शङ्करः) 'मुख्यं' प्रधानं देवपुरोहितत्वात् इति भावः 'बृहस्पतिं' 'विद्धि' जानीहि। 'अहं' 'सेनानीनां' सेनापतीनां मध्ये 'स्कन्दः' देवसेनापतिः कार्त्तिकेयः [अस्मि], 'सरसां' जलाशयानां (स्थिरजलाशयानामिति श्रीधरः, देवखातजलाशयानामिति मधुसूदनः) मध्ये 'सागरः' सगरपुत्रैः खातो जलाशयः समुद्रः 'अस्मि'।

24. Know me, O son of Prithá, to be the chief of family-priests, Brihaspati (the household priest of Indra). Among generals, I am Skanda (Kartikeya, the general of the gods); among (natural) reservoirs of water, I am the ocean.

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम्।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः॥२५॥

२५। 'अहं' महर्षीणां' [मध्ये] 'भृगुः', 'गिरां' वाक्यानां मध्ये 'एकम् अक्षरम्' ओङ्कारः 'अस्मि', 'यज्ञानां' अग्निहोत्रादि-कर्म्मणां मध्ये 'जपयज्ञः' मन्त्रादीनां पुनः पुनरुच्चारणरूपः यज्ञः (हिंसादिराहित्येन अस्य प्राधान्यमिति भावः), [तथा] 'स्थावराणां' स्थितिशीलानां पदार्थानां मध्ये 'हिमालयः' हिमवान् पर्व्वतराजः [अस्मि]।

25. Of the great sages, I am Bhrigu ; among words, the monosyllable (Om) ; among sacrifices (or acts of worship), the sacrifice of *japa* (silent repetition or muttering of prayers) ; among unmoving things, the Himalaya.

अश्वत्थः सर्व्ववृक्षाणां देवर्षीणां च नारदः।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः॥२६॥

२६। [अहं] 'सर्व्वबृक्षाणां' सर्व्वेषां बृक्षाणां मध्ये 'अश्वत्थः', 'देवर्षीणां' 'च' मध्ये 'नारदः', 'गन्धर्व्वाणां' देवयोनिविशेषाणां स्वर्गगायकानां मध्ये 'चित्ररथः' नाम गन्धर्व्वः, 'सिद्धानां' जन्मतः एव लब्धतत्त्वज्ञानानां त्रिकालज्ञमुनीनां मध्ये 'कपिलः' 'मुनिः' [अस्मि] ।

26. [I am] Asvattha (the holy fig-tree), among all trees; Nárada, among divine sages; Chitraratha, among Gandharvas (celestial musicians or singers); the sage Kapila, among the Siddhas (perfected beings, seers or saints who are born perfected).

उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् ।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ॥२७॥

२७। 'माम्' 'अश्वानां' [मध्ये] "अमृतोद्भवं' अमृतार्थं समुद्रमन्थनात् उद्भूतं 'उच्चैःश्रवसं' नाम इन्द्रस्य अश्वं, 'गजेन्द्राणां' हस्तिश्रेष्ठानां मध्ये 'ऐरावतं' नाम इन्द्रस्य अमृतमथनोद्भवं गजं, 'नराणां' मनुष्याणां मध्ये 'नराधिपं' राजानं 'च' 'विद्धि' ।

27. Among horses, know me as Uchchaihsravá (Indra's horse), born of ambrosia (*i. e.*, sprung from the ocean when it was churned for ambrosia); among lordly elephants, Airavata (Indra's elephant); and among men, the ruler of men (*i. e.*, the king).

आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ॥२८॥

२८। 'आयुधानां' अस्त्राणां मध्ये 'अहं' 'वज्रं' दधीचेरस्थिसम्भवं अस्त्रं,

'धेनूनां' दुग्धवतीनां गवां मध्ये 'कामधुक्' (कामान् दोग्धि इति कामधुक्) समुद्रमथनोद्भवा वशिष्ठस्य सर्व्वकामप्रदात्री कामधेनुः (सामान्या कामधेनुः वा) 'अस्मि', 'अहं' [प्रजनयितॄणां मध्ये] 'प्रजनः' प्रजनयिता प्रजानां सन्तानानां उत्पत्तिहेतुः 'कन्दर्पः' कामदेवः 'अस्मि,' 'सर्पाणां' सर्पभेदानां (शङ्करः) सविषाणां (श्रीधरः) 'वासुकिः' सर्पराजः 'अस्मि'।

28. Among weapons, I am the thunderbolt (made of Dadhichi's bones) ; among cows, I am the Káma-dhuk (also called the Kâmadhenu, the cow of plenty, the celestial cow yielding all desirable things) ; [among procreators,] I am the progenitor Kandarpa (also called Kámadeva, or, simply, Káma, the god of love) ; among (venomous) serpents, I am the Vàsuki (the king of serpents).

अनन्तश्चास्मि नागानां वरुणो यादसामहम्।
पितॄणामर्यमा चास्मि यमः संयमतामहम् ॥२९॥

२९। 'नागानां' नागविशेषाणां (शङ्करः) निर्व्विषाणां [सर्पाणाम्] इति श्रीधरः [मध्ये] 'अहं' [तेषां राजा] 'अनन्तः' शेषः 'अस्मि' ; 'यादसां' जलजन्तूनां (अब्देवतानां इति शङ्करः) [राजा] 'वरुणः' [अस्मि] ; 'पितॄणां' पितृदेवानां मध्ये, 'अर्य्यमा' नाम पितृराजः 'च' 'अस्मि' ; 'संयमतां' संयमनं कुर्व्वतां नियन्तॄणां मध्ये 'अहं' 'यमः' धर्म्मराजः कृतान्तः [अस्मि]।

29. Among Nágas (snake-demons, or venomless serpents), I am Ananta (their king); among aquatic beings (or water-gods), I am Varuna (the water-

king); among the Pitris (Manes), I am Aryama (their chief) ; among controllers (or corre-ctors), I am Yama (the god of death, who is also the judge of the dead).

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् ।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ॥३०॥

३० । 'दैत्यानां' दितिवंश्यानां असुराणां 'च' [मध्ये] 'अहं' 'प्रह्लादः' 'अस्मि' ; 'कलयतां' गणयतां गणनं कुर्व्वतां [मध्ये अहं] 'कालः' समयः, आयुःस्वरूपः इत्यर्थः (श्रीधरः) [अस्मि]; 'मृगाणां' पशूनां 'च', [मध्ये] 'अहं' 'मृगेन्द्रः' पशुराजः सिंहः (व्याघ्रो वा इति शङ्करः) [अस्मि] ; 'पक्षिणां' 'च' [मध्ये अहं] 'वैनतेयः' 'विनतासुतः पक्षिराजः गरुडः [अस्मि] ।

30. And among the demons, I am Prahláda (the pious demon for whom Vishnu became incarnate in the form of Nrisinha) ; among reckoners, I am time ; among quadrupeds, I am the king of beasts (the Lion); and among birds, I am the son of Vinatá, Garuda (probably the eagle—the Váhana or vehicle of Vishnu.)

पवनः पवतामस्मि रामः शस्त्रभृतामहम् ।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥३१॥

३१ । 'पवतां' पावयितॄणां पवित्रकारिणां (वेगवतां वा इति श्रीधरः) [मध्ये] 'अहं' 'पवनः' वायुः 'अस्मि' ; 'शस्त्रभृतां' शस्त्रधारिणां [मध्ये अहं] 'रामः' दाशरथिः (शङ्करः श्रीधरश्च) परशुरामः (विश्वनाथः) [अस्मि] ;

'झषाणां' मत्स्यानां [मध्ये अहं] 'मकरः' नाम मत्स्यजातिविशेषः 'अस्मि' ; 'स्रोतसां' प्रवाहोदकानां नदनदीनां [मध्ये अहं] 'जाह्नवी' जह्नुकन्या गङ्गा 'अस्मि'।

31. Among purifiers (or swift-flowing things), I am the wind ; among wielders of weapons, I am Ráma (Dasaratha's son, Ráma, according to Sankara, Sridhara and Madhusúdana ; Parasuráma, according to Visvanátha) ; among fishes, I am Makara (the shark or crocodile) ; among streams (of water), I am Jáhnaví (the Ganges).

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥३२॥

३२। [हे] 'अर्जुन', 'सर्गाणां' सृष्टवस्तूनां 'आदिः' उत्पत्तिः, 'अन्तः' विलयः 'च' 'मध्यं' स्थितिः 'च' 'अहम्' 'एव' ; 'विद्यानां' [मध्ये] 'अहम्' 'अध्यात्मविद्या' आत्मविद्या, ब्रह्मविद्या ; प्रवदतां वक्तृणां वाग्मिनां [अहम्] 'वादः' यथार्थविचारः तत्त्वनिर्णयात्मिका कथा [अस्मि]।

32. Of created things, I am the beginning, the end, and also the middle, O Arjuna ; among sciences, I am the science of the (Supreme) Self ; in orators (disputants or controversialists), I am *váda* (reasoned speech or argument).

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च।
अहमेवाक्षयः कालो धाताऽहं विश्वतोमुखः ॥३३॥

३३। 'अक्षराणां' सर्व्वेषां वर्णानां मध्ये [अहम] 'अकारः' (तस्य

सर्व्ववाङ्मयत्वेन श्रेष्ठत्वात् इति श्रीधरः) 'अस्मि' ; 'सामासिकस्य' समाससमूहस्य मध्ये 'च' 'द्वन्द्वः' (उभयपदप्रधानत्वेन श्रेष्ठत्वात् इति श्रीधरः) [अस्मि] ; 'अहम्' 'एव' 'अक्षयः' अक्षीणः प्रवाहरूपः 'कालः' (संहर्त्तॄणां मध्ये महाकाली रुद्रः इति विश्वनाथः) 'अहं' [कर्म्मफलविधातॄणां मध्ये] 'विश्वतोमुखः' सर्व्वतोमुखः 'धाता' सर्व्वजगतः कर्म्मफलस्य विधाता इति शङ्करः (स्रष्टॄणां मध्ये ब्रह्मा इति विश्वनाथः) ।

33. Among letters I am the letter अ (A) ; among compounds, I am the compound Dvandva (the dual or copualtive compound). I am also undecaying (unending) Time ; I am the Dispenser of the fruits of actions, with the face on every side (*i. e.*, watching in all directions).

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।
कीर्तिः श्रीर्वाक् च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥३४॥

३४ । 'अहम्' [संहारकाणां मध्ये] 'सर्व्वहरः' सर्व्वहरणकारी सर्व्वसंहारकः 'मृत्युः' 'च', 'भविष्यतां' भविष्यद्वस्तूनां 'उद्भवः' उत्पत्तिहेतुः 'च' (भाविकल्याणानां उत्कर्षप्राप्तियोग्यानां अभ्युदयप्राप्तिहेतुः इति शङ्करः, भाविकल्याणानां प्राणिनाम् अभ्युदयः, इति श्रीधरः) । 'नारीणां' स्त्रीणां (मध्ये) 'कीर्त्तिः' ख्यातिः, 'श्रीः' कान्तिः, शोभा, लक्ष्मीः 'वाक्' वाणी, 'स्मृतिः' स्मरणशक्तिः, 'मेधा' धारणावती बुद्धिः, ग्रन्थधारणशक्तिः, 'धृतिः' धैर्य्यं, 'क्षमा' मानापमानयोः अविकृतचित्तता 'च' [अहमेव] । कीर्त्त्याद्याः सप्तदेवतारूपाः स्त्रियः (श्रीधरः) ।

34. And I am all-destroying Death, and the source

of those that are to be. I am also Kírti (fame). Srí (beauty or fortune), Vák (speech), Smriti (memory), Medhá (intelligence) Dhriti (fortitude or constancy), and Kshamâ (forgiveness) among females (or of women).

बृहत्साम तथा साम्नां गायत्री छन्दसामहम् ।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥३५॥

३५। 'अहम्' 'साम्नां' सामगानसमूहानां मध्ये 'बृहत्साम' तन्नामकं इन्द्रस्तुतिरूपं प्रधानं सामगानं, 'तथा' छन्दसां छन्दोविशिष्टानां मन्त्राणां मध्ये 'गायत्री' नाम-सवितृस्तुतिरूप-प्रसिद्ध-वैदिक-मन्त्रः, 'अहम्' 'मासानां' मध्ये 'मार्गशीर्षः' अग्रहायणः, अभिनव-शस्यसम्पद्धेतोः, 'ऋतूनां' मध्ये 'कुसुमाकरः' वसन्तः [च अस्मि]।

35. Among Sámans (hymns of the Sáma-Veda), I am the Vrihat-Sáman ; among metres (metrical formulas of prayer), the Gáyatri ; among the months, Márgasírsha (Agraháyana) ; among the seasons, the flowery season (spring).

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥३६॥

३६। 'अहम्' 'छलयतां' छलनाकारिणां वञ्चकानां [सम्बन्धिनं] 'द्यूतं' पाशकक्रीड़ा, [तथा] 'तेजस्विनां' प्रतापशालिनां 'तेजः' प्रभावः 'अस्मि'; 'अहम्' [जेतॄणां] 'जयः' उत्कर्षः शत्रुपराजयः 'अस्मि'; [व्यवसायिनां, उद्यमशीलानां] 'व्यवसायः' उद्यमः 'अस्मि'; 'सत्त्ववतां' बलिनां, सात्त्विकानामिति शङ्करः 'सत्त्वं' बलं धर्मज्ञानादि-लक्षणं सत्त्वकार्यं वा [अस्मि]।

36. Of cheats, I am the game of dice, [and] of the valiant, I am the valour. I am the victory (of the victorious) ; I am the perseverance (or determination) [of the persevering]. I am the strength of the strong.

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥३७॥

३७। 'अहं' 'वृष्णीनां' वृष्णिवंशानां मध्ये 'वासुदेवः' वसुदेवतनयः कृष्णः (योऽहं त्वामुपदिशामि), 'पाण्डवानां' मध्ये 'धनञ्जयः' त्वमेव, 'मुनीनां' मननशीलानां वेदार्थतत्त्वज्ञानां 'अपि' 'व्यासः' कृष्णद्वैपायनः, 'कवीनां' शास्त्रदर्शिनां सर्वशास्त्रज्ञानां मध्ये 'उशनाः' शुक्रः शुक्रनामकः 'कविः' ज्ञानी 'अस्मि'।

37. Among the Vrishnis (descendants of Vrishni, an ancestor of Krishna), I am Vásudeva (*i. e.*, myself, who am your friend and am now speaking to you); among the Pándavas, Dhananjaya (Arjuna, *i. e.*, yourself) ; among the Munis (sages), Vyása ; among the wise, the wise Usanas (Sukra, the preceptor of the Daityas).

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् ।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥३८॥

३८। 'अहम्' 'दमयतां' दमनकर्त्तॄणां सम्बन्धी 'दण्डः' लगुडादि-दमनहेतुः 'अस्मि', 'जिगीषतां' जेतुमिच्छतां 'नीतिः' न्यायः सामदानभेददण्डरूपः 'अस्मि', 'गुह्यानां' गोप्यानां (गोपनहेतुः) 'मौनं' वाचः-संयमत्वं 'अस्मि' ; 'ज्ञानवतां' तत्त्वज्ञानिनां 'ज्ञानम्' 'एव' 'च' [अस्मि] ।

38. Of tamers (or chastisers) I am the rod ; of those that desire to conquer I am statesmanship (or political wisdom); of secrets I am silence. I am also the knowledge of the knowing or wise.

यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥३९॥

३९ । [हे] 'अर्ज्जुन', 'यत्' 'च' सर्व्वभूतानां 'बीजं' प्ररोहकारणं 'तत्' 'अपि' अहम् [एव] ; 'मया' 'विना' यत्' 'चराचरं' चरं जङ्गमं अचरं स्थावरं वा 'भूतं' वस्तु 'स्यात्' भवेत् 'तत्' [वस्तुत:] 'न' 'अस्ति' (अत: मदात्मकं सर्व्वमित्यर्थ: इति शङ्कर:) ।

39. And I am also that which is the seed of all beings (or things), O Arjuna. There is nothing, moving or unmoving, that exists without me.

नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप ।
एष तूद्देशत: प्रोक्तो विभूतेर्विस्तरो मया ॥४०॥

४० । [हे] 'परन्तप' शत्रुतापन (जितेन्द्रिय वा), 'मम' 'दिव्यानां' 'विभूतीनां' विस्तराणां 'अन्त:' इयत्ता 'न' 'अस्ति' । 'एष:' 'तु' 'विभूते:' 'विस्तर:' विस्तार: विवृति: 'मया' 'उद्देशत:' एकदेशेन, संक्षेपत: 'प्रोक्त:' ।

40. O harasser of (your) foes, there is no end to my divine manifestations. This detailed description of my manifestation has been given by me only by way of example.

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् ॥४१॥

४१। 'विभूतिमत्' ऐश्वर्य्ययुक्तं 'श्रीमत्' शोभावत् कान्तिमत् सम्पत्तियुक्तं 'ऊर्ज्जितं' प्रभावबलादिना अतिशयितं (उत्साहोपेतं इति शङ्करः) 'एव' 'वा' 'यत्' 'यत्' 'सत्त्व' वस्तुमात्रं [अस्ति] 'तत्' 'तत्' 'एव' [त्वं] 'मम' 'तेजोऽंशसम्भवं' तेजसः प्रभावस्य शक्तेर्वा अंशेन सम्भूतं जातं [इति] अवगच्छ जानीहि ।

41. Whatever glorious, beautiful, or mighty thing there is, know all that to have sprung from a part of my energy.

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥४२॥

४२। 'अथवा' [हे] 'धनञ्जय', 'एतेन' 'बहुना' [पृथक् पृथक्] 'ज्ञातेन' 'तव' किं [प्रयोजनम्] ? 'अहम्' 'इदं' 'कृत्स्न' समस्तं 'जगत्' 'एकांशेन' मम एकदेशमात्रेण 'विष्टभ्य' धृत्वा 'स्थितः' अवस्थितः (न मद्व्यतिरिक्तं किञ्चिदपि अस्ति, तस्मात् सर्व्वत्र मद्दृष्टिमेव कुरु इत्यर्थः) । "पादोऽस्य सर्व्वा भूतानि त्रिपादस्यामृतं दिवीति" (ऋक् १०।९०।३, छान्दोग्य ३।१२।६) ।

42. Or, of what avail is this detailed knowledge to you? I exist, sustaining the whole universe with (but) one portion (of myself) [i. e., there is nothing beyond me in this world; I am in it and also above it; therefore see *me* alone in everything].

विश्वरूपदर्शनयोगो नाम एकादशोऽध्याय:

———०:*:०———

अर्जुन उवाच

मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम्।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥१॥

१। [अर्जुन: उवाच] 'मदनुग्रहाय' ममानुग्रहार्थं शोकनिवृत्तिरूपाय उपकाराय 'यत्' 'परमं' निरतिशयं (परमात्मनिष्ठं इति श्रीधर:) 'गुह्यं' गोप्यं 'अध्यात्मसंज्ञितं' आत्मानात्मविवेकविषयकं 'वच:' वाक्यं 'त्वया' 'उक्तं' 'तेन' ते वचसा 'मम' 'अयं' 'मोह:' अविवेकबुद्धि:, भ्रम: 'विगत:' विनष्ट:।

1. By the words about the profound secret concerning the descrimination of Self and Not-Self which thou hast uttered for my benefit, this, my delusion, has been dispelled.

[*Adhyátma* also means the Supreme Self, or the relation of the Supreme and the individual Self].

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया।।
त्वत्त: कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥२॥

२। 'हि' यत: [च] 'कमलपत्राक्ष' पद्मपत्राक्षलोचन, 'त्वत्त:' भवत:

सकाशात् 'भूतानां' प्राणिनां (वस्तूनां वा) 'भवाप्ययौ' भवः उत्पत्तिः अप्ययः विनाशः विलयः तौ 'विस्तरशः', विस्तरेण 'मया' 'श्रुतौ', 'अव्ययं' अक्षयं 'माहात्म्यं' महिमानं सर्व्वात्मत्वादिरूपमैश्वर्यम् 'अपि' 'च' [श्रुतम्] ।

2. For, O lotus-eyed One, the production and dissolution of beings (or things) have been heard by me in detail from thee, and also thy inexhaustible greatness.

एवमेतद्यथाऽऽत्थ त्वमात्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥३॥

३ । [हे] 'परमेश्वर', 'त्वं' 'यथा' येन प्रकारेण 'आत्मानं' स्वं 'आत्थ' ब्रवीषि, 'एतत्' 'एवं' [एव] त्वद्वचसि अविश्वासो मे नास्ति [तथापि हे] 'पुरुषोत्तम' पुरुषश्रेष्ठ, 'ते' तव 'ऐश्वरं' ज्ञानैश्वर्य्यशक्तिबलादिभिः सम्पन्नं, 'रूपं' 'द्रष्टुम्' इच्छामि ।

3. O Supreme Lord, thou art as thou describest thyself. I [now] desire, O Best of Persons, to behold thy divine form.

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥४॥

४ । [हे] 'प्रभो', 'यदि' तत् रूपं 'मया' 'द्रष्टुं' 'शक्यं' 'इति' [त्वं] 'मन्यसे' चिन्तयसि 'ततः' तर्हि [हे] 'योगेश्वर', 'त्वं' [तव] 'अव्ययं' नित्यम् 'आत्मानं' ऐश्वररूपविशिष्टं 'मे' मह्यं 'दर्शय' ।

4. If, O Lord, thou thinkest that that form can be seen by me, then, O Lord of *yoga*, show me thine immutable self.

श्रीभगवान् उवाच

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥५॥

५। [श्रीभगवान् उवाच] [हे] 'पार्थ' पृथातनय, 'नानाविधानि' अनेकप्रकाराणि 'नानावर्णाकृतीनि' नाना अनेके वर्णाः तथा आकृतयः अवयव-सन्निवेशविशेषाः येषां (रूपाणां) तानि 'च' 'शतशः' 'सहस्रशः' अनेकशः इत्यर्थः 'मे' मम 'दिव्यानि' दिवि भवानि अलौकिकानि 'रूपाणि' 'पश्य' ।

5. Behold [then], O son of Prithá, my divine forms of divers kinds and of divers colours and shapes, hundreds and thousands in number.

पश्यादित्यान् वसून् रुद्रानश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥६॥

६। [हे] 'भारत' भरतवंशावतंस अर्ज्जुन, 'आदित्यान्' द्वादशसंख्यकान् 'वसून्' अष्टौ, 'रुद्रान्' एकादश, 'अश्विनौ' द्वौ, 'तथा' 'मरुतः' एकोनपञ्चाशद्दे-वताविशेषान् [मम देहे] 'पश्य' ; 'बहूनि' 'अदृष्टपूर्व्वाणि' त्वया अन्येन वा केनचित् पूर्व्वम् अदृष्टानि 'आश्चर्याणि' अद्भुतानि (रूपाणि वस्तूनि वा) [च] 'पश्य' ।

6. Behold, O descendant of Bharata, the [twelve]

Âdityas, the [eight] Vasus, the [eleven] Rudras, the [two] Asvins, and also the [forty-nine] Maruts [in my body]. Also behold many wonderful things never seen before.

इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम् ।
मम देहे गुडाकेश यच्चान्यत् द्रष्टुमिच्छसि ॥७॥

७। [हे] 'गुडाकेश' जितनिद्र (विंशश्लोकी द्रष्टव्यः), 'इह' अस्मिन् 'मम' 'देहे' शरीरे 'एकस्थं' अवयवरूपेण एकत्र स्थितं 'कृत्स्नं' समस्तं 'चराचरं' चरेण जङ्गमेन अचरेण स्थावरेण च सह वर्त्तमानं 'जगत्' विश्वं, 'अन्यत्' 'च' 'यत्' 'द्रष्टुम्' 'इच्छसि' जयपराजयादि यत् त्वं शङ्कसे तदपि 'अद्य' अधुनैव 'पश्य' ।

7. Here in my body, behold to-day, O Gudakesha (sleepless One), the whole universe with everything, moving (animate) and unmoving (inanimate), and whatever else you desire to see, (all) in one (place).

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥८॥

८। 'अनेन' 'स्वचक्षुषा' तव स्वीयेन प्राकृतेन चक्षुषा चर्मचक्षुषा 'मां' विश्वरूपधरं 'द्रष्टुं' 'तु' [त्वं] 'न' 'एव' 'शक्यसे' शक्तो भविष्यसि ; [अतः अहं] 'ते' तुभ्यं 'दिव्यं' अलौकिकं ज्ञानात्मकं 'चक्षुः' 'ददामि', 'मे' मम 'ऐश्वरं' असाधारणं अलौकिकं 'योगं' योगशक्तिं अघटनघटन-सामर्थ्यं 'पश्य' ।

8. But you will not be able to see me with this your

own (natural or human) eye. [So] I give you a divine eye. Behold my sovereign *yoga* (wonder-working power).

सञ्जय उवाच

एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥९॥
अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥१०॥
दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥११॥

९-११। [सञ्जयः उवाच] [हे] 'राजन्' (धृतराष्ट्र), 'महायोगेश्वरः' (महांश्चासौ योगेश्वरश्चेति) 'हरिः' कृष्णः 'एवं' यथोक्तप्रकारेण 'उक्त्वा' 'ततः' अनन्तरं 'पार्थाय' अर्ज्जुनाय 'परमम्' उत्कृष्टम् 'ऐश्वरं' 'रूपं' विश्वरूपं—[किम्भूतं तत् रूपं ?]—'अनेकवक्त्रनयनं' अनेकानि वक्त्राणि मुखानि नयनानि चक्षूंषि च यस्मिन् तं, 'अनेकाद्भुतदर्शनं' अनेकेषां अद्भुतानां आश्चर्य्याणां दर्शनं यस्मिन् (अथवा अनेकानि अद्भुतानि विस्मयजनकानि दर्शनानि यस्मिन् तं) 'अनेकदिव्याभरणं' अनेकानि दिव्यानि उत्तमानि आभरणानि भूषणानि यस्मिन् तं, 'दिव्यानेकोद्यतायुधं' दिव्यानि उत्तमानि अनेकानि उद्यतानि उत्तोलितानि आयुधानि अस्त्राणि यस्मिन् तं, [किन्तु] 'दिव्यमाल्याम्बरधरं' दिव्यानि माल्यानि अम्बराणि वस्त्राणि च धारयति यः (अथवा ध्रियन्ते येन ईश्वरेण) तं, 'दिव्यगन्धानुलेपनं' दिव्यंगन्धानुलेपनं यस्य वा यस्मिन् तं, 'सर्व्वाश्चर्य्यमयम्' (अनेकाद्भुतप्रचुरम् इति मधुसूदनः), अनन्तं' अन्तहीनं अपरिच्छिन्नं 'विश्वतोमुखं' विश्वतः

सर्व्वतः मुखानि यस्मिन् (यस्य वा) तं सर्व्वतोमुखविशिष्टं 'देवं' विश्वरूपधर-मित्यर्थः—दर्शयामास [अर्ज्जुनो देदर्श इति वा अध्याक्रियते (शङ्कर:)]।

9-11. [Sanjaya said—] Having thus spoken, O king (Dhritarášhtra), the great Lord of *yoga*, Hari, then showed to Pártha, his supreme divine form,—the Divine Being having many mouths and eyes, many wonderful sights, many celestial ornaments, many upraised divine weapons, [but] wearing divine garlands and robes, anointed with divine unguents, wonderful to all (or all-miraculous) infinite (and) with faces in all directions.

[In explaining the 10th sloka, Sankara connects the epithets in it with रूपं (क्लीं), but those in the 11th he connects with देवं (पुं, substantive, meaning ईश्वरं—the Divine Being). This difference in the construction does not seem to commend itself to many. It might have been avoided if he had only made the construction consistent by connecting the epithets in the 11th sloka also with देवं. Visvanath is silent here. He does not say anything about the word देवं (whether it is a substantive or an adjective). But Sridhara and Madhusudana clearly interpret देवं as meaning द्योतनात्मकं (adj.) and qualifying रूपं. Apte also takes the same view in his Dictionary and gives 'divine' and 'celestial' as its equivalents. He also gives 'shining' as an equivalent elsewhere. But देव as an adjective is not found in any lexicon. We have, therefore, followed Sankara, differing only in this that we have connected the epithets in both the 10th and 11th slokas with देवम्]

दिवि सूर्य्यसहस्रस्य भवेद् युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥१२॥

१२। 'यदि' 'दिवि' अन्तरीक्षे आकाशे 'सूर्य्यसहस्रस्य' सूर्य्याणां सहस्रं तस्य 'भाः' प्रभा दीप्तिः 'युगपत्' एकदा 'उत्थिता' उदिता 'भवेत्', [तर्हि] 'सा' 'भाः' 'तस्य' महात्मनः' विश्वरूपस्य 'भासः' प्रभायाः [कथञ्चित्] 'सदृशी' अनुरूपा 'स्यात्' (विश्वरूपस्य एव भा अतिरिच्यते इति भावः)।

12. If the lustre of a thousand suns were ever to burst all at once in the sky, that might be (to some extent) like the lustre of that Great One.

तत्रैकस्थं जगत् कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥१३॥

१३। 'तदा' 'पाण्डवः' पाण्डुपुत्रः अर्ज्जुनः 'तत्र' 'देवदेवस्य' देवानां देवस्तस्य हरेः 'शरीरे' (तस्मिन् विश्वरूपे इत्यर्थः) 'अनेकधा' नानाप्रकारैः 'प्रविभक्तं' पृथक् कृतं नानाविभागेन अवस्थितम् इत्यर्थः 'कृत्स्नं' समस्तं 'जगत्' 'एकस्थं' एकत्रस्थितं (तदवयवत्वेन) 'अपश्यत्' दृष्टवान् ।

13. The son of Pándu (Arjuna) then beheld there, in the body of the God of gods, the whole universe multifariously divided, [yet] existing (all) in one.

ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः ।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥१४॥

१४। 'ततः' दर्शनानन्तरं 'सः' 'धनञ्जयः' अर्ज्जुनः 'विस्मयाविष्टः' विस्मयेन

आविष्टः विस्मितः 'हृष्टरोमा' हृष्टानि उत्पुलकितानि रोमाणि यस्य सः रोमाञ्चितः [च सन्] 'देवं' विश्वरूपधरं 'शिरसा' 'प्रणम्य' अवनतमस्तकेन (भूमिलग्नेन मस्तकेन वा) भक्त्यातिशयेन नमस्कृत्य 'कृताञ्जलिः' (कृतः अञ्जलिः येन सः) संश्लिष्टीकृतहस्तौ भूत्वा [वक्ष्यमाणं वाक्यं] 'अभाषत' उक्तवान् ।

14. Then he, Dananjaya (the winner of wealth, Arjuna), struck with wonder, and with his hair standing on end, saluted the Deity with his head [bent down], and, with folded hands, spoke [as follows] :

अर्जुन उवाच

पश्यामि देवांस्तव देव देहे
सर्वांस्तथा भूतविशेषसङ्घान् ।
ब्रह्माणमीशं कमलासनस्थ-
मृषींश्च सर्वानुरगांश्च दिव्यान् ॥१५॥

१५ । [हे] 'देव', 'तव' 'देहे' 'सर्व्वान्' 'देवान्' 'तथा' 'भूतविशेषसङ्घान्' भूतविशेषाणां प्राणिविशेषाणां संघान् समूहान्, 'कमलासनस्थं' पद्मासनस्थं (पृथिवीपद्ममध्ये मेरुकर्णिकासनस्थं इति शङ्करः, भगवन्नाभिकमलासनस्थं इति वा इति मधुसूदनः) 'ईशं' 'ब्रह्माणं' चतुर्मुखं, 'सर्व्वान्' 'दिव्यान्' दिवि भवान् 'ऋषीन्' [दिव्यान्] 'उरगान्' उरसा वक्षसा गच्छन्तीति उरगास्तान् सर्पान् वासुकितक्षकप्रभृतीन् 'च' पश्यामि ।

15. [Arjuna said—]O God, I see in thy body all the gods, as also hosts of particular beings, the god Brahmá seated on a lotus (the earth), and all the divine sages and the celestial serpents.

अनेकबाहूदरवक्त्रनेत्रम्
पश्यामि त्वां सर्वतोऽनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवादिम्
पश्यामि विश्वेश्वर विश्वरूप ॥१६॥

१६। [हे] 'विश्वेश्वर' 'विश्वरूप' ('विश्वं' रूपं यस्य सः, तस्य सम्बोधनं) 'अनेकबाहूदरवक्त्रनेत्रं' अनेके बाहवः उदराणि वक्त्राणि मुखानि नेत्राणि यस्य तं, 'अनन्तरूपं' अनन्तानि रूपाणि यस्य तं 'त्वां' 'सर्व्वतः' सर्व्वत्र 'पश्यामि' 'तव' 'अन्तं' अवसानं सीमां 'न' 'पश्यामि', 'न' 'मध्यं' 'न' 'पुनः' 'आदिं' [पश्यामि] ।

16. O Lord of the Universe, O thou whose form the universe is (*i. e.*, who art manifest in the universe), I behold thee everywhere with many arms, bellies, mouths and eyes, (and) of countless forms. I do not see thy end, nor thy middle, nor yet thy beginning.

किरीटिनं गदिनं चक्रिणं च
तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्
दीप्तानलार्कद्युतिमप्रमेयम् ॥१७॥

१७। 'किरीटिनं' मुकुटवन्तं 'गदिनं' गदावन्तं 'चक्रिणं' चक्रम् अस्यास्तीति चक्री तं चक्रधरं 'सर्व्वतः' 'दीप्तिमन्तं' दीप्तिशालिनं 'तेजोराशिं' तेजःपुञ्जं 'दुर्निरीक्ष्यं' दुःखेन निरीक्ष्यं दुर्दर्शनीयं द्रष्टुमशक्यम् इति भावः, 'दीप्तानलार्क-द्युतिं' दीप्तौ अनलार्कौ अग्निसूर्यौ तयोः द्युतिरिव द्युतिः तेजः यस्य तं 'अप्रमेयं' सूक्ष्मत्वात् प्रमातुम् निश्चेतुं अशक्यं अशक्यपरिच्छेदम् असीमं 'त्वां' 'समन्तात्' सर्व्वत्र 'पश्यामि' ।

17. I behold thee with crown, mace and discus, as a mass of light shining on all sides, hard to look at, having the effulgence of a blazing fire or a dazzling sun, (and) immeasurable.

त्वमक्षरं परमं वेदितव्यम्
त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्मगोप्ता
सनातनस्त्वं पुरुषो मतो मे ॥१८॥

१८। 'त्वम्' 'अक्षरम्' अविनाशि 'परमं' श्रेष्ठं (परं ब्रह्म इति शङ्करः) 'वेदितव्यं' ज्ञातव्यं, 'त्वं' 'अस्य' 'विश्वस्य' समग्रस्य जगतः 'परं' प्रकृष्ट' 'निधानं' आश्रयस्थानं, 'त्वं' 'अव्ययः' नित्यः 'शाश्वतधर्मगोप्ता' सनातनधर्मस्य रक्षाकर्त्ता, 'त्वं' 'सनातनः' चिरन्तनः पुराणः 'पुरुषः' [च] 'मे' मम 'मतः' अभिप्रेतः सम्मतः [असि] ।

18. Thou art the Imperishable One, the Highest Object to be known. Thou art the Supreme Support of this universe. Thou art the Immutable, the Protector of the eternal law of righteousness. Thou art, to my mind, the Primeval Person.

अनादिमध्यान्तमनन्तवीर्य्य-
मनन्तबाहुं शशिसूर्य्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रम्
स्वतेजसा विश्वमिदं तपन्तम् ॥१९॥

१९। 'अनादिमध्यान्तं' आदिश्च मध्यश्च अन्तश्च न विद्यते यस्य ःतं उत्पत्ति-

क्षितिक्षयरहितं 'अनन्तवीर्य्यं' अनन्तं वीर्य्यं प्रभावो यस्य तं, 'अनन्तबाहु' अनन्ता: बाहव: यस्य तं, 'शशिसूर्य्यनेत्रं' शशिसूर्य्यौ नेत्रे यस्य तं 'चन्द्रादित्य-नयनम्' "अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्य्यौ" इति श्रुते: (मुण्डक २।१।४) 'दीप्त-हुताशवक्त्रं' दीप्त: हुताश: अग्नि: वक्त्रं (वक्त्रेषु वा) यस्य अथवा तद्वत् वक्त्राणि यस्य तं, 'स्वतेजसा' स्वीयतेज:प्रभावेन 'इदं' 'विश्वं' 'तपन्तं' सन्तापयन्तं 'त्वां' 'पश्यामि'।

19. I behold thee without beginning, middle, or end, of infinite prowess, with countless arms, having the sun and the moon as (thine) eyes, with faces like a blazing fire, [and] heating this universe with thy glare.

द्यावापृथिव्योरिदमन्तरं हि
व्याप्तं त्वयैकेन दिशश्च सर्वा:।
दृष्ट्वाऽद्भुतं रूपमुग्रं तवेदम्
लोकत्रयं प्रव्यथितं महात्मन् ॥२०॥

२०। [हे] 'महात्मन्' 'इदं' 'द्यावापृथिव्यो:' द्यौ: स्वर्गश्च पृथिवी च तयो: 'अन्तरं' मध्यं अन्तरीक्षम् आकाशमित्यर्थ: 'हि' (पादपूरणे, निश्चितं वा) 'एकेन' 'त्वया' विश्वरूपधरेण 'व्याप्तं' [तथा] 'सर्व्वा:' 'दिशश्च' [व्याप्ता:] ; 'तव' 'इदं' 'अद्भुतं' विस्मयजनकम् 'उग्रं' घोरं भयानकं 'रूपं' 'दृष्ट्वा' 'लोकत्रयं' लोकानां त्रयं स्वर्गमर्त्त्यरसातलं 'प्रव्यथितं' अतिभीतं प्रचलितं वा।

20. O High-souled One, this intervening space between heaven and earth and all quarters (of the world) are pervaded by thee. The three worlds are extremely distressed on beholding this marvellous and awful form of thine.

अमी हि त्वां सुरसङ्घा विशन्ति
केचिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः
स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ॥२१॥

२१। 'अमी' 'सुरसङ्घाः' देवसमूहाः 'हि' 'त्वां' 'विशन्ति' शरणं प्रविशन्ति (श्रीधरः) प्रविशन्तो दृश्यन्ते (शङ्करः) ; केचित् (सुरसङ्घाः) 'भीताः' [सन्तः] 'प्राञ्जलयः' कृतसम्पुटकरयुगलाः (भूत्वा) [त्वां] 'गृणन्ति' स्तुवन्ति रक्षाकरणार्थं प्रार्थयन्ते ; 'महर्षिसिद्धसङ्घाः' महर्षीणां सिद्धानां च सङ्घाः 'स्वस्ति' शुभं जगतः शुभमस्तु 'इति' 'उक्त्वा' 'पुष्कलाभिः' श्रेष्ठाभिः उत्कृष्टाभिः 'स्तुतिभिः' 'स्तुवन्ति' ।

21. Those hosts of gods are entering into thee (as their Refuge). Some, affrighted, invoke thee (for protection) with joined palms. The multitudes of great sages and Siddhas (vide ch. x) praise thee in excellent hymns, crying 'May it be well [with the world]'.

रुद्रादित्या वसवो ये च साध्या
विश्वेऽश्विनौ मरुतश्चोष्मपाश्च
गन्धर्वयक्षासुरसिद्धसङ्घाः
वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥२२॥

२२। 'रुद्रादित्याः' रुद्राश्च आदित्याश्च, 'वसवः' 'ये' 'च' 'साध्याः' नाम देवाः, 'विश्वे' विश्वेदेवाः नाम देवविशेषाः, 'अश्विनौ' अश्विनीकुमारौ 'मरुतः' मरुद्गणाः 'च' 'उष्मपाः' पितरः पितृलोकविशेषाः 'च' 'गन्धर्वयक्षासुरसिद्धसङ्घाः' गन्धर्वाणां यक्षाणां असुराणां सिद्धानाञ्च सङ्घास्ते 'च' 'सर्वे' 'विस्मिताः' विस्मयमापन्नाः [सन्तः] 'त्वां' 'वीक्षन्ते' पश्यन्ति ।

22. The Rudras, the Adityas, the Vasus, and those that are (called) Sadhyas, the Visyas, the Asvins, the Maruts, and the Ushmapas (the Manes) and the multitudes of [demi-gods and demons named] Gandharvas, Yakshas, Asuras and Siddhas, all are beholding thee, amazed.

रूपं महत्ते बहुवक्त्रनेत्रम्
महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालम्
दृष्ट्वा लोकाः प्रव्यथितास्तथाऽहम् ॥२३॥

२३। [हे] 'महाबाहो,' 'ते' तव 'बहुवक्त्रनेत्र'' बहूनि वक्त्राणि मुखानि नेत्राणि चक्षूंषि यस्मिन् (रूपे) तत्, 'बहुबाहूरुपादं' बहवः बाहवः उरवः पादाश्च यस्मिन् तत्, 'बहूदरं' बहूनि असंख्यानि उदराणि यस्मिन् तत्, 'बहुदंष्ट्राकरालं' बहुभिः [बह्वीभिः] दंष्ट्राभिः बृहद्दन्तैः करालं विकृतं भयङ्करं 'महत्' 'रूपं' 'दृष्ट्वा' 'लोकाः' प्राणिनः (भुवनानि वा) 'प्रव्यथिताः' अतिभीताः भयेन प्रचलिताः 'तथा' 'अहं' अहञ्च [प्रव्यथितः] ।

23. O Mighty-armed, beholding thy huge form with many mouths and eyes, many arms, thighs and feet, and many bellies, and terrible with many large teeth, all beings and myself also are extremely distressed.

नभःस्पृशं दीप्तमनेकवर्णम्
व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा
धृतिं न विन्दामि शमं च विष्णो ॥२४॥

२४। [हे] 'विष्णो' (व्यापनशील), 'नभःस्पृशं' नभः गगनं स्पृशतीति नभःस्पृक् तं अन्तरीक्षव्यापिनं, 'दीप्तं' तेजोयुक्तं प्रज्वलितं, 'अनेकवर्णं' अनेके वर्णाः यस्य तं, 'व्यात्ताननं' व्यात्तानि विवृतानि विस्फारितानि आननानि मुखानि यस्य तं, 'दीप्तविशालनेत्रं' दीप्तानि प्रज्वलितानि विशालानि विस्तीर्णानि नेत्राणि यस्य तं एवम्भूतं 'हि' 'त्वां' 'दृष्ट्वा' 'प्रव्यथितान्तरात्मा' प्रव्यथितः अतिभीतः अन्तरात्मा मनो यस्य मम सः [अहं] 'धृतिं' धैर्यं 'शमं' शान्तिं मनःस्थैर्यं 'च' 'न' 'विन्दामि' लभे।

24. O Vishnu (the all-pervading One), on seeing thee as touching the sky, radiant, many-coloured, with open mouths and huge glowing eyes, I, troubled in my inmost self, fail to retain my peace and firmness.

दंष्ट्राकरालानि च ते मुखानि
दृष्ट्वैव कालानलसन्निभानि।
दिशो न जाने न लभे च शर्म
प्रसीद देवेश जगन्निवास ॥२५॥

२५। 'दंष्ट्राकरालानि' दंष्ट्राभिः बृहद्दन्तैः करालानि विकृतानि, भयङ्कराणि 'कालानलसन्निभानि' प्रलयाग्निसदृशानि 'च' 'ते' तव 'मुखानि' 'दृष्ट्वा' 'एव' (न तु तानि प्राप्य इति मधुसूदनः) [अहं] 'दिशः' 'न' 'जाने' (पूर्वापरविवेकेन न जानामि) भयावेशेन अहं दिङ्मूढोऽस्मि इत्यर्थः, 'शर्म' सुखं 'च' 'न' 'लभे' उपलभे, [हे] 'देवेश' देवानां ईश, 'जगन्निवास' जगतां निवास निवसतिस्थान, आधार, 'प्रसीद' प्रसन्नो भव।

25. At the mere sight of thy mouths, terrific with large teeth, and resembling the fire of final destruction,

I fail to discriminate the cardinal points or quarters of the sky, nor do I find peace Have mercy, O God of gods, Support of the world.

अमी च त्वां धृतराष्ट्रस्य पुत्राः
सर्वे सहैवावनिपालसङ्घैः ।
भीष्मो द्रोणः सूतपुत्रस्तथाऽसौ
सहास्मदीयैरपि योधमुख्यैः ॥२६॥
वक्त्राणि ते त्वरमाणा विशन्ति
दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु
संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥२७॥

२६,२७। 'अमी' 'च' 'धृतराष्ट्रस्य' 'सर्व्वे' 'एव' 'पुत्राः' दुर्य्योधनादयः 'अवनिपालसङ्घैः' 'अवनिं पृथ्वीं पालयन्ति ये तेषां शल्यजयद्रथादीनां राज्ञां सङ्घैः समूहैः 'सह' 'तथा' 'भीष्मः' 'द्रोणः, 'असौ' 'सूतपुत्रः' अधिरथ-सारथि-पालितः सूर्य्यतनयः कर्णः 'अस्मदीयैः' अस्मत्पक्षीयैः 'योधमुख्यैः' योद्धृप्रधानैः धृष्टद्युम्नप्रभृतिभिः 'सह' 'त्वरमाणाः' त्वरायुक्ताः धावन्तः सन्तः 'त्वां' 'ते' तव 'दंष्ट्राकरालानि' बृहद्दन्तैः विकृतानि 'भयानकानि' भयङ्कराणि 'वक्त्राणि' मुखानि 'विशन्ति' प्रविशन्ति ; 'केचित्' (मुखानि प्रविष्टानां मध्ये) 'दशनान्तरेषु' दन्तसन्धिषु 'विलग्नाः' संश्लिष्टाः (भक्षितं मांसमिव) 'चूर्णितैः' चूर्णीकृतैः 'उत्तमाङ्गैः' मस्तकैः उपलक्षिताः 'संदृश्यन्ते' उपलभ्यन्ते ।

26, 27. And all those sons of Dhritaráshtra, with hosts of kings of the earth, Bhíshma, Drona, and yon charioteer's son (Karna), together with our warrior-

chiefs, are hurrying into thy frightful mouths, terrific with large teeth. Some (of them) are seen clinging to the interstices of thy teeth with their heads crushed to pieces.

यथा नदीनां बहवोऽम्बुवेगाः
समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा:
विशन्ति वक्त्राण्यभिविज्वलन्ति ॥२८॥

२८। 'यथा' 'नदीनां' 'बहवः' अनेके 'अम्बुवेगाः' अम्बूनां जलानां वेगाः वेगवन्तः प्रवाहाः वारिप्रवाहाः 'अभिमुखाः' प्रतिमुखाः समुद्राभिमुखाः सन्तः 'समुद्रम्' 'एव' 'द्रवन्ति' गच्छन्ति प्रविशन्ति, 'तथा' तद्वत् 'अमी' 'नरलोकवीराः' मनुष्यलोकशूराः भीष्मादयः 'तव' 'अभिविज्वलन्ति' अभितः सर्व्वतः :विज्वलन्ति प्रदीप्यमानानि (अभितोज्वलन्ति इति वा पाठः) 'वक्त्राणि' मुखानि 'विशन्ति' प्रविशन्ति ।

28. As the many currents of rivers, flowing in the direction of the ocean, enter into it, so are those heroes among men entering thy mouths flaming in all directions.

यथा प्रदीप्तं ज्वलनं पतङ्गाः
विशन्ति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशन्ति लोका-
स्तवापि वक्त्राणि समृद्धवेगाः ॥२९॥

२९। 'यथा' 'समृद्धवेगाः' समृद्धः उद्भूतः वेगः गतिः येषां ते उद्भूत-

गतयः प्रचण्डवेगाः 'पतङ्गाः' 'नाशाय' मरणाय एव 'प्रदीप्तं' 'ज्वलनं' ज्वलन्तमग्निं 'विशन्ति', 'तथा' 'एव' 'समृद्धवेगाः' 'लोकाः' प्राणिनः (भुवनानि वा) 'अपि' 'नाशाय' मरणाय एव 'तव' 'वक्त्राणि' मुखानि 'विशन्ति' ।

29. As moths flying, with great velocity, enter into a flaming fire to their destruction, so also do (these) people enter thy mouths with tremendous speed.

लेलिह्यसे ग्रसमानः समन्ता-
ल्लोकान् समग्रान् वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य्य जगत्समग्रम्
भासस्तवोग्राः प्रतपन्ति विष्णो ॥३०॥

३० । [हे] 'विष्णो' 'ज्वलद्भिः' दीप्यमानैः 'वदनैः' वक्त्रैः 'लोकान्' 'ग्रसमानः' अन्तःप्रवेशयन् गिलन् [त्वं] [तान्] 'समन्तात्' सर्व्वासु दिक्षु, 'लेलिह्यसे' आस्वादयसि अतिशयेन भक्षयसि ; 'तव' 'उग्राः' क्रूराः तीव्राः 'भासः' दीप्तयः 'तेजोभिः' विस्फुरणैः 'समग्रं' समस्तं 'जगत्' 'आपूर्य्य' संव्याप्य 'प्रतपन्ति' सन्तापयन्ति ।

30. O Vishnu, in the act of devouring all (these) people, thou art eating them up from all sides with thy flaming mouths. Thy keen rays are heating the whole universe, having filled it with their effulgence.

आख्याहि मे को भवानुग्ररूपो
नमोऽस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवन्तमाद्यम्
न हि प्रजानामि तव प्रवृत्तिम् ॥३१॥

३१। 'उग्ररूपः' अतिक्रूराकारः 'भवान्' 'कः' [इति] 'मे' मह्यं 'आख्याहि' कथय; [हे] 'देववर' देवानां प्रधान, 'ते' तुभ्यं 'नमः' 'अस्तु'; 'प्रसीद' प्रसादं कुरु, प्रसन्नो भव; 'आद्यं' आदौ भवं 'भवन्त' 'विज्ञातुं' विशेषेण ज्ञातुम् 'इच्छामि', यतः 'हि' 'तव' 'प्रवृत्तिं' चेष्टां किमर्थमेवं प्रवृत्तोऽसि इति 'न' 'प्रजानामि'।

31. Tell me who thou art, of awful form. Salutation to thee, O Chief of the gods. Be gracious. I desire to have a clear knowledge of thee, the Primitive One, for I do not understand thy purpose.

श्रीभगवान् उवाच

कालोऽस्मि लोकक्षयकृत् प्रवृद्धो
लोकान् समाहर्तुमिह प्रवृत्तः।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः॥३२॥

३२ [अहं] 'लोकक्षयकृत्' लोकानां विनाशकर्त्ता 'प्रवृद्धः' वृद्धिं गतः [प्रथममुण्डके प्रथमखण्डस्य 'तपसा चीयते ब्रह्म' इति अष्टमश्लोको द्रष्टव्यः] (प्रवृद्धोऽत्युत्कटः इति श्रीधरः) 'कालः' अन्तकः अस्मि, 'इह' अस्मिन् काले (लोके वा) 'लोकान्' प्राणिनः 'समाहर्त्तुं' संहर्त्तुं ग्रसितुं 'प्रवृत्तः' नियुक्तः [अस्मि]; 'प्रत्यनीकेषु' अनीकानि अनीकानि प्रति तेषु प्रतिपक्षभूतेषु सैन्येषु 'ये' 'योधाः' योद्धारः 'अवस्थिताः' [ते] 'सर्वे' 'त्वां' (हन्तारं) 'ऋते' विना 'अपि' 'न' 'भविष्यन्ति' जीविष्यन्ति।

32. [The Lord said—] I am Death, the Destroyer

of the world, manifested in this enlarged form. I am now engaged in drawing back into me [a part of] the human race. All the warriors that are (arrayed) in the rival armies, shall cease to be, even without you (*i. e.*, even if you kill them not).

तस्मात्त्वमुत्तिष्ठ यशो लभस्व
जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन् ॥३३॥

३३। 'तस्मात्' (हेतोः) 'त्वम्' 'उत्तिष्ठ' युद्धाय उन्मुखो भव, उद्युक्तो भव ; 'यशः' कीर्त्तिं 'लभस्व' आप्नुहि ; 'शत्रून्' अरीन् 'जित्वा' पराभूय 'समृद्धं' समृद्धियुक्तं 'राज्यं' 'भुङ्क्ष्व' ; 'एते' [लोकाः] 'पूर्व्वम्' 'एव' 'मया' कालात्मना 'एव' 'निहताः' निहतप्रायाः (श्रीधरः) निश्चयेन हताः ; [हे] 'सव्यसाचिन्' (सव्येन वामहस्तेन साचितुं शरान् सन्धातुं शीलं यस्य सः तस्य सम्बोधनं) वामहस्तेनापि शरक्षेपकारिन् [त्वं] 'निमित्तमात्रं' निमित्तमेव त्वयैव निहताः एते इत्येवं लौकिकव्यपदेशास्पदं 'भव' ।

33. Therefore arise and gain renown, (and) conquering your foes, enjoy a prosperous kingdom. These (men) have already been slain by me ; be only the instrument (or apparent cause) [of their death], O Savyasáchin [*i. e.*, thou who canst shoot (arrows) even with the left hand].

द्रोणं च भीष्मं च जयद्रथं च
कर्णं तथाऽन्यानपि योधवीरान्।
मयाहतांस्त्वं जहि मा व्यथिष्ठाः
युध्यस्व जेतासि रणे सपत्नान् ॥३४॥

३४। 'त्वं' 'मया' 'हतान्' 'द्रोणं' 'च' 'भीष्मं' 'च' 'जयद्रथं' 'च' 'कर्णं' [च] 'तथा' 'अन्यान्' 'अपि' 'योधवीरान्' योद्धृश्रेष्ठान् 'जहि' घातय ; 'मा व्यथिष्ठाः' भयं मा कार्षीः ; 'युध्यस्व' युद्धं कुरु ; 'रणे' युद्धे 'सपत्नान्' शत्रून् 'जेता असि' जेष्यसि।

34. Kill Drona, Bhíshma, Jayadratha and Karna, as also the other chief warriors, who have been (really) slain by me. Be not pained. Fight, and you are sure to be the conqueror of your enemies in the battle.

सञ्जय उवाच

एतच्छ्रुत्वा वचनं केशवस्य
कृताञ्जलिर्वेपमानः किरीटी।
नमस्कृत्वा भूय एवाह कृष्णं
सगद्गदं भीतभीतः प्रणम्य ॥३५॥

३५। [सञ्जयः उवाच] 'केशवस्य' कृष्णस्य 'एतत्' पूर्व्वोक्तं 'वचनं' 'श्रुत्वा' 'किरीटी' अर्ज्जुनः 'वेपमानः' कम्पमानः 'कृताञ्जलिः' सम्पूटीकृतहस्तः सन् 'नमस्कृत्वा' [तथा] 'भीतभीतः' भीतादपि भीतः अतिभयाकुलः सन् 'प्रणम्य' [च] 'भूयः' 'एव' 'कृष्णं' 'सगद्गदं' गद्गदेन कण्ठकम्पनेन सह वर्त्तते इति

सगद्गदं यथा स्यात् तथा 'आह' उक्तवान्। ['भूयः एव प्रणम्य' इति वा अन्वयः]।

35. [Sanjaya said—] Having heard this speech of Kesava, he, the wearer of the crown (*i.e.*, Arjuna), trembling and saluting with joined palms, and bowing down in a frightened mood, spoke again to Krishna in a choked voice.

अर्जुन उवाच

स्थाने हृषीकेश तव प्रकीर्त्या
जगत् प्रहृष्यत्यनुरज्यते च।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्वे नमस्यन्ति च सिद्धसङ्घाः ॥३६॥

३६। [अर्ज्जुनः उवाच] [हे] 'हृषीकेश' सर्व्वेन्द्रियनियामक, 'तव' 'प्रकीर्त्त्या' माहात्म्यकीर्त्तनश्रवणेन [यत्] 'जगत्' 'प्रहृष्यति' प्रकर्षेण हर्षं प्राप्नोति, 'अनुरज्यते' अनुरागं प्राप्नोति 'च', [तथा] 'रक्षांसि' 'भीतानि' सन्ति 'दिशः' दिशः प्रति 'द्रवन्ति' गच्छन्ति, पलायन्ते, 'सर्व्वे' 'सिद्धसङ्घाः' सिद्धानां समूहाः 'च' नमस्यन्ति' त्वां नमस्कुर्व्वन्ति [एतत्] 'स्थाने' उचितं युक्तमेव ['स्थाने' इत्यव्ययम्]।

36. [Arjuna said—] O Hrishíkesha, it is right that the world is intensely delighted with thy praise and is devoted to thee and that the Rákshasas fly [from thee] affrighted in all directions and all the multitudes of Siddhas salute thee.

कस्माच्च ते न नमेरन् महात्मन्
गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास
त्वमक्षरं सदसत्तत्परं यत् ॥३७॥

३७। [हे] 'महात्मन्', 'ब्रह्मणः' हिरण्यगर्भस्य 'अपि' 'गरीयसे' गुरुतराय 'आदिकर्त्रे' आदिकारणाय [तुभ्यं] 'ते' सिद्धसङ्घाः 'कस्मात्' किमर्थं 'च' 'न' 'नमेरन्' नमस्कारं कुर्य्युः ? [हे] 'अनन्त', [हे] 'देवेश', [हे] 'जगन्निवास', 'त्वम्' 'अक्षरम्' अविनाशि ब्रह्म, [त्वमेव] 'सत्' व्यक्तं स्थूलं, 'असत्' अव्यक्तं सूक्ष्मं, 'यत्' 'तत्परं' ताभ्यां परं सदसदतीतं मूलकारणं ब्रह्म [तदपि त्वमेव] ।

37. [And] why should they not, O high-souled One, salute thee, the First Cause, who art greater even than [the lower] Brahman ? O Infinite One, O God of gods, Support of all the worlds, thou art the Imperishable, Being and Not-Being (*i. e.*, the gross and the subtle)), and (also) That which is beyond them.

त्वमादिदेवः पुरुषः पुराण-
स्त्वमस्य विश्वस्य परं निधानम् ।
वेत्ताऽसि वेद्यं च परं च धाम
त्वया ततं विश्वमनन्तरूप ॥३८॥

३८। 'त्वम्' 'आदिदेवः' देवानाम् आदिः जगतः स्रष्टृत्वात्, 'त्वं' 'पुराणः' अनादिः चिरन्तनः 'पुरुषः' ; [त्वं] 'अस्य' 'विश्वस्य' 'परं' प्रकृष्टं 'निधानं'

आश्रयस्थानं ; [त्वं] 'वेत्ता' ज्ञाता सर्व्वज्ञः इत्यर्थः, 'वेद्यं' वेदनार्हं ज्ञेयं 'परं' परमं 'धाम' स्थानं गृहं 'च' 'असि' ; [हे] 'अनन्तरूप', 'त्वया' 'विश्वं' 'ततं' व्याप्तं ।

38. Thou art the First of the gods (the Primal God), the Ancient (*i. e.*, Primeval) Person. Thou art the Supreme Resting-place of this Universe. Thou art the Knower and the Known, and the Highest Abode. O thou of endless forms, by thee is the universe pervaded.

वायुर्यमोऽग्निर्वरुणः शशाङ्कः
प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्वः
पुनश्च भूयोऽपि नमो नमस्ते ॥३९॥

३९ । 'त्वं' 'वायुः', 'यमः', 'अग्निः', 'वरुणः' जलाधिपः, 'शशाङ्कः' चन्द्रमाः, 'प्रजापतिः' विश्वकर्म्मा, 'प्रपितामहः' पितामहस्य ब्रह्मणः अपि पिता 'च' । 'नमः', 'ते' तुभ्यं 'नमः', 'सहस्रकृत्वः' सहस्रशः [सहस्र+कृत्वसुच् प्रत्ययः] [नमः] 'अस्तु', 'पुनः' 'च' 'नमः', 'भूयः' पुनः 'अपि' 'ते' तुभ्यं नमः ।

39. Thou art Váyu (the God of wind), Yama (the God of death), Agni (the God of fire), Varuna (the God of the ocean), the Moon, Prajápati (*i. e.*, the Progenitor, the First embodied Being,) and the Great-grandsire. Salutation ! Salutation to thee ! A thousand salutations ! Salutation to thee again and again !

नमः पुरस्तादथ पृष्ठतस्ते

नमोऽस्तु ते सर्वत एव सर्व ।

अनन्तवीर्यामितविक्रमस्त्वं

सर्वं समाप्नोषि ततोऽसि सर्वः ॥४०॥

४०। 'ते' तुभ्यं 'पुरस्तात्' पूर्व्वस्यां दिशि सम्मुखे अग्रे 'नमः', 'अथ' अनन्तरं 'पृष्ठतः' पश्चाद्भागे 'नमः' ; [हे] 'सर्व्व' सर्व्वात्मन्, 'सर्व्वतः' सर्व्वासु दिक्षु 'एव' 'ते' तुभ्यं 'नमः' 'अस्तु'। 'त्वम्' 'अनन्तवीर्य्यामितविक्रमः' अनन्तं वीर्य्यं सामर्थ्यं अमितः अपरिमितः असीमः विक्रमः पराक्रमश्च यस्य सः। [त्वं] 'सर्व्वं' समस्तं जगत् 'समाप्नोषि' सम्यक् अन्तर्व्वहिश्च व्याप्नोषि, 'ततः' तस्मात् 'सर्व्वः' सर्व्वात्मकः असि त्वदतिरिक्तं किमपि नास्तीत्यर्थः ।

40. Salutation to thee in front ! Then salutation (to thee) behind ! Salutation be to thee on all sides, O thou all. Thou art of infinite power and of immeasurable prowess. Thou thoroughly pervadest all ; wherefore thou art all.

सखेति मत्वा प्रसभं यदुक्तं

हे कृष्ण हे यादव हे सखेति ।

अजानता महिमानं तवेदं

मया प्रमादात् प्रणयेन वापि ॥४१॥

यच्चाऽवहासार्थमसत्कृतोऽसि

विहारशय्यासनभोजनेषु ।

एकोऽथवाऽप्यच्युत तत्समक्षं

तत् क्षामये त्वामहमप्रमेयम् ॥४२॥

४१, ४२। [हे] 'अच्युत' (स्वरूपसामर्थ्यात् न च्युतः च्यवते वा इत्यच्युतः तस्य सम्बोधनम्) अविनाशिन्, 'तव' 'इदं' 'महिमानं', विश्वरूपं माहात्म्यम् 'अजानता' 'मया' 'प्रमादात्' चित्तविक्षेपात् वस्तुविवेकासामर्थ्यात् भ्रमवशात् 'प्रणयेन' 'स्नेहेन 'वा' 'अपि' 'सखा' समानवयाः वयस्यः 'इति' 'मत्वा' ज्ञात्वा [हे] 'कृष्ण', [हे] 'यादव' यदुवंशोद्भव, [हे] 'सखे' 'इति' ['सखेति' सन्धिरार्षः] 'प्रसभं' बलात् अभिभूय आकुलीभूय हठात् तिरस्कारेण (प्रसभमित्यव्ययम्) 'यत्' 'उक्तं' उक्तवानस्मि, 'विहारशय्यासनभोजनेषु' विहारः क्रीडा भ्रमणं वा शय्या शयनं आसनं उपवेशनं भोजनं भक्षणं तेषु 'एकः' एकाकी सखीन् विना विजने स्थितः सन् 'अथवा' 'तत्समक्षं' तेषां सखीनां समक्षं पुरतः अपि 'अवहासार्थं' परिहासप्रयोजनाय [त्वं] 'यत्' 'असत्कृतः' अवज्ञातः अवमानितः 'च' 'असि' 'तत्' सर्व्वं अपराधजातं' 'अहं 'अप्रमेयं' अचिन्त्यप्रभावं 'त्वां' क्षामये' क्षमां कारयामि।

41, 42. O Immutable One, I beseech thee, the Immeasurable, to pardon whatever has been rashly said by me, such as, 'O Krishna, O Yádava, O friend,' through carelessness or from affection, thinking thee (merely) as a friend, not knowing this thy greatness (*i. e.*, thy greatness as revealed in this universal form), and whatever dishonour I have done to thee by way of jest, while walking (or at play), or (lying) in bed, or sitting (together), or at meals, whether alone or in the presence of them (friends).

पिताऽसि लोकस्य चराचरस्य
त्वमस्य पूज्यश्च गुरुर्गरीयान्।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो
लोकत्रयेऽप्यप्रतिमप्रभावः ॥४३॥

४३। 'अप्रतिमप्रभाव' नास्ति प्रतिमा सादृश्यं यस्य सः अप्रतिमः, अप्रतिमः अनुपमः तुलनाशून्यः प्रभावः तेजः सामर्थ्यं यस्य सः, तस्य सम्बोधनम् निरुपम-प्रभाव निरतिशयप्रभाव इत्यर्थः, 'त्वम्' 'अस्य' 'चराचरस्य' स्थावरजङ्गमात्मकस्य 'लोकस्य' भुवनस्य जगतः 'पिता' जनयिता 'असि'; [त्वं] 'पूज्यः' पूजार्हः, 'गरीयान्' गुरुतरः 'गुरुः' शास्त्रोपदेष्टा 'च' [असि]; 'लोकत्रये' त्रिभुवने स्वर्गमर्त्तरसातले 'त्वत्समः' त्वत्तुल्यः [कः] 'अपि' 'न' 'अस्ति', 'अभ्यधिकः' त्वत्तः अधिकः 'अन्यः' 'कुतः' कुत्र [स्यात्]? [कुत्रापि नास्तीत्यर्थः]।

43. O thou of matchless power, thou art the Father of the world, moving and unmoving, (*i.e.* of the world of animate and inanimate things). Thou art its great and adorable Preceptor. There is none equal to thee in the three worlds. How can there be another greater (than thee)?

तस्मात् प्रणम्य प्रणिधाय कायं
प्रसादये त्वामहमीशमीड्यम्।
पितेव पुत्रस्य सखेव सख्युः
प्रियः प्रियायार्हसि देव सोढुम् ॥४४॥

४४। 'तस्मात्' 'अहं' 'कायं' शरीरं 'प्रणिधाय' नीचैः कृत्वा दण्डवत् भूमौ निपात्य 'प्रणम्य' प्रकर्षेण नत्वा नमस्कृत्य 'ईड्यं' स्तुत्यम् 'ईशं' जगतां नियन्तारं 'त्वां' 'प्रसादये' प्रसादं कारये प्रसादयामि, 'पिता पुत्रस्य इव' पुत्रस्य अपराधं पिता यथा क्षमते तद्वत्, 'सखा सख्युः इव' सख्युः अपराधं सखा इव, सखा यथा क्षमते तद्वत् 'प्रियः' कान्तः 'प्रियायाः कान्तायाः 'इव' प्रियायाः अपराधं यथा प्रियः क्षमते तद्वत्, [च] 'देव' [एवं त्वं मामपि] 'सोढुं' मत्कृतं क्षन्तु-

मित्यर्थः 'अर्हसि' योग्यो भवसि शक्तो भवसि। ['प्रियायाः अर्हसि' इत्यत्र सन्धिरार्षः]।

44. Therefore, bowing down by prostrating the body, I would propitiate thee, the adorable God. Be pleased to bear with me, O God, even as a father (bears) with his son, a friend with his friend, a lover with his beloved.

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा
भयेन च प्रव्यथितं मनो मे।
तदेव मे दर्शय देव रूपं
प्रसीद देवेश जगन्निवास ॥४५॥

४५। 'अदृष्टपूर्वं पूर्वम् अदृष्ट' (मया अन्येन वा केनचित्) [इदं तव विश्वरूपं] 'दृष्ट्वा' 'हृषितः' हृष्टः सञ्जातहर्षः 'अस्मि', 'भयेन' 'मे' मम 'मनः' 'प्रव्यथितं' विचलितं 'च' ; [तस्मात्] [हे] 'देव', 'तत्' मदभीष्ट मम सुखकरं 'एव' 'रूपं' (यत् मत्सुखम इत्यर्थः) 'मे' मह्यं 'दर्शय', [हे] 'देवेश', [हे] 'जगन्निवास' जगदाश्रय, 'प्रसीद' प्रसन्नो भव प्रसादं मे कुरु।

45. Having seen what was unseen before (*i.e.*, thy manifested world-form), I am delighted; and (yet) my mind is highly agitated with fear. Show me that (thy other) form, O God. Be gracious, O God of gods, Support of (all) the worlds.

किरीटिनं गदिनं चक्रहस्त-
मिच्छामि त्वां द्रष्टुमहं तथैव।
तेनैव रूपेण चतुर्भुजेन
सहस्रबाहो भव विश्वमूर्ते ॥४६॥

४६। 'अहं' 'त्वां' 'तथा एव' पूर्ब्ववत् इत्यर्थः 'किरीटिनं' किरीटवन्तं मुकुटशोभितं 'गदिनं' गदावन्तं 'चक्रहस्तं' चक्रं हस्ते यस्य तं चक्रपाणिं [च] 'द्रष्टुम्' 'इच्छामि', [हे] 'सहस्रबाहो' अगन्यहस्त इत्यर्थः, [हे] 'विश्वमूर्त्ते' विश्वरूपिन्, [त्वं] 'तेन एव चतुर्भुजेन रूपेण' विश्वरूपम् उपसंहृत्य वसुदेव-पुत्ररूपेण विशिष्टः सन् 'भव' आविर्भव।

46. I wish to see thee with the crown and mace and with the discus in (thy) hand, as before. O Thousand-armed, O thou whose form the universe is, assume that four-armed form (again).

श्रीभगवान् उवाच

मया प्रसन्नेन तवार्जुनेदं
रूपं परं दर्शितमात्मयोगात्।
तेजोमयं विश्वमनन्तमाद्यं
यन्मे त्वदन्येन न दृष्टपूर्वम् ॥४७॥

४७। [श्रीभगवान् उवाच] [हे] 'अर्ज्जुन', 'प्रसन्नेन' त्वयि कृपावता 'मया' 'आत्मयोगात्' आत्मनः ऐश्वर्य्यस्य प्रभावात् 'तव' त्वदीप्सितम्, 'इदं' 'परं' उत्तमं सर्व्वोत्कृष्टं 'रूपं' विश्वरूपं 'दर्शितं' 'यत्' 'मे' मम 'तेजोमयं' प्रचुरतेजःसम्पन्नं

'विश्वं' समस्तं विश्वात्मकम् इत्यर्थः 'अनन्तम्' अन्तरहितम् 'आद्यम्' आदौ भवं [रूपं] 'त्वदन्येन' त्वत्तः अन्येन केनापि जनेन 'न दृष्टपूर्व्वम्' पूर्व्वं न दृष्टम् ।

47. [The Lord said—] Pleased (with you), O Arjuna, I have shown you, by my own divine power, this supreme form desired by you, which resplendent, universal, boundless and primeval form of mine was not seen by any one before, except (now) by you.

न वेदयज्ञाध्ययनैर्न दानै-
र्न च क्रियाभिर्न तपोभिरुग्रैः ।
एवंरूपः शक्य अहं नृलोके
द्रष्टुं त्वदन्येन कुरुप्रवीर ॥४८॥

४८। [हे] 'कुरुप्रवीर' कुरुश्रेष्ठ, 'नृलोके' मनुष्यलोके 'त्वदन्येन' त्वत्तः अन्येन केन जनेन 'अपि' 'एवं रूपः' एवं यथादर्शितं रूपं विश्वरूपं यस्य सः 'अहं' वेदयज्ञाध्ययनैः वेदानां यज्ञानां यज्ञविद्यानां च अध्ययनैः पठनैः 'न' 'द्रष्टुं' ज्ञातुं 'शक्यः', [तथा] 'न' 'दानैः', 'न' 'च' 'क्रियाभिः' श्रौतस्मार्त्तादि-कर्म्मभिः, 'न' 'उग्रैः' घोरैः 'तपोभिः' शरीरपीडनैः चान्द्रायणादिव्रतैः [द्रष्टुं शक्यः] ['शक्यः अहं' सन्धिरार्षः] ।

48. 'O Chief of the Kurus, neither by the study of the Vedas, nor by the performance of sacrifices, nor by gifts, nor rites, nor severe penances, can I be seen in this form by any one other than yourself in this human world.

मा ते व्यथा मा च विमूढभावो
दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं
तदेव मे रूपमिदं प्रपश्य ॥४९॥

४९ । 'मम' 'ईदृक्' ईदृशं यथादर्शितं 'घोरं' भयङ्करम् 'इदं' 'रूपं' 'दृष्ट्वा' 'ते' तव 'व्यथा' भयनिमित्ता पीडा भयं 'मा' [अस्तु], 'विमूढभावः' व्याकुलचित्तता चित्तविक्षेपः 'च' 'मा' [अस्तु] ; 'त्वं' 'व्यपेतभीः' विगतभयः, 'प्रीतमनाः' सन्तुष्टचित्तः [च] [सन्] 'पुनः' भूयः 'मे' मम 'तत् एव' चतुर्भुजं तव दृष्टम् 'इदं' 'रूपं' प्रपश्य' ।

49. Be not frightened or bewildered at seeing this awful form of mine. Freed from fear and with a joyful heart, behold again that [usual] form of mine.

सञ्जय उवाच

इत्यर्जुनं वासुदेवस्तथोक्त्वा
स्वकं रूपं दर्शयामास भूयः ।
आश्वासयामास च भीतमेनं
भूत्वा पुनः सौम्यवपुर्महात्मा ॥५०॥

५० । [सञ्जयः उवाच] 'वासुदेवः' कृष्णः 'अर्ज्जुनम्' 'इति' एवं 'तथा' तथाभूतं वचनम् 'उक्त्वा' 'भूयः' 'स्वकं' स्वीयं परिचितपूर्व्वं चतुर्भुजं 'रूपं' 'दर्शयामास' दर्शितवान् ; 'पुनः' 'च' [सः] 'महात्मा' (वासुदेवः) 'सौम्यवपुः' प्रसन्नदेहः 'भूत्वा' 'भीतम्' 'एनम्' अर्ज्जुनम् 'आश्वासयामास' आश्वासितवान् ।

50. Having thus spoken to Arjuna, Vásudeva again

showed him his own (human) form; and the high-souled One, assuming again a gentle form, cheered up this affrighted one.

अर्जुन उवाच

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥५१॥

५१। [अर्जुनः उवाच] [हे] 'जनार्दन' (१०।१८ श्लोके द्रष्टव्यः), 'इदं' 'सौम्यं' शान्तं प्रसन्नं 'तव' 'मानुषं' 'रूपं' 'दृष्ट्वा' 'इदानीम्' अधुना 'अहं' 'सचेताः' स्वस्थहृदयः प्रसन्नचित्तः 'संवृत्तः' जातः, 'प्रकृतिं' स्वभावं 'गतः' प्राप्तः [च] प्रकृतिस्थश्च इत्यर्थः 'अस्मि' ।

51. [Arjuna said—] O Janárdana, seeing this thy gentle human form, I am now become of a right mind (*i.e.*, composed in my mind) and am restored to my own normal state.

श्रीभगवान् उवाच

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥५२॥

५२। [श्रीभगवान् उवाच] 'मम' 'इदं' 'रूपं' विश्वरूपं 'यत्' [त्वं] 'दृष्टवान्' 'असि' [तत्] 'सुदुर्दर्शं' सुष्ठु दुःखेन दर्शः दर्शनं यस्य तत् अत्यन्तं द्रष्टुमशक्यं : 'देवाः' 'अपि' 'अस्य' 'रूपस्य' 'नित्यं' सर्व्वदा 'दर्शनकाङ्क्षिणः' दर्शनेच्छवः, दर्शनमिच्छन्ति परन्तु न पश्यन्ति इति भावः ।

52. [The Lord said—] This form of mine which you have [just] seen, is very hard to see. Even the gods are always desirous of seeing it.

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥५३॥

५३ । [त्वं] 'यथा' 'मां' 'दृष्टवान्' 'असि' 'एवंविधः' यथादर्शितप्रकारः 'अहं' 'न' वेदैः, 'न' 'तपसा' उग्रेण व्रतेन, 'न' 'दानेन', 'न च' 'इज्यया' यज्ञेन (पूजया वा) 'द्रष्टुं' 'शक्यः' ।

53. Neither by (the study of) the Vedas, nor by penance, nor by gifts, nor by sacrifices, can I be seen as you have seen me.

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥५४॥

५४ । [हे] 'परन्तप' शत्रुतापन 'अर्जुन', 'अनन्यया' मदेकनिष्ठया 'भक्त्या' 'तु' 'एवंविधः' विश्वरूपप्रकारः 'अहं' 'तत्त्वेन' परमार्थतः 'ज्ञातुं', 'द्रष्टुं' साक्षात् कर्तुं 'च' 'प्रवेष्टुं' 'च' 'शक्यः' 'अस्मि' । ['शक्यः अहम्' सन्धिरार्षः] ।

54. [But] O harasser of foes, Arjuna, by whole-hearted devotion [alone], can I, of this form, be truly known, seen, and entered into.

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥५५॥

५५ । [हे] 'पाण्डव' पाण्डुतनय अर्जुन, 'यः' 'मत्कर्मकृत्' मदर्थं कर्म्म

करोति ; 'मत्परमः' अहमेव परमः पुरुषार्थः यस्य सः, यः मामेव परमां गतिं प्रतिपद्यते, 'मद्भक्तः' ममैव भक्तः आश्रितः, यः मामेव भजते, 'सङ्गवर्ज्जितः' पुत्रकलत्रादिषु स्पृहाशून्यः आसक्तिभाववर्ज्जितः, [तथा] 'सर्व्वभूतेषु' सकलप्राणिषु 'निर्व्वैरः' शत्रुभावरहितः, 'सः' 'माम्' 'एति' प्राप्नोति [नान्यः इति भावः] ।

55. O Pàndava (Arjuna), he who does (his) works for my sake, to whom I (alone) am the supreme goal, who is devoted [only] to me, who is free from attachment [to lower objects] and who is without enmity towards any created being, comes to me.

भक्तियोगो नाम द्वादशोऽध्यायः



अर्जुन उवाच

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१॥

१ । [अर्ज्जुनः उवाच] 'एवं' पूर्व्वोक्तरूपेण सर्व्वकर्म्मार्पणादिना 'सतत-युक्ताः' नैरन्तर्य्येण त्वयि समाहिताः [सन्तः] 'ये' 'भक्ताः' 'त्वां' विश्वरूपं सगुण-मित्यर्थः 'पर्य्युपासते' ध्यायन्ति, 'ये' 'च' 'अपि' 'अव्यक्तम्' अकरणगोचरं निर्व्विशेषं निर्गुणमित्यर्थः 'अक्षरं' विनाशशून्यं [ब्रह्म] [पर्य्युपासते], 'तेषां' उभयेषां मध्ये) 'के' 'योगवित्तमाः' योगं समाधिं विदन्तीति योगविदः तेषु श्रेष्ठाः अतिशयेन योगविदः श्रेष्ठाः योगिनः ?

1. [Arjuna said—, Of the devotees who, thus ever in communion [with thee], adore thee (as manifested in the world), and those who adore the Unmanifested and Imperishable, which are the best versed in *yoga* ?

श्रीभगवान् उवाच

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥२॥

२ । 'ये' [भक्ताः] 'मयि' विश्वरूपे परमेश्वरे सगुणे ब्रह्मणि 'मनः' 'आवेश्य'

समाधाय एकाग्रं कृत्वा 'नित्ययुक्ताः' सततयुक्ताः 'परया' प्रकृष्टया 'श्रद्धया' 'उपेताः' युक्ताः [च सन्तः] 'मां' 'उपासते' आराधयन्ति 'ते' 'युक्ततमाः' श्रेष्ठयोगिनः 'मे' मम 'मताः' अभिप्रेताः ।

2. [The Lord said—] Those (devotees) who, fixing their minds on me (as the Manifested) and being ever-composed and possessed of supreme faith, worship me, are deemed by me (to be) the best of devotees.

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥३॥
संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥४॥

३, ४ । 'तु' पक्षान्तरे 'ये' 'इन्द्रियग्रामं' इन्द्रियाणां समूहं 'संनियम्य' संहृत्य 'सर्व्वत्र' सर्व्वस्मिन् काले (शङ्करः) विषये (मधुसूदनः) 'समबुद्धयः' समा तुल्या बुद्धिर्येषां ते इष्टानिष्टप्राप्तौ तुल्यज्ञानाः सुहृन्मित्रोदासीनेषु तुल्यदृष्टयः वा, 'सर्व्वभूतहिते' सर्व्वेषां भूतानां प्राणिनां हिते मङ्गलसाधने 'रताः' नियुक्ताः [सन्तः] 'अनिर्देश्यं' शब्देन निर्देष्टुम् अशक्यम् अशब्दगोचरम्, 'अव्यक्तम्' इन्द्रियाणाम् अगोचरं रूपादिहीनं 'सर्व्वत्रगं' सर्व्वत्रगामि सर्व्वव्यापि इत्यर्थः 'अचिन्त्यम्' इन्द्रियागोचरत्वात् चिन्तायाः अविषयं चिन्तातीतं 'कूटस्थं' सत्यवत् प्रतीतं मिथ्याभूतं वस्तु कूटं तस्मिन् स्थितं मिथ्याभाव-मायाप्रपञ्चे अवस्थितं [अथवा कूटवत् राशिवत् (नाभिवत् वा) अविकम्प्यरूपेण स्थितं] 'अचलं' निर्व्विकारं 'ध्रुवं' नित्यं शाश्वतं ह्रासादिरहितम् 'अक्षरं' निर्व्विशेषं अविनाशि ब्रह्म 'पर्य्युपासते' ध्यायन्ति 'ते' [अपि] 'माम्' 'एव' प्राप्नुवन्ति ।

3, 4. But those who, restraining all the senses, impartial to all, and devoted to the welfare of all beings, adore the indefinable, unmanifested, all-pervading, unthinkable, unchangeable, immutable, eternal, (and) imperishable [Brahman], also reach me.

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥५॥

५। 'तेषां' 'अव्यक्तासक्तचेतसां' अव्यक्ते अतिसूक्ष्मे निर्व्विशेषे निर्गुणे अक्षरे परब्रह्मणि आसक्तं अभिनिविष्टं चेतो येषां तेषां निर्गुणब्रह्मचिन्तनपराणां अक्षरोपासकानां 'क्लेशः' आयासः 'अधिकतरः', 'हि' यतः 'अव्यक्ता' अव्यक्तविषया अक्षरविषयका 'गतिः' निष्ठा मनोवृत्तिः 'देहवद्भिः' देहभृद्भिः देहाभिमानिभिः जनैः 'दुःखं' यथा स्यात् तथा दुःखेन कष्टेण इति यावत् 'अवाप्यते' लभ्यते ।

5. The trouble of those whose minds are fixed on the Unmanifested, is [however] greater ; for the realisation of the Unmanifested is with difficulty attained by embodied beings.

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥६॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि न चिरात् पार्थ मय्यावेशितचेतसाम् ॥७॥

६, ७। 'ये' 'तु' 'सर्व्वाणि' कर्म्माणि 'मयि' सगुणे ईश्वरे 'संन्यस्य' समर्प्य

मत्पराः अहं परः प्रकृष्टप्रीतिविषयः येषां ते मन्निष्ठाः सन्तः 'अनन्येन' न विद्यते अन्यः आलम्बः यस्मिन् तेन एकान्तेन 'एव' 'योगेन' समाधिना 'मां' 'ध्यायन्तः' चिन्तयन्तः 'उपासते', [तेषां] 'पार्थ', 'मयि' विश्वरूपे 'आवेशितचेतसां' आवेशितं एकाग्रतया प्रवेशितं समाहितं चेतो यैः येषां वा तेषां मदुपासनैकपराणाम् 'अहं' 'न चिरात्' अचिरेण क्षिप्रमेव 'मृत्युसंसार-सागरात्' मृत्युः अज्ञानं तेन युक्तः यः संसारः स एव सागरः, सागर इव (दुस्तरत्वात्) तस्मात् 'समुद्धर्त्ता' सम्यक् उद्धर्त्ता ऊर्द्ध्व' नेता उद्धारकारी 'भवामि'।

6, 7. But those whose minds are fixed on me (as the Manifested) and who, offering all actions to me and regarding me as the Supreme (Goal or Object of love), worship me, meditating on me with whole-hearted devotion,—I deliver them, without delay, O Pártha, from the deathlike ocean of the world.

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥८॥

८। [अतः] [त्वं] 'मयि' विश्वरूपे ईश्वरे सगुणे ब्रह्मणि 'एव' 'मनः' 'आधत्स्व' स्थापय 'मयि' 'बुद्धिं' 'निवेशय' सर्व्वदा माम् एव चिन्तय इत्यर्थः। [एवं कुर्व्वन्] 'अतः ऊर्द्ध्वं' एतद्देहान्ते, प्राकृतजीवनावसाने वा 'मयि' शुद्धे ब्रह्मणि (मधुसूदनः) 'एव' 'निवसिष्यसि' निवत्स्यसि मदात्मना निवासं करिष्यसि, [अत्र] 'संशयः' 'न' [अस्ति]। 'एव अत ऊर्द्ध्वं' इत्यत्र सन्ध्यभावः श्लोकपूरणार्थः।

8. [Therefore] Fix your mind on me only. Apply your understanding to me. You shall hereafter live in me. There is no doubt [about it].

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥९॥

९। [हे] 'धनञ्जय', 'अथ' (संशयसूचकमव्ययम्) पक्षान्तरे, यदि 'मयि' 'चित्तं' 'स्थिरम्' अचलं यथा स्यात् तथा 'समाधातुं' धारयितुं स्थापयितुं 'न शक्नोषि' 'ततः' तर्हि 'अभ्यासयोगेन, चित्तस्य एकस्मिन् आलम्बने सर्व्वतः प्रत्याहृत्य पुनः पुनः स्थापनम् अभ्यासः स एव योगः (तत्पूर्व्वको योगः समाधिर्वा) तेन मदनुस्मरणरूपेण अनुशीलनेन 'माम्' 'आप्तुं' प्राप्तुम् 'इच्छ' प्रार्थयस्व, प्रयत्नं कुरु ।

9. But if, O Dhananjaya, you are unable to fix your mind steadfastly on me, then strive to reach me by means of constant practice [as taught in ch. VI.]

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि ॥१०॥

१०। [यदि पुनः] 'अभ्यासे' उक्तलक्षणे अनुशीलने 'अपि' 'असमर्थः' अशक्तः 'असि', [तर्हि] 'मत्कर्मपरमः' मदर्थं मत्प्रीणनार्थं कर्म्म मत्कर्म्म तत् परमं प्रधानं यस्य सः मत्कर्म्मप्रधानः 'भव', 'मदर्थं' मत्प्रीत्यर्थं 'कर्म्माणि' 'कुर्व्वन्' 'अपि' 'सिद्धिं' (ब्रह्मभावलक्षणामिति, मधुसूदनः) योगं (शङ्करः) मोक्षं (श्रीधरः) 'अवाप्स्यसि' प्राप्स्यसि ।

10. If you are incapable even of (such) practice, (then) be intent on doing works for me; (for) even by doing works for me, you shall attain perfection.

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥११॥

११। 'अथ' यदि 'एतत्' मत्प्रीत्यर्थं कर्म्म 'कर्त्तुं' 'अशक्तः' 'असि', 'ततः' तर्हि 'मद्योगं' मदेकशरणत्वं 'आश्रितः', 'यतात्मवान्' संयतचित्तः (यतः संयतः संयतसर्व्वेन्द्रियः 'आत्मवान्' विवेकी च इति मधुसूदनः) [च सन्] 'सर्व्वकर्म्मफलत्यागं' सर्व्वेषां कर्म्मणां फलसंन्यासं 'कुरु' फलाभिसन्धिं त्यज इत्यर्थः ।

11. Even if you are unable to do this, then taking refuge in union with me and being self-controlled, renounce the fruits of all actions.

श्रेयो हि ज्ञानमभ्यासाज् ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात् कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥१२॥

१२। [यतः] 'अभ्यासात्' (सम्यक्ज्ञानरहितात् इत्यर्थः) 'ज्ञानं' (युक्तिसहितोपदेशपूर्व्वकम् इति भावः) शब्दयुक्तिभ्याम् आत्मनिश्चयः (मधुसूदनः) 'श्रेयः' प्रशस्ततरं श्रेष्ठं, 'ज्ञानात्' 'ध्यानं' ज्ञानपूर्व्वकम् आत्मस्वरूपचिन्तनं 'विशिष्यते' विशिष्टं अतिशयितं भवति, ध्यानात्' 'कर्म्मफलत्यागः' [विशिष्यते] 'त्यागात्' कर्म्मफलासक्तिनिवृत्त्या: 'अनन्तरं' पश्चात् 'शान्तिः' उपरतिः उपशमः आत्यन्तिकसंसारनिवृत्तिरूपः सर्व्वोपरमः [भवति] ।

12. [For] Knowledge is better than practice; meditation is superior to knowledge; renunciation of the fruits of actions, [superior] to meditation; after renunciation (comes) peace [for ever.]

अद्वेष्टा सर्व्वभूतानां मैत्रः करुण एव च।
निर्म्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥१३॥
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥१४॥

१३, १४। 'यः' 'मद्भक्तः' मयि भक्तियुक्तः मत्सेवकः 'सर्व्वभूतानाम् अद्वेष्टा' सर्व्वाणि भूतानि आत्मत्वेन हि यः पश्यति (उत्तमेषु द्वेषशून्यः), 'मैत्रः' समेषु मित्रभावापन्नः, 'करुणः' हीनेषु दुःखितेषु दयायुक्तः 'एव' 'च' [तथापि] 'निर्म्ममः' ममताशून्यः ममप्रत्ययवर्ज्जितः, 'निरहङ्कारः' निर्गताहंप्रत्ययः आत्माभिमानरहितः 'समदुःखसुखः' सुखदुःखप्राप्तौ हर्षविषादरहितः, समे सुखदुःखे यस्य सः इति वा 'क्षमी' क्षमाशीलः 'सततं' नित्यं 'सन्तुष्टः' लाभालाभे च प्रसन्नचित्तः, 'योगी' अप्रमत्तः समाहितचित्तः, 'यतात्मा' संयतस्वभावः, 'दृढनिश्चयः' दृढः स्थिरः [मद्विषये] निश्चयः अध्यवसायः यस्य सः आत्मतत्त्वविषये स्थिराध्यवसायः, 'मय्यर्पितमनोबुद्धिः' मयि अर्पिते स्थापिते मनोबुद्धी (संकल्पविकल्पात्मकं मनः अध्यवसायलक्षणा बुद्धिः ते) येन एवंभूतः 'सः' 'मे' मम 'प्रियः'।

13, 14. That devotee of mine who hates no being, who is friendly and compassionate, who [yet] is free from attachment and egotism, who is the same in pain and pleasure, who is forgiving, ever content, devoted, self-controlled, (and) resolute in purpose, and whose mind and understanding are dedicated to me, is dear to me.

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥१५॥

१५। 'यस्मात्' मद्भक्तात् 'लोकः' जनः 'न' 'उद्विजते' उद्वेगं भयप्रयुक्तां

क्षोभं गच्छति, 'यः' 'च' 'लोकात्' 'न' 'उद्विजते' चित्तविकारं प्राप्नोति, 'यः' [च] 'हर्षामर्षभयोद्वेगैः' हर्षः स्वस्य इष्टलाभे उल्लासः अमर्षः परस्य उत्कर्षे असहनं भयं त्रासः उद्वेगः भयादिनिमित्तः चित्तक्षोभः, एतैः विमुक्तः यः 'सः' 'च' 'मे' 'प्रियः' ।

15. He, too, by whom the world is not troubled and who is not troubled by the world, and who is free from joy, jealousy, fear and anxiety, is dear to me.

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥१६॥

१६ । 'यः' 'मद्भक्तः,' 'अनपेक्षः' यस्य विषयेषु अपेक्षा आकाङ्क्षा नास्ति सः, यदृच्छया लब्धे अर्थे अपि निस्पृहः, 'शुचिः' बाह्याभ्यन्तरशौचसम्पन्नः शुद्धः पवित्रः, 'दक्षः' अनलसः कर्म्मनिपुणः 'उदासीनः' निःसम्बन्धः निर्लिप्तः (पक्षपातरहितः वा), 'गतव्यथः' गता व्यथा यस्य सः अपकृतेऽपि मनःपीडाशून्यः विगतसन्तापः 'सर्व्वारम्भपरित्यागी' सर्व्वान् आरम्भान् अहङ्कारजातान् उद्यमान् परित्यक्तुं शीलं यस्य सः, 'सः' 'मे' 'प्रियः' ।

16. That devotee of mine who depends on nothing, who is pure, diligent, unattached, [and] free from anguish, and renounces all [egotistic] undertakings, is dear to me.

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः ॥१७॥

१७ । 'यः' 'न हृष्यति' इष्टं प्राप्य हर्षं न गच्छति, 'न द्वेष्टि' अनिष्टं प्राप्य

क्रोधं विरागं वा न गच्छति, 'न शोचति', इष्टवियोगे शोकं न करोति, 'न काङ्क्षति' अप्राप्तम् अर्थं न इच्छति, 'यः' 'शुभाशुभपरित्यागी' शुभाशुभे सुखसाधनदुःखसाधने कर्मणी (पुण्यपापे इति शङ्करः श्रीधरश्च) परित्यक्तुं शीलं यस्य सः, 'भक्तिमान्' मद्भक्तियुक्तः, 'सः' 'मे' 'प्रियः'।

17. He who neither rejoices, nor hates, nor grieves, nor desires, who renounces [both] good and evil (*i. e.*, the pleasant and the painful), [and] is full of devotion [to me], is dear to me.

समः शत्रौ च मित्रे च तथा मानापमानयोः।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥१८॥
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः ॥१९॥

१८, १९। 'शत्रौ' 'च' 'मित्रे' 'च' 'समः' एकरूपः, 'तथा' 'मानापमानयोः' [समः] हर्षविषादशून्यः इत्यर्थः, 'शीतोष्णसुखदुःखेषु' शीतोष्णयोः सुखदुःखयोः च 'समः' 'सङ्गविवर्जितः' आसक्तिरहितः क्वचिदपि अनासक्तः, 'तुल्यनिन्दास्तुतिः' निन्दा च स्तुतिश्च ते तुल्ये यस्य सः, 'मौनी' संयतवाक् 'येन केनचित्' यथालब्धेन शरीरस्थितिमात्रेण (शङ्करः) 'सन्तुष्टः', 'अनिकेतः' निकेतः आश्रयः निवासः नियतो न विद्यते यस्य सः नियतवासशून्यः आवासहीनः "अनागारः" 'स्थिरमतिः' स्थिरा मतिः (परमार्थवस्तुविषया इति मधुसूदनः) यस्य सः व्यवस्थितचित्तः, 'भक्तिमान्' [च यः] 'नरः' [सः] 'मे' 'प्रियः'।

18, 19. That man who is the same to friend and foe, as also in honour and dishonour, in cold and heat, [and] in pleasure and pain; who is free from attachment; to whom censure and praise are alike; [who is]

silent [in habit], content with anything whatsoever [that comes of itself], homeless (*i. e.*, unattached to a particular habitation), steady-minded, [and] full of devotion, is dear to me.

ये तु धर्म्म्यामृतमिदं यथोक्तं पर्य्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥२०॥

२० । 'ये' 'तु' 'श्रद्दधानाः' श्रद्धां धारयन्तः श्रद्धान्विताः 'मत्परमाः' अहं परमः निरतिशया गतिः येषां ते मदेकाश्रयाः ईश्वरपरायणाः इत्यर्थः 'भक्ताः' 'यथोक्तम्' उक्तप्रकारम् 'इदं' 'धर्म्मामृतं' धर्म्ममेव अमृतं अमृतसाधनत्वात् [धर्म्म्यामृतमिति वा पाठः] 'पर्य्युपासते' अनुतिष्ठन्ति, 'ते' 'मे' 'अतीव' 'प्रियाः' [भवन्ति] ।

20. Those devotees who, being full of faith and regarding me as the Supreme (Goal), partake of this ambrosia of dharma (*i. e.*, observes or follows this law or religion giving immortality to its followers), are exceedingly dear to me.

क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशोऽध्यायः

—:*:—

श्रीभगवान् उवाच

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥१॥ *

१। [श्रीभगवान् उवाच] [हे] 'कौन्तेय' कुन्तितनय अर्ज्जुन 'इदं' भोगायतनं 'शरीरं' 'क्षेत्रं' क्षयात् नाशात्, क्षरणात्, अपचयात् क्षेत्रवत् वा यथा क्षेत्रे वीजमुप्तं फलति तद्वत् अस्मिन् कर्म्मफलनिवृत्तेः क्षेत्रमिति; 'इति' एवम् 'अभिधीयते' कथ्यते। 'यः' 'एतत्' शरीरं 'वेत्ति' विजानाति (अहं ममेति मन्यते इति श्रीधर) 'तं' 'तद्विदः' तौ क्षेत्रक्षेत्रज्ञौ ये विदन्ति ते तद्विदः क्षेत्रक्षेत्रज्ञविदः क्षेत्रक्षेत्रज्ञयोः विवेकज्ञाः 'क्षेत्रज्ञः' 'इति' एवं 'प्राहुः' कथयन्ति (कृषीवलवत् तत्फलभोक्तृत्वात्)।

1. [The Lord said—] O son of Kuntí, this body is called the field (object); (and) they (*i. e.*, the sages) that know them (*i. e.*, both the object and the subject), call him who knows it the knower of the object (*i.e.*, the subject).

---

* A *sloka* commencing with 'प्रकृतिं पुरुषञ्चैव' found in some editions, but not recognised by any commentator, is omitted here.

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज् ज्ञानं मतं मम ॥२॥

२। [च] 'भारत' भरतवंशावतंस, 'सर्व्वक्षेत्रेषु' 'अपि' 'मां' (अनुगतं) 'च' एव 'क्षेत्रज्ञं' 'विद्धि' जानीहि, 'तञ्च क्षेत्रज्ञं संसारिणं जीवं वस्तुतः सर्व्वक्षेत्रेषु अनुगतं मामेव विद्धि' इति श्रीधरः। जीवात्मपरमात्मनोर्भेदाभेदत्वात् जीवात्मनः परमात्मानोऽनुप्रकाशत्वात्, चित्स्वरूपस्य चिदंशत्वात् युक्तमेवैतत् ; 'क्षेत्रक्षेत्रज्ञयोः' 'यत्' (वैलक्षण्येन) 'ज्ञानं' 'तत्' 'ज्ञानं' सम्यक्ज्ञानं (मोक्षहेतुत्वात्) [इति] 'मम' 'मतं' अभिप्रायः।

2. And know me also, O Bhárata, to be the subject in all bodies (or objects). The knowledge of object and subject is deemed by me to be the (true) knowledge.

तत् क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत् समासेन मे शृणु ॥३॥

३। 'तत्' 'क्षेत्रं' 'यत्' [स्वरूपतः] जडदृश्यादिस्वभावं 'यादृक्' [यादृशञ्च] इच्छादिधर्म्मकं, 'यद्विकारि' यैः इन्द्रियादिविकारैः युक्तं, 'यतः' यस्मात् कारणात् (प्रकृतिपुरुषसंयोगात्) 'च' 'भवति', 'सः' (क्षेत्रज्ञः, जीवलक्षणः परमेशलक्षणः च) 'च' 'यः' स्वरूपतः स्वप्रकाशचैतन्यानन्दस्वभावः, 'यत्प्रभावः' ये प्रभावाः शक्तयो यस्य सः अचिन्त्यैश्वर्य्ययोगेन यैः प्रभावैः सम्पन्नः, 'तत्' क्षेत्रक्षेत्रज्ञयोः याथात्म्यं 'समासतः' संक्षेपेण 'मे' मत्तः मम वचनात् 'शृणु'।

3. [Now,] what that object is, what it is like (*i.e.*, of what nature it is), what changes it is liable to, and

whence it is (*i. e.*, comes into being), also who he (the subject) is and what his powers are,—hear [all] this briefly from me.

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥४॥

४। [एतत् क्षेत्रक्षेत्रज्ञतत्त्वं] 'ऋषिभिः' 'बहुधा' बहुप्रकारं विस्तरेण 'गीतं' कथितं निरूपितं, 'विविधैः' नानाप्रकारैः 'छन्दोभिः' छन्दांसि ऋगादीनि तैः वेदैः 'पृथक्' विवेकतः [गीतं], 'तथा' 'हेतुमद्भिः' युक्तियुक्तैः विनिश्चितैः सन्देहशून्यार्थप्रतिपादकैः निश्चितप्रत्ययोत्पादकैः 'ब्रह्मसूत्रपदैः' [ब्रह्म सूच्यते सूच्यते एभिरिति ब्रह्मसूत्राणि तथा ब्रह्म पद्यते गम्यते साक्षात् ज्ञायते एभिरिति पदानि स्वरूपलक्षणपराणि तैः] वेदान्तसूत्रैः 'च' [पृथक् गीतं]।

4. [All this has been] sung by the sages in many ways separately in various (Vedic) hymns, as also in the well-reasoned, decisive texts of (the aphorisms called) the 'Brahmasútras'.

महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥५॥
इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः।
एतत् क्षेत्रं समासेन सविकारमुदाहृतम् ॥६॥

५, ६। 'महाभूतानि' महान्ति भूतानि क्षित्यादीनि पञ्च, 'अहङ्कारः' महाभूतकारणम् अहंप्रत्ययलक्षणः, 'बुद्धिः' ज्ञानात्मकं महत्तत्त्वं (श्रीधरः) अहङ्कार-

कारणम् अध्यवसायलक्षणा (शङ्करः), 'अव्यक्तं' मूलप्रकृतिः (श्रीधरः) बुद्धेः कारणम् ईश्वरशक्तिर्मायीया (शङ्करः) 'एव' 'च' 'इन्द्रियाणि' बाह्यानि ज्ञान-कर्म्मेन्द्रियाणि 'दश' 'एकं' (मनः) 'च' 'इन्द्रियगोचराः' श्रोत्रादिग्राह्याः 'पञ्च' तन्मात्ररूपाः शब्दादिविषयाः 'च' [एतानि चतुर्विंशति तत्त्वानि],—'इच्छा', 'द्वेषः', 'सुखं', 'दुःखं', 'संघातः' सर्व्वस्य क्षेत्रभेदजातस्य संहतिः समष्टिस्वरूपम् इदं शरीरं, 'चेतना' ज्ञानात्मिका मनोवृत्तिः, 'धृतिः' धैर्य्यं, 'एतत्' 'सविकारम्' इन्द्रियादिविकारसहितं 'क्षेत्रं' 'समासेन' संक्षेपेण 'उदाहृतम्' मया कथितम् ।

5, 6. The (five) great [gross] elements, egoism, the understanding, and also the Unmanifested (*i. e., Prakriti*), the ten senses and the one (*i. e.*, the sensorium), the five [subtle] objects of the senses, desire, aversion, pleasure, pain, the body, (lit. combination or aggregate) consciousness, patience,—(all) this is briefly mentioned [by me here] as the *kshetra* (the objective world) with its modifications.

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्य्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥७॥
इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥८॥
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥९॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥१०॥

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥११॥

७-११। 'अमानित्वं' मानिनः भावः मानित्वम् आत्मनः श्लाघनं तस्य अभावः अमानित्वम् आत्मश्लाघाराहित्यं, 'अदम्भित्वं' दम्भराहित्यं (स्वधर्म-प्रकटीकरणं दम्भित्वं तस्य अभावः स्वधर्मध्वजित्वराहित्यं), 'अहिंसा' प्राणिनाम् अपीडनं परपीडावर्ज्जनं, 'क्षान्तिः' क्षमा (परापराधप्राप्तौ अविक्रियया तत् सहनं, अपमानसहिष्णुता), 'आर्ज्जवं' ऋजुभावः सरलता, 'आचार्य्योपासनं' आचार्य्यस्य ज्ञानोपदेष्टुः उपासनं शुश्रूषादिना सेवनं, 'शौचं' शुद्धता (बाह्य-मलानां मृज्जलाभ्यां प्रक्षालनम् अन्तर्मलानां रागादीनाम् अपनयनं च शौचं देहशुद्धिः भावशुद्धिश्च), 'स्थैर्य्यं' स्थिरभावः (मोक्षमार्गे प्रवृत्तस्य तदेकनिष्ठता), 'आत्मविनिग्रहः' मनःसंयमः (शरीरसंयमः इति श्रीधरः) 'इन्द्रियार्थेषु' इन्द्रियभोग्यविषयसमूहेषु 'वैराग्यं' विरागभावः, वितृष्णा, 'अनहङ्कारः' श्रेष्ठत्वा-भिमानराहित्यं देहादौ आत्माभिमानत्यागः वा 'एव' 'च', 'जन्ममृत्युजरा-व्याधिदुःखदोषानुदर्शनं' जन्म च मृत्युश्च जरा वार्द्धक्यं च व्याधयः रोगाः च दुःखानि च तेषु दोषः तस्य अनुदर्शनम् आलोचनं (अथवा जन्मादिषु दुःख-दोषयोः दुःखरूपस्य दोषस्य वा पुनः पुनः आलोचनम्) 'असक्तिः' सङ्ग-निमित्तेषु विषयेषु, निषिद्धेषु विषयेषु इति शङ्करः, प्रीतिमात्रं सक्तिः तदभावः अप्रीतिभावः प्रीतित्यागः, 'पुत्रदारगृहादिषु' पुत्रेषु दारेषु कलत्रेषु गृहेषु अन्येषु अपि 'अनभिष्वङ्गः' अनासक्तिः, 'इष्टानिष्टोपपत्तिषु' इष्टानां अनिष्टानां च प्राप्तिषु 'नित्यं' सर्व्वदा 'समचित्तत्वं' तुल्यचित्तता हर्षविषाद-राहित्यं, 'मयि' ईश्वरे 'च' 'अनन्ययोगेन' न अन्यः वासुदेवात् परोऽस्ति इत्येवं निश्चितया बुद्ध्या अपृथक्समाधिना सर्व्वात्मदृष्ट्या 'अव्यभिचारिणी' अस्खलिता एकाग्रा एकान्ता 'भक्तिः', 'विविक्तदेशसेवित्वं' विविक्तं शुद्धं निर्ज्जनं वा देशं सेवितुं शीलमस्येति विविक्तदेशसेवी तस्य भावः पवित्रस्थानवासशीलत्वं निर्ज्जनस्थानसेवा वा, 'जनसंसदि' जनानां (प्राकृतजनानां) संसदि सभायां

समवाये 'अरतिः' अरुचिः, 'अध्यात्मज्ञाननित्यत्वं' आत्मज्ञानादिविषये अनित्यभावः, आत्मानम् अधिकृत्य वर्त्तमानम् आत्मविषयकं ज्ञानं अध्यात्मं तस्मिन् नित्यत्वं नित्यभावः नित्यं तस्यानुशीलनमिति भावः, 'तत्त्वज्ञानार्थदर्शनं' तत्त्वज्ञानस्य अर्थः प्रयोजनं मोक्षः तस्य दर्शनं मोक्षस्य सर्व्वोत्कृष्टत्वालोचनमित्यर्थः, [इति] 'एतत्' [सर्व्वं] अमानित्वादिविंशतिसंख्यकं यत् उक्तं तत् 'ज्ञानम्' (ज्ञानसाधनत्वात्) 'इति' 'प्रोक्तं' कथितं [ऋषिभिः शास्त्रकारैर्वा], 'अतः' अस्मात् यथोक्तात् 'यत्' 'अन्यथा' अन्यरूपं विपरीतं [तत्] मानित्वादि सर्व्वम् 'अज्ञानं' ज्ञानविरोधित्वात् संसारप्रवृत्तिकारणत्वाच्च। अतः तत् परित्याज्यमित्यर्थः।

7-11. Humility, unostentatiousness (*i. e.*, absence of arrogance or religious hypocrisy), harmlessness, forgiveness, straightforwardness, service of the preceptor, purity, steadfastness, self-restraint ; indifference to the objects of the senses, and also absence of egotism, perception of the evil or misery in birth, death, old age and disease ; absence of attachment, absence of intense affection for son, wife, home, and other things (leading to self-identification with them), constant equanimity of mind on the attainment of good (the agreeable or desirable) and evil (the disagreeable or undesirable), unswerving devotion to me by single-hearted contemplation, resort to sacred (or solitary) places, distaste for the company of [worldly-minded] men ; constancy in (the pursuit of) the knowledge of the (Supreme) Self, keeping in view the end (*i. e.*, liberation) of true wisdom,—all this has been declared to be knowledge ; what is contrary to this is ignorance.

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥१२॥

१२। [इदानीं] 'यत्' 'ज्ञेयं' ज्ञातव्य' (उक्तैः साधनैः) 'तत्' 'प्रवक्ष्यामि' प्रकर्षेण स्पष्टतया यथावत् वक्ष्यामि 'यत्' (ज्ञेयं) 'ज्ञात्वा' 'अमृतम्' अमृतत्वं मोक्षम् 'अश्नुते' प्राप्नोति (नरः इति शेषः); 'तत्' 'अनादिमत्' (आदिरस्यास्तीति आदिमत्, न आदिमत् अनादिमत्) आदिरहितं 'परं' निरतिशयं 'ब्रह्म', 'न' 'सत्' स्थूलं 'न' 'असत्' सूक्ष्मम् 'उच्यते'। 'अनादि' इति बहुव्रीहिणा सिद्धेऽपि 'अनादिमत्' इत्यत्र पुनर्मतुप् प्रत्ययः छान्दसः (श्लोकपूरणार्थः)।

12. I will (now) clearly declare that which is to be known (*i. e.*, which is the sole object of knowledge), (and) knowing which one attains immortality. That beginningless Supreme Brahman is said to be neither 'Sat' (gross) nor 'Asat' (subtle).

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥१३॥

१३। 'तत्' (ब्रह्म) 'सर्व्वतः पाणिपादं' सर्व्वतः सर्व्वत्र (सर्व्वेषु देहेषु इति मधुसूदनः) पाणयः हस्ताः पादाश्च यस्य तत्, 'सर्व्वतः अक्षिशिरोमुखं' सर्व्वत्र अक्षीणि चक्षूंषि शिरांसि मस्तकानि मुखानि च यस्य तत्, 'सर्व्वतः श्रुतिमत्' सर्व्वत्र श्रुतयः श्रवणेन्द्रियाणि यस्य तत् सर्व्वत्र श्रवणेन्द्रिययुक्तं [सत्] 'लोके' जगति भुवने प्राणिनिकाये इति शङ्करः, 'सर्व्वम्' 'आवृत्य' संव्याप्य 'तिष्ठति'। (श्वेताश्वरोपनिषत् ३।१६)।

13. That (*i. e.*, the Supreme Brahman), having hands and feet everywhere, eyes, heads and faces in all directions, and ears on all sides, exists in the world, pervading all (things).

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥१४॥

१४। [तत् ज्ञेयं ब्रह्म] 'सर्व्वेन्द्रियगुणाभासं' (सर्व्वेषां इन्द्रियाणां गुणेषु रूपाद्याकारासु वृत्तिषु, तत्तदाकारेण आभासते यत् तत्, अथवा सर्व्वेन्द्रियाणि गुणान् च तत्तद्विषयान् आभासयति यत् तत्, किंवा सर्व्वेन्द्रियगुणैः अध्यवसाय-संकल्पश्रवणवचनादिभिः अवभासते यत् तत् इति शङ्करः, सर्व्वेन्द्रियव्यापारैः व्यापृतम् (इव), 'सर्व्वेन्द्रियविवर्ज्जितं सर्व्वैः इन्द्रियैः विवर्ज्जितं सर्व्वकरणरहितं, 'असक्तं' सर्व्वसंश्लेषवर्ज्जितं सङ्गशून्यं, [तथापि] 'सर्व्वभृत्' सर्व्वं बिभर्त्ति धारयति पालयतीति च यत् तत् सर्व्वस्य आधारभूतं 'च' निर्गुणं' सत्त्वादिगुणरहितं, [तथापि] 'गुणभोक्तृ' गुणानां सत्त्वादीनां शब्दादिद्वारेण सुखदुःखमोहाकार-परिणतानां भोक्तृ उपलब्धृ (शङ्करः) पालकं (श्रीधरः) 'च' 'एव'। श्वेता-श्वतरोपनिषत् ३।१७)।

14. That (Brahman) is resplendent with all sense-functions, yet devoid of all senses; unattached, yet supporting all (things); devoid of qualities (*gunas*), yet enjoyer or supporter of (all) qualities.

बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात् तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥१५॥

१५। [तत् ब्रह्म] 'भूतानां' प्राणिनां चराचराणां स्वकार्य्याणाम् इति श्रीधरः, 'बहिः' बाह्यविषयात्मकम् इत्यर्थः, 'अन्तः' अन्तर्म्मध्ये प्रत्यग्भूतम् इत्यर्थः 'च'; [तत्] 'अचरं' स्थावरं, 'चरं' जङ्गमं भूतजातं 'एव' 'च' (अधिष्ठाना-त्मकत्वात्); 'सूक्ष्मत्वात्' रूपादिहीनत्वात् अतीन्द्रियत्वात् [तत्] 'अविज्ञेयं' न स्पष्टज्ञानार्हं (ज्ञानसाधनशून्यानां) 'तत्' 'दूरस्थं' (अविदुषां अप्राप्यत्वात्) 'च' 'अन्तिके' समीपे नित्यसन्निहितं 'च' (विदुषां तदात्मत्वात्)।

15. [That (Brahman) is] without and within all beings (or things); the unmoving and also the moving; not clearly knowable on account of [its] subtlety; that is both far and near.

अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥१६॥

१६। 'तत्' 'ज्ञेयं' (ब्रह्म) 'अविभक्तं' कारणात्मना अभिन्नम् एकम् [अपि] 'च' [सत्] 'भूतेषु' मिथो भिन्नेषु 'विभक्तं' कार्य्यात्मना भिन्नम् 'इव' 'च' 'स्थितं', 'भूतभर्तृ' भूतानां पोषकं पालकं (स्थितिकाले), 'ग्रसिष्णु' ग्रसनशीलं संहारकं (प्रलयकाले) 'च', प्रभविष्णु' 'प्रभवनशीलं (नानाकार्य्यात्मना सृष्टिकाले) 'च'।

16. That knowable (Brahman), though undivided yet exists, as if divided in beings (or things), [and] is the supporter of beings (or things), also the devourer (*i. e.*, destroyer) and the generator.

ज्योतिषामपि तज्ज्योतिस्तमस: परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥१७॥

१७। 'तत्' (ब्रह्म) 'ज्योतिषाम्' अवभासकानां सूर्य्यादीनां (बुद्ध्यादीनाञ्च इति मधुसूदन:) 'अपि' 'ज्योति:' प्रकाशकं ; 'तमस:' 'परं' तमोगुणातीतम् अन्धकारातीतम् अथवा तमस: अज्ञानात् परं तेन असंस्पृष्टम् 'उच्यते' ; [तत्] 'ज्ञानं', 'ज्ञेयं', 'ज्ञानगम्यं' ज्ञानसाधनेन प्राप्यं, 'सर्व्वस्य' प्राणिमात्रस्य 'हृदि' बुद्धौ 'विष्ठितं' विशेषेण स्थितं (नियन्तृतया, जीवरूपेणान्तर्य्यामिरूपेण च इति मधुसूदन:)।

17. That (Brahman) is the Light even of all luminous bodies (or things), (and) is said to be beyond darkness (or ignorance) ; [It] is knowledge, the knowable (*i.e.*, the object of knowledge), and attainable by knowledge, and dwells in the hearts of all.

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥१८॥

१८। 'इति' एवं 'क्षेत्रं' (५-६), 'तथा' 'ज्ञानं' (७-११), 'ज्ञेयं' (१२-१७) 'च' 'समासतः' संक्षेपेण [मया] 'उक्तम्'। 'मद्भक्तः' 'एतत्' 'विज्ञाय' सम्यक् ज्ञात्वा 'मद्भावाय' मम भावाय ब्रह्मभावाय ब्रह्मत्वाय 'उपपद्यते' युज्यते मोक्षं प्राप्तुं योग्यो भवति।

18. Thus have the body and also knowledge and the object of knowledge been declared in brief. Knowing this, my devotee becomes fitted for [attaining] my nature.

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान् ॥१९॥

१९। 'प्रकृतिं' 'पुरुषं' 'च' 'उभौ' 'अपि' 'अनादी' आदिरहितौ 'एव' 'विद्धि' जानीहि (प्रकृतेः अनादित्वम् ईश्वरस्य शक्तित्वात् तस्याः अपराप्रकृतित्वात् इति वा, पुरुषस्य अनादित्वं तदंशत्वात् तत्पराप्रकृतित्वादिति वा) ; 'विकारान्' देहेन्द्रियादीन् 'च' 'गुणान्' सत्त्वादिगुणपरिणामान् सुखदुःखादीन् 'च' 'प्रकृतिसम्भवान्' प्रकृतेः संभूतान् प्रकृतिपरिणामान् 'एव' 'विद्धि'।

19. Know both Prakriti and Purusha to be beginningless, [and] know all modifications and all qualities to be born of Prakriti.

कार्यकारणकर्तृत्वे हेतु: प्रकृतिरुच्यते ।
पुरुष: सुखदु:खानां भोक्तृत्वे हेतुरुच्यते ॥२०॥

२०। 'कार्य्यकारणकर्तृत्वे' कार्य्यं शरीरं कारणानि सुखदु:खानां साधनानि इन्द्रियाणि च तेषां कर्तृत्वे उत्पादकत्वे तदाकारपरिणामे 'प्रकृति:' 'हेतु:' कारणम् 'उच्यते' [कपिलादिभि:] ; 'सुखदु:खानां' भोग्यानां 'भोक्तृत्वे' उपलब्धृत्वे 'पुरुष:' जीव: 'हेतु:' 'उच्यते'। ['कार्य्यकरणकर्तृत्वे' इति वा पाठ:]।

20. Prakriti is said to be the cause of the body and the senses, as their producer. Purusha (Self or Spirit) is said to be the cause of the enjoyment (*i. e.*, experience) of pleasure and pain.

पुरुष: प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् ।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥२१॥

२१। 'हि' यस्मात् 'पुरुष:' 'प्रकृतिस्थ:' प्रकृतौ स्थित: अधिष्ठित: ताम् आत्मत्वेन गत: तत्कार्य्ये देहे तादात्म्येन स्थित: सन् 'प्रकृतिजान्' प्रकृतित: जातान् प्रकृतिजनितान् 'गुणान्' सुखदु:खादीन् 'भुङ्क्ते' उपलभते ; [अत:] 'गुणसङ्ग:' गुणेषु शब्दादिषु सुखदु:खमोहात्मकेषु सङ्ग: अभिलाष: काम: इति यावत्, अथवा गुणै: शुभाशुभकर्मकारिभि: इन्द्रियै: सङ्ग:, किंवा

त्रिगुणात्मकप्रकृतौ तादात्म्याभिमानः [एव] 'अस्य' पुरुषस्य 'सदसद्योनि-जन्मसु' सतीषु देवादिषु असतीषु पश्वादिषु च योनिषु यानि जन्मानि तेषु 'कारणं' निमित्तं [भवति] ।

21. For Purusha, when joined with (or seated or dwelling in) Prakriti, enjoys the qualities born of Prakriti. [Hence] his connection with (or attachment to) (those) qualities is the cause of his birth in good and evil wombs.

उपद्रष्टाऽनुमन्ता च भर्त्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः ॥ २२

२२ । 'अस्मिन्' 'देहे' [जीवात्मरूपेण वर्त्तमानोऽपि] 'पुरुषः' 'परः' गुणातीतः असंसृष्टः एव न तद्गुणैः युज्यते, स्वेन रूपेण विद्यमानः इत्यर्थः ; [यतः सः] 'उपद्रष्टा' समीपस्थः सन् अपि पृथग्भूतः अव्यापृतः एव स्थित्वा द्रष्टा साक्षी न तु कर्त्ता इत्यर्थः, [तथा] 'अनुमन्ता' अनुमोदनकर्त्ता सन्निधिमात्रेण अनुग्राहकः (देहेन्द्रियाणां प्रवृत्तिषु स्वयं अप्रवृत्तोऽपि प्रवृत्त इव तदनुकूलो विभाव्यते अथवा स्वव्यापारेषु प्रवृत्तान् बुद्ध्यादीन् न निवारयति इत्यनेन अनुमन्ता) 'च', 'भर्त्ता' विधायकः धारयिता पोषयिता, 'भोक्ता' भोगकर्त्ता (पालकः इति श्रीधरः), 'महेश्वरः' महांश्चासौ ईश्वरश्चेति ब्रह्मादीनामपि नियन्ता, 'परमात्मा' अन्तर्यामी 'च' 'इति' 'अपि' 'उक्तः' (श्रुतौ श्रुत्या वा ; माण्डूक्य ६, श्वेताश्वतर ६।११ इत्यादौ, बृहदारण्यक ३।७ इत्यादौ) ।

22. [Even though residing] in this [material or human] body, Purusha is transcendent (*i. e.*, untouched by its qualities); [for] it is also said that he is the On-looker, Approver (Permitter), Supporter, Enjoyer (Protector), the Great God and the Supreme Self.

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥२३॥

२३। 'यः' 'एवं' यथोक्तप्रकारेण उपद्रष्टृत्वादिरूपेण 'पुरुषं' 'गुणैः' स्वविकारैः सुखदुःखादिपरिणामैः 'सह' तत्सहितामित्यर्थः 'प्रकृतिं' 'च' 'वेत्ति', 'सः' 'सर्वथा' सर्वप्रकारेण 'वर्त्तमानः' 'अपि' 'भूयः' पुनः 'न अभिजायते' न उत्पद्यते देहान्तरं न गृह्णाति, मुच्यते एव इत्यर्थः ।

23. He who thus knows Purusha and Prakriti with the qualities, though living in every way, is not born again.

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥२४॥

२४। 'केचित्' जनाः 'ध्यानेन' आत्मचिन्तनेन 'आत्मनि' देहे (श्रीधरः) बुद्धौ (शङ्करः) 'आत्मना' मनसा (ध्यानसंस्कृतेन अन्तःकरणेन इति शङ्करः) 'आत्मानं' प्रत्यक्चेतनं 'पश्यन्ति' साक्षात् कुर्व्वन्ति, 'अन्ये' 'अपरे' [तु] 'सांख्येन योगेन' प्रकृतिपुरुषयोः भेदज्ञानजन्येन चिन्तनेन 'अपरे' 'च' 'कर्म्मयोगेन' निष्कामेन ईश्वरार्पणबुद्ध्या अनुष्ठीयमानेन कर्म्मणा [आत्मानं आत्मनि पश्यन्ति] ['सांख्येन', 'योगेन' इत्येवं पृथक् ग्रहणे तु 'प्रकृतिपुरुष-वैलक्षण्यालोचनेन', 'अष्टाङ्गयोगेन' इत्येवमर्थः स्यात्] ।

24. Some, by neditation, see the Self in the self (or body) by the self (mind); others [see] by *sankhya-yoga* (the contemplative devotion of the Sankhya system), and others again by *karma-yoga* (the practical devotion of action).

अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥२५॥

२५। 'अन्ये' तु 'एवम्' आत्मसाक्षात्कारस्य ईदृशम् उपायत्रयम् 'अजानन्तः' 'अन्येभ्यः' आचार्येभ्यः [तान् उपायान्] 'श्रुत्वा' [आत्मानम्] 'उपासते' ध्यायन्ति ; 'ते' 'श्रुतिपरायणाः' श्रुतिः श्रवणं परं परमम् अयनं गमनं मोक्षमार्गप्रवृत्तौ श्रेष्ठं साधनं येषां ते श्रद्धया उपदेशश्रवणपरायणाः सन्तः 'अपि' स्वयं विचारासमर्थाः अपि इत्यभिप्रायः) 'च' 'मृत्युं' मृत्युयुक्तं संसारम् 'अतितरन्ति' अतिक्रामन्ति।

25. Yet others, not knowing this (*i. e.*, how to see the Self in the ways described above), worship (the Self), hearing [of it] from others. They, too, adhering to what is heard, overcome (lit. cross beyond) death.

यावत् सञ्जायते किञ्चित् सत्त्वं स्थावरजङ्गमम्।
क्षेत्रक्षेत्रज्ञसंयोगात् तद्विद्धि भरतर्षभ ॥२६॥

२६। [हे] 'भरतर्षभ' भरतश्रेष्ठ, 'यावत् किञ्चित्' यत् किञ्चित् 'स्थावरजङ्गमं' स्थावरं जङ्गमञ्च 'सत्त्वं' वस्तुमात्रं 'संजायते' समुत्पद्यते 'तत्' [सर्वं] 'क्षेत्रक्षेत्रज्ञसंयोगात्' क्षेत्रक्षेत्रज्ञयोः योगात् [एव संजायते इति] 'विद्धि' जानीहि।

26. O best of the race of Bharata, whatever thing, moving or unmoving, comes into being, know that to be due to the union of body and soul [or object and subject].

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥२७॥

२७। 'सर्व्वेषु' स्थावरजङ्गमात्मकेषु 'भूतेषु' 'समम्' एकरूपं निर्व्विशेषं "तिष्ठन्तं" स्थितिं कुर्व्वन्तम् [अतः तेषु] 'विनश्यत्सु' विनाशं गच्छत्सु नष्टनष्टस्वभावेषु, [अपि] 'अविनश्यन्तं' 'परमेश्वरं' 'यः' 'पश्यति' 'सः' [सम्यक्] 'पश्यति' [सः एव परमार्थदर्शी नान्यः इत्यर्थः] ।

27. He alone sees [truly] who sees the Supreme God existing alike in all things, [and so] unperishing amidst the perishing.

समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनाऽऽत्मानं ततो याति परां गतिम् ॥२८॥

२८। 'हि' यस्मात् [सः] 'सर्वत्र' सर्व्वभूतेषु 'समं' यथा स्यात् तथा 'समवस्थितं' सम्यक् अवस्थितम् 'ईश्वरं' 'पश्यन्' उपलभमानः [जनः] 'आत्मना' स्वेन मनसा [एव] 'आत्मानं' स्वं 'न' 'हिनस्ति' हिंसां करोति विनाशयति अधःपातयति इति भावः 'ततः' तस्मात् तदनन्तरं वा 'परां' सर्व्वोत्कृष्टां 'गतिं' मोक्षमित्यर्थः 'याति' प्राप्नोति ।

28. For he who sees God abiding alike everywhere, does not destroy the self by the self, and therefore he attains the supreme goal.

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।
यः पश्यति तथाऽऽत्मानमकर्तारं स पश्यति ॥२९॥

२९। 'यः' 'च' 'कर्म्माणि' 'प्रकृत्या' (देहेन्द्रियाकारेण परिणतया)

'एव' उर्व्वेश:' सर्व्वै: प्रकारै: 'क्रियमाणानि' निवर्त्त्यमानानि 'तथा' 'आत्मानम्' 'अकर्त्तारं' (देहाद्यभिमानेनैव आत्मन: कर्त्तृत्वं, न स्वत:, इत्येवं) [च] 'पश्यति' उपलभते 'स:' [एव'] (सम्यक्) 'पश्यति'।

29. He alone sees [truly] who sees all actions done in every way by Prakriti alone and also sees the Self as a non-agent.

यदा भूतपृथग्भावमेकस्थमनुपश्यति।
तत एव च विस्तारं ब्रह्म सम्पद्यते तदा ॥३०॥

३०। 'यदा' यस्मिन् काले [साधक:] 'भूतपृथग्भावं' भूतानां सर्व्वेषां स्थावरजङ्गमानां पृथक्त्वं भेदं परस्परभिन्नत्वम् 'एकस्थम्' एकस्मिन् एव आत्मनि स्थितम् 'अनुपश्यति' आलोकयति (आलोचयति इति श्रीधर:), 'तत:' तस्मात् आत्मत: 'एव' 'विस्तारं' भूतानाम् उत्पत्तिं विकाशं 'च' [अनुपश्यति], 'तदा' तस्मिन् काले [स:] 'ब्रह्म' 'सम्पद्यते' प्राप्नोति ब्रह्मभावम् उपैति।

30. When one sees the separateness of things as existing in One (*i. e.*, the supreme Self) and also [their] emanation from that One, one attains Brahman.

अनादित्वान्निर्गुणत्वात् परमात्माऽयमव्ययः।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥३१॥

३१। [चे] 'कौन्तेय,' 'अनादित्वात्' आदिहीनत्वात् 'निर्गुणत्वात्' सत्त्वादि-गुणराहित्यात् 'अयम्' 'अव्यय:' अविकारी 'परमात्मा' 'शरीरस्थ:' शरीरे स्थित: (सर्व्वगतत्वेन सर्व्वात्मत्वेन च) 'अपि' 'न' [किञ्चित्] 'करोति', [अत:] 'न' 'लिप्यते' कर्म्मफलै: लिप्तो भवति।

31. O son of Kuntí, this immutable supreme Self, being without beginning and without the qualities [of Prakriti], does not act and (therefore) is not tainted (*i. e.*, by the fruits of action) even when existing in the body.

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथाऽऽत्मा नोपलिप्यते ॥३२॥

३२। 'यथा' 'सर्व्वगतं' सर्व्वेषु (पङ्कादिषु अपि) स्थितं व्यापि अपि सत् 'आकाशं' खं 'सौक्ष्म्यात्' सूक्ष्मत्वात् 'न उपलिप्यते' (पङ्कादिभिः) न संवध्यते, [तथा] 'आत्मा' 'सर्व्वत्र' (उत्तमे अधमे मध्यमे वा) 'देहे' 'अवस्थितः' 'अपि' 'न उपलिप्यते' दैहिकैः दोषगुणैः न संयुज्यते ।

32. As the all-pervading ether (or space), on account of its subtlety, is not tainted, so the Self, though abiding in every body, is not tainted [by action].

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥३३॥

३३। [हे] 'भारत', 'यथा' 'एकः' [एव] 'रविः' सूर्य्यः 'इमं' 'कृत्स्नं' समस्तं 'लोकं' 'प्रकाशयति' अवभासयति (प्रकाश्यधर्म्मैर्न तु युज्यते) 'तथा' 'क्षेत्री' क्षेत्रज्ञः परमात्मा (एकः एव) 'कृत्स्नं' 'क्षेत्रं' विषयजगत् [ज्ञानालोकेन] 'प्रकाशयति' ।

33. O descendant of Bharata, as the one sun

illumines this whole world, even so does the subject [in every body] illumine the whole objective world.

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥३४॥

३४ । 'एवम्' उक्तप्रकारेण 'क्षेत्रक्षेत्रज्ञयोः' 'अन्तरं' भेदं परस्परवैलक्षण्यं 'भूतप्रकृतिमोक्षं' भूतानां प्रकृतिः तस्याः सकाशात् मोक्षं तत् साधनं मोक्षोपायं ध्यानज्ञानादिकं 'च' 'ज्ञानचक्षुषा' आत्मज्ञानरूपेण चक्षुषा 'ये' 'विदुः' विजानन्ति 'ते' 'परं' परमात्मानं 'यान्ति' लभन्ते ।

34. Those who, by the eye of knowledge, thus perceive the distinctiveness of the object and the subject and [the means of] release from Prakriti and her modifications, go to (*i. e.*, attain) the Supreme.

गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः

——:*:*:——

श्रीभगवान् उवाच

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥१॥

१ । [श्रीभगवान् उवाच] [अहं] 'ज्ञानानां' [मध्ये] 'उत्तमं' 'परम्' उत्कृष्टं परमात्मविषयम् इत्यर्थः 'ज्ञानं' 'भूयः' पुनः [तुभ्यं] 'प्रवक्ष्यामि' प्रकर्षेण कथयिष्यामि, 'यत्' [ज्ञानं] 'ज्ञात्वा' 'मुनयः' मननशीलाः ऋषयः 'इतः' अस्मात् लोकात् अस्मात् देहबन्धनात् ऊर्द्ध्वं वा 'पराम्' उत्कृष्टां 'सिद्धिं' फलोत्पत्तिं मोक्षमित्यर्थः 'गताः' प्राप्ताः ।

1. [The Lord said,—] I will again speak [to thee] about that supreme knowledge, the best of all kinds of knowledge, learning which all the *munis* (sages) have attained the highest perfection (*i.e.*, final emancipation) from here (*i.e.*, this world or after this life of bondage to the body).

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥२॥

२ । 'इदं' वक्ष्यमाणं 'ज्ञानम्' 'उपाश्रित्य' प्राप्य ज्ञानसाधनम् अनुष्ठाय इति

सन्तः [मुनयः जनाः वा] 'मम' परमेश्वरस्य 'साधर्म्यं' मत्स्वरूपतां न तु समान-धर्मताम् इति भावः 'आगताः' प्राप्ताः सन्तः 'सर्गे' सृष्टिकाले 'अपि' 'न' 'उपजायन्ते' उत्पद्यन्ते, [तथा] 'प्रलये' विनाशकाले [अपि] 'न' 'व्यथन्ति' व्यथां नापद्यन्ते प्रलयदुःखं नानुभवन्ति 'च', न च लीयन्ते इत्यर्थः इति मधुसूदनः ।

2. By acquiring this knowledge, they, the *munis*, (or men generally), attaining the same nature as mine, are not [re-]born even at the time of [a new] creation, nor are they pained (*i.e.*, they do not suffer the pain of death) even at the dissolution of the world.

मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् ।
सम्भवः सर्वभूतानां ततो भवति भारत ॥३॥

३ । [हे] 'भारत', 'महत् ब्रह्म' (देशतः कालतश्च अपरिच्छिन्नत्वात् महत्, बृंहितत्वात् स्वकार्याणां वृद्धिहेतुत्वात् ब्रह्म) प्रकृतिः सर्वस्य प्रपञ्चस्य कारणं प्रधानं 'मम' परमेश्वरस्य 'योनिः' गर्भाधानस्थानं [भवति]; 'अहं' 'तस्मिन्' योनौ योनिभूते महति ब्रह्मणि 'गर्भं' सर्वभूतजन्मकारणं बीजं जगद्वि-स्तारहेतुं चिदाभासं 'दधामि' निक्षिपामि अर्पयामि ; 'ततः' तस्मात् गर्भाधानात् 'सर्वभूतानां' निखिलस्थावरजङ्गमानां 'सम्भवः' उत्पत्तिः 'भवति' ।

3. O descendant of Bharata, the great Brahman (*i. e.*, Prakriti or Nature) is my womb ; I place the germ [of the world] into it ; thence are produced all beings (or things).

सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः ।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥४॥

४। [हे] 'कौन्तेय', सर्व्वयोनिषु सर्व्वासु योनिषु मनुष्याद्यासु 'याः' 'मूर्त्तयः' स्थावरजङ्गमात्मिकाः तनवः 'सम्भवन्ति' उत्पद्यन्ते 'तासां' मूर्त्तीनां 'महद्ब्रह्म' प्रकृतिः 'योनिः' कारणम् उत्पत्तिहेतुत्वात् मातृस्थानीया इति भावः, 'अहं' परमेश्वरः 'बीजप्रदः' गर्भाधानस्य कर्त्ता 'पिता'।

4. O son of Kunti, whatever forms (*i. e.*, bodies) are born in all wombs, the great Brahman is their womb (*i. e.*, mother), [and] I am the seed-imparting Father.

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥५॥

५। [हे] 'महाबाहो', 'सत्त्व' 'रजः', 'तमः', 'इति' 'प्रकृतिसम्भवाः' प्रकृतेः सकाशात् पृथक्त्वेन अभिव्यक्ताः 'गुणाः' 'देहे' प्रकृतिकार्य्ये शरीरे [तादात्म्येन स्थितम्] 'अव्ययं' निर्व्विकारं परमार्थतः इत्यर्थः 'देहिनं' देहवन्त' चिदंशम् आत्मानं जीवमिति यावत् 'निबध्नन्ति' स्वकार्य्यैः सुखदुःखमोहादिभिः संयोजयन्ति इत्यर्थः। [अथवा देहे देहाभ्यन्तरे निबध्नन्ति इत्यनेन सह अन्वयः]।

5. O mighty-armed, *sattvam* (goodness or purity), *rajas* (passion or activity) and *tamas* (darkness or ignorance)—these *gunas* (qualities), born of Prakriti (Nature), bind the unchanging self existing in the body (or bind down the unchanging self in the body).

तत्र सत्त्वं निर्म्मलत्वात् प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥६॥

६। [हे] 'अनघ' पापशून्य, 'तत्र' तेषां गुणानां मध्ये 'निर्म्मलत्वात्' स्वच्छत्वात् 'प्रकाशकं' भास्वरं ज्ञानव्यञ्जकम् 'अनामयं' निरुपद्रवं शान्तमित्यर्थः सुखस्य अभिव्यञ्जकम् इति आनन्दगिरिः 'सत्त्वं' सत्त्वसंज्ञकं गुणं 'सुखसङ्गेन' शान्तत्वात् स्वकार्य्येण सुखेन यः सङ्गः तेन 'ज्ञानसङ्गेन' प्रकाशकत्वात् स्वकार्य्येण ज्ञानेन यः सङ्गः तेन 'च' [देहिनं] 'बध्नाति' अहं सुखी ज्ञानी च इति मनोधर्म्मान् तदभिमानिनि क्षेत्रज्ञे संयोजयति इत्यर्थः ।

6. O sinless One, of these, *sattvam*, which, on account of its purity (or clearness), is luminous (enlightening) and healthy (free from disease or defect), binds [the self] with attachment to happiness and attachment to knowledge.

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्म्मसङ्गेन देहिनम् ॥७॥

७। [हे] 'कौन्तेय', 'रजः' रजःसंज्ञकं गुणं 'रागात्मकं' अभिलाषात्मकं 'तृष्णासङ्गसमुद्भवं' तृष्णा अप्राप्तविषये अभिलाषः सङ्गः प्राप्ते अर्थे प्रीतिः आसक्तिः आसङ्गः (प्राप्ते विषये मनसः प्रीति-लक्षणः संश्लेषः इति शङ्करः) तयोः समुद्भवः यस्मात् तत् 'विद्धि' जानीहि ; 'तत्' रजः 'देहिनं' शरीरिणं जीवं 'कर्म्मसङ्गेन' दृष्टादृष्टार्थेषु कर्म्मसु सङ्गेन आसक्त्या अभिलाषेण वा तत्परतया इति शङ्करः 'निबध्नाति' नितरां बध्नाति, तृष्णासङ्गाभ्यां हि कर्म्मसु आसक्तिर्भवति इत्यर्थः ।

7. O son of Kuntī, know *rajas* to be of the nature

of desire (passion) and to be the source of thirst and attachment. It binds the embodied self with attachment to action.

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥८॥

८। [हे] 'भारत', 'तमः' 'तु' 'अज्ञानजम्' अज्ञानात् आवरणशक्तिप्रधानात् प्रकृत्यंशात् जातम् उद्भूतं 'सर्व्वदेहिनां' सर्व्वेषां देहवतां 'मोहनं' मोहकरं भ्रान्तिजनकं विवेकप्रतिबन्धकं 'विद्धि', [अतः] 'तत्' तमः 'प्रमादालस्यनिद्राभिः' प्रमादेन अनवधानेन आलस्येन अनुद्यमेन निद्रया स्वापेन चित्तस्य अवसादात् लयेन च [देहिनं] निबध्नाति अनुषज्जयते, आत्मानम् अविकारम् एव विकारयति इत्यर्थः ।

8. O descendant of Bharata, know *tamas* to be born of ignorance and [to be] the confounder of all embodied selves. [So] it binds (the embodied self) with error, indolence and sleep (or sloth).

सत्त्वं सुखे सञ्जयति रजः कर्म्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥९॥

९। [हे] 'भारत', 'सत्त्वं' [देहिनं], 'सुखे' 'सञ्जयति' संश्लेषयति दुःखसुखादिकारणे सत्यपि देहिनं सुखाभिमुखम् एव करोति इत्यर्थः ; 'रजः' 'कर्म्मणि' [सञ्जयति] 'तमः' 'तु' 'ज्ञानं' सत्त्वकृतं विवेकम् आवृत्य आच्छाद्य 'प्रमादे' अनवधाने 'सञ्जयति' योजयति ; 'उत' अपि । उतशब्दः अपिशब्द-पर्य्यायः अपि अतिशयार्थः पादपूरणे वा ।

9. O descendant of Bharata, *sattvam* connects [the self] with happiness; *rajas*, with action; but *tamas*, by covering knowledge, connects [it] with error.

रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥१०॥

१०। [हे] 'भारत', 'सत्त्वं' (कर्त्तृ) 'रजः' 'तमः' च उभौ अपि 'अभिभूय' तिरस्कृत्य 'भवति' उद्भवति वर्द्धते, यदा तदा प्रागुक्तं स्वकार्य्यं करोति इत्यर्थः ; [तथा] 'रजः' (कर्त्तृ) 'सत्त्वं' 'तमः' 'च' इति गुणद्वयम् अभिभूय भवति, अतः कर्म्मतृष्णादिस्वकार्य्यम् आरभते इत्यर्थः, [एवं] 'तमः' (कर्त्तृ) 'सत्त्वं' 'रजः' [च] उभौ अपि गुणौ अभिभूय भवति, अतः ज्ञानावरणादि-स्वकार्य्यम् आरभते इत्यर्थः ।

10. O descendant of Bharata, *sattvam* prevails by overpowering *rajas* and *tamas*; *rajas*, by overwhelming *sattvam* and *tamas*; so also *tamas*, by overwhelming *sattvam* and *rajas*.

सर्व्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥११॥

११। 'यदा' 'अस्मिन्' 'देहे' 'सर्व्वद्वारेषु' सर्व्वेषु द्वारेषु आत्मनः उपलब्धिसाधनेषु श्रोत्रादिकरणेषु 'प्रकाशः' प्रकाशरूपं 'ज्ञानम्' 'उपजायते' उत्पद्यते, 'तदा' अनेन प्रकाशलिङ्गेन 'उत' * निश्चितं, पादपूरणे वा, 'सत्त्वं' 'विवृद्धम्' उद्भूतम् 'इति' 'विद्यात्' जानीयात् ।

* This particle is often used for the sake of emphasis, especially at the end of a line after इति ; hence it is translated here by 'indeed.'

11. When knowledge whose nature is light arises (is generated) in this body through all its gates (*i. e.* organs of sense), then should one know that *sattvam*, indeed is increased.

लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥१

१२। [च] 'भरतर्षभ', 'लोभः' विषयतृष्णा 'प्रवृत्तिः' सर्व्वेन्द्रियचेष्टा 'कर्म्मणाम्' 'आरम्भः' उपक्रमः 'अशमः' इन्द्रियाणाम् अनुपरतिः रागादि प्रवृत्तिः इति यावत् 'स्पृहा' विषयासक्तिः, 'एतानि' लिङ्गानि 'रजसि' रजोगुणे 'विवृद्धे' वृद्धिं गते [सति] 'जायन्ते'।

12. O best of the descendants of Bharata, propensity to actions, the undertaking of actio quiet and covetousness,—these arise when increased.

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥१३॥

१३। [च] 'कुरुनन्दन', 'अप्रकाशः' विवेकभ्रंशः ज्ञानाभावः, अनुद्यमः, 'प्रमादः' अनवधानता, 'मोहः' मिथ्याभिनिवेशः 'एव' 'च', लिङ्गानि 'तमसि' 'विवृद्धे' प्रवृद्धे [सति] 'जायन्ते'।

13. O descendant of Kuru, ignorance, inactiv error, and delusion,—these arise when *tamas* increased.

१८। 'सत्त्वस्थाः' सत्त्वगुणसम्पन्नाः 'ऊर्ध्वं गच्छन्ति' उन्नतलोकान् प्राप्नुवन्ति ; 'राजसाः' रजोगुणवृत्तिनिरताः 'मध्ये तिष्ठन्ति' मनुष्यलोके एव उत्पद्यन्ते ; 'जघन्यगुणवृत्तिस्थाः' जघन्यस्य निकृष्टस्य गुणस्य तमोगुणस्य वृत्तौ प्रमादमोहादौ स्थिताः मूढाः 'तामसाः' तमःप्रधानाः 'अधो गच्छन्ति' पश्वादिषु, तिर्य्यगादिषु, निरयेषु वा उत्पद्यन्ते। [जघन्यगुणवृत्तस्थाः इति वा पाठः]।

18. Those who are possessed of *sattvam* go up ; those who are endowed with *rajas* remain in the middle ; [and] those who live in the state generated by the lowest quality, [that is], those under the sway of *tamas*, go downwards.

नान्यं गुणेभ्यः कर्त्तारं यदा द्रष्टाऽनुपश्यति ।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥१९॥

१९। 'यदा' 'द्रष्टा' विवेकी तत्त्वयाथात्म्यदर्शी जीवः 'गुणेभ्यः' 'अन्यं' 'कर्त्तारं' 'न' 'अनुपश्यति' किन्तु गुणा एव सदैव कर्त्तारः इत्येवम् अनुपश्यति अनुभवतीत्यर्थः, 'गुणेभ्यः' 'च' 'परं' व्यतिरिक्तं गुणव्यापारसाक्षिभूतम् अकर्त्तारम् आत्मानं 'वेत्ति' जानाति, 'तदा' 'सः' 'मद्भावं' मम भावम् ईश्वरस्वरूपतां ब्रह्मत्वम् 'अधिगच्छति' प्राप्नोति, ब्रह्मभावः अस्य अभिव्यज्यते इत्यर्थः।

19. When the seer sees no other agent than the *gunas* (qualities) and knows him who is above the qualities, then he acquires my nature.

गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥२०॥

२० । 'देही' देहधारी जीवः 'देहसमुद्भवान्' देहः समुद्भवः परिणामः येषां तान् देहोत्पत्तिबीजभूतान् देहोत्पादकान् 'एतान्' यथोक्तान् 'त्रीन्' 'गुणान्' 'अतीत्य' अतिक्रम्य [तत्कृतैः] 'जन्ममृत्युजरादुःखैः' जन्म च मृत्युश्च जरा वार्द्धक्यं जीर्णता च दुःखानि च तैः [जीवन् एव] 'विमुक्तः' [सन्] 'अमृतं' परमानन्दं मोक्षम् 'अश्नुते' प्राप्नोति ।

20. The embodied self, transcending these three *gunas* (qualities), whose product the body is, and being freed from birth, death, old age and pain, attains immortality.

अर्जुन उवाच

कैर्लिङ्गैस्त्रीन् गुणानेतानतीतो भवति प्रभो ।
किमाचारः कथं चैतांस्त्रीन् गुणानतिवर्तते ॥२१॥

२१ । [अर्ज्जुन उवाच] [हे] 'प्रभो', 'कैः' कीदृशैः 'लिङ्गैः' ज्ञापकैः लक्षणैः [देही] 'एतान्' 'त्रीन्' 'गुणान्' 'अतीतः' 'भवति', 'किमाचारः' [सः] कः आचारस्तस्य कथं स वर्त्तते इत्यर्थः. 'कथं' केन उपायेन 'च' [सः] 'एतान्' 'त्रीन्' 'गुणान्' 'अतिवर्त्तते' अतिक्रामति अतीत्य वर्त्तते (तत् कथय इत्यर्थः) ।

21. [Arjuna said,—] O Lord, by what marks is he knowu when he has transcended these three qualities? What is his conduct? And how (by what means) does he transcend these three qualities?

श्रीभगवान् उवाच

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।
न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति ॥२२॥
उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ॥२३॥
समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥२४॥
मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥२५॥

२२-२५ । [श्रीभगवान् उवाच] [हे] 'पाण्डव', [यः] 'प्रकाशं' सत्त्वकार्यं 'च' 'प्रवृत्तिं' रजःकार्यं 'च' 'मोहः' तमःकार्य्यम् 'एव च' [एतानि] 'संप्रवृत्तानि' स्वतः प्रवृत्तानि आरब्धानि [सन्ति] (तत्र दुःखबुद्ध्या) 'न द्वेष्टि' तत्प्रति वैरभावं न पोषयति [एतानि] 'निवृत्तानि' विरतानि [सन्ति] 'च' (सुखबुद्ध्या) 'न' 'काङ्क्षति' कामयते ; 'यः' 'उदासीनवत्' निःसम्पर्कवत् साक्षितया 'आसीनः' स्थितः सन् 'गुणैः' गुणकार्य्यैः सुखदुःखादिभिः 'न विचाल्यते' स्वरूपावस्थात् न चाल्यते, [अपि तु] 'गुणाः' [एव] (गुणेषु स्वकार्य्येषु प्रकाशादिषु) 'वर्त्तन्ते' 'इति' 'एव' ['एवं' वा पाठः] 'यः' 'अवतिष्ठति' ['इत्येवं योऽनुतिष्ठति' इति पाठभेदश्च दृश्यते] तैः सह मम सम्बन्ध एव नास्ति इत्येवं विवेकबुद्ध्या तुष्णीमवतिष्ठति ['अवतिष्ठति' इत्यत्र परस्मैपदम् आर्षं, छन्दोभङ्गभयात् परस्मैपदप्रयोगः इति शङ्करः], 'न' [च] 'इङ्गते' चलति चेष्टते चलचित्तो भवति : [यः] 'समदुःखसुखः' दुःखञ्च सुखञ्च ते समे यस्य सः, 'स्वस्थः' स्वे आत्मनि स्थितः स्वरूपे एव स्थितः प्रसन्नः इति शङ्करः, 'समलोष्टाश्मकाञ्चनः' लोष्टं मृत्खण्डं च अश्मा प्रस्तरश्च काञ्चनं स्वर्णं च एतानि समानि

यस्य सः, 'तुल्यप्रियाप्रियः' प्रियञ्च अप्रियञ्च ते सुखदुःखे हेतुभूते तुल्ये समे यस्य सः, 'धीरः' धीमान्, 'तुल्यनिन्दात्मसंस्तुतिः' निन्दा दोषोक्तिश्च आत्मनः संस्तुतिः गुणकीर्त्तनञ्च ते तुल्ये यस्य सः ; [यः] 'मानापमानयोः' मन्ने सत्कारे अपमाने तिरस्कारे च 'तुल्यः' समः निर्व्विकारः, 'मित्रारिपक्षयोः' मित्रपक्षे सखिपक्षे अरिपक्षे शत्रुपक्षे च 'तुल्यः' निर्व्विशेषः न कस्यचित् पक्षे तिष्ठति इति, 'सर्व्वारम्भपरित्यागी' सर्व्वान् दृष्टादृष्टार्थान् आरम्भान् उद्यमान् परित्यक्तुं शीलं यस्य सः ;—एवम्भूताचारयुक्तः—'गुणातीतः' उच्यते' ।

22-25. [The Lord said,—] O son of Pándu, he who has no aversion for light (*i. e.*, knowledge), activity (propensity to action) and ignorance (delusion) when they come into play [of themselves], nor long for them when they cease to act (22) ; who, remaining unconcerned, is not moved by [the action of] the *gunus* (qualities), but remains unaffected, thinking that it is the qualities that act on their modifications [and not he] (23) ; to whom pain and pleasure are alike ; who is self-contained ; to whom a lump of earth, a stone, and [a piece of] gold are of the same value ; to whom the agreeable and the disagreeable are the same ; who is wise ; to whom censure and praise [of himself] are alike (24) ; [who is] the same (*i. e.*, equally-minded) in honour and disgrace, [and] the same to both parties, friends and foes ; [and] who has renounced all [egotistic] undertakings—is said to have transcended the qualities (25).

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ॥
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥२६॥

२६। 'यः' 'च' [अत्र 'च' शब्दः अवधारणार्थः] 'अव्यभिचारेण' अस्खलितेन एकान्तेन 'भक्तियोगेन' 'मां' परमेश्वरम् [एव] 'सेवते' उपास्ते सदा चिन्तयति अनुसन्दधाति 'सः', 'एतान्' प्रागुक्तान् 'गुणान्' 'समतीत्य' सम्यगतिक्रम्य 'ब्रह्मभूयाय' भूयः भवनं ब्रह्मभूयाय ब्रह्मभवनाय ब्रह्मभावाय ब्रह्मत्वाय मोक्षाय 'कल्पते' योग्यः भवति।

26. He who serves (or worships) me with unshaken devotion, becomes fit to attain the nature of Brahman (the Supreme Being) by fully transcending (overcoming) these *gunas* (qualities).

ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥२७॥

२७। 'हि' निश्चितम् 'अहं' प्रत्यगात्मा इति शङ्करः 'अमृतस्य' विनाशरहितस्य 'अव्ययस्य' अपक्षयरहितस्य 'ब्रह्मणः' 'प्रतिष्ठा' प्रतितिष्ठति अस्मिन् इति प्रतिष्ठाः आश्रयः (प्रतिष्ठा प्रतिमा इति श्रीधरः), [तथा] 'शाश्वतस्य' नित्यस्य 'धर्मस्य' 'च' 'ऐकान्तिकस्य' एकान्तनियतस्य अव्यभिचारिणः सर्वस्मिन् देशे काले च विद्यमानस्य अखण्डितस्य 'सुखस्य' परमानन्दस्य 'च' [प्रतिष्ठा]। ['अव्ययस्य अमृतस्य शाश्वतस्य च धर्मस्य' इत्येवं वा अन्वयः]।

27. Assuredly I am the embodiment of the immortal and immutable Brahman, of eternal righteousness, and of perfect happiness.

पुरुषोत्तमयोगो नाम पञ्चदशोऽध्याय:

——:*:——

श्रीभगवान् उवाच

ऊर्ध्वमूलमध:शाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥१॥

१। [श्रीभगवान् उवाच] 'ऊर्द्ध्वमूलम्' ऊर्द्ध्वम् उच्चम् उत्तमम् उत्कृष्टं ब्रह्मेत्यर्थ: (यदत्र क्षराक्षराभ्याम् उत्कृष्ट: पुरुषोत्तम: इत्याख्यातम्) मूलम् आदिकारणम् उत्पत्तिस्थानं यस्य तं (ऊर्द्ध्वे उच्चे ब्रह्मणि सत्यलोके वा मूलं यस्य तमिति वा) 'अध:शाखम्' अध: निम्ने ब्रह्मण: अधमेषु देवमानवपश्वादिषु, सत्यलोकात् अधमेषु स्वर्गमर्त्त्यादिलोकेषु वा, प्रसृता: शाखा: यस्य तं (अध: ब्रह्मण: अधमा: हिरण्यगर्भादय: शाखा इव शाखा यस्य तमिति वा) 'अश्वत्थं' न श्व: प्रभातपर्य्यन्तम् अपि स्थास्यति इति अश्वत्थ: तं क्षणप्रध्वंसिनं विनश्वरं संसारवृक्षम् 'अव्ययं' प्रवाहरूपेण नित्यम् अनश्वरं 'प्राहु:' कथयन्ति [श्रुतय: ऋषय: वा] ; 'छन्दांसि' वेदा: श्रुतिवाक्यानि वेदोक्तकर्म्मकाण्डानि वा 'यस्य' संसारवृक्षस्य 'पर्णानि' पत्राणि सर्व्वजीवानाम् आश्रयनीयत्वात् पर्णस्थानीयानि 'तं' यथाव्याख्यातं संसारवृक्षं 'य:' 'वेद' समूलं जानाति 'स:' 'वेदवित्' सम्यग्वेदार्थवित् कर्म्मब्रह्माख्यवेदार्थवित् इति मधुसूदन:। [कठवल्ली २।३।१ द्रष्टव्या]। ब्रह्म हि संसारवृक्षस्य मूलं, जीवा: सर्व्वे तस्य शाखास्थानीया:, स च संसारवृक्ष: स्वरूपेण विनश्वर: प्रवाहरूपेण च नित्य:, वेदै: (वेदोक्तै: कर्म्मभि:) च स सिच्यते, अतस्तानि कर्म्माणि तस्य पत्रस्थानीयानि (किञ्च वेदा:

भर्माधर्मप्रतिपादनेन सर्व्वजीवानामाश्रयणीयत्वात् पर्णवत् तेषां जीवानां छाया-स्थानीया; अत: वेदास्तस्य संसारवृक्षस्य पत्रस्थानीया:), ब्रह्मज्ञानेन च स छिद्यते, एतावानेव हि वेदार्थ:, यस्तं जानाति स एव सम्यग्दर्शी:, स वेदविदिति ।

1. [The Lord said,—] Thev (the *srutis* or the sages) say that the Asvattha tree (meaning the transient world, which is likened to the Asvattha or the holy fig-tree, commonly called the banyan tree), with its roots above (*i.e.*, in Brahman or God) and its branches (meaning all created beings or individual selves) below (that is to say, in the world), is eternal [on account of its unbroken course or existence]. He who knows it (this Asvattha tree), whose leaves are the Vedas (or the sacred texts of the Vedic hymns), is a knower of the Vedas.

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा
गुणप्रवृद्धा विषयप्रवाला: ।
अधश्च मूलान्यनुसन्ततानि
कर्मानुबन्धीनि मनुष्यलोके ॥२॥

२। 'तस्य' संसारवृक्षस्य 'गुणप्रवृद्धा:' गुणै: सत्त्वरजस्तमोभि: प्रवृद्धा: वृद्धिं प्राप्ता: परिपुष्टा: 'विषयप्रवाला:' विषया: रूपादय: प्रवाला: पल्लवा इव यासां ता: 'शाखा:' संसारवृक्षशाखा: जीवा: इत्यर्थ: 'अध:' तेषु ये दुष्कृतिनस्ते अधमेषु पश्वादियोनिषु, 'ऊर्द्ध्वं' सुकृतिन उन्नतेषु देवादियोनिषु, 'च' 'प्रसृता:' विस्तारं गता: ; 'मनुष्यलोके' मनुष्याश्चासौ लोकश्चेति तस्मिन् 'कर्मानुबन्धीनि' कर्म एव अनुबन्धि अनुवर्त्ति उत्तरभावि येषां (कर्म धर्माधर्मलक्षणं अनुबन्ध:

कर्मादभावो भाविबन्धनहेतुः [कर्मामिति वा] तानि कर्महेतुभूतानि 'मूलानि' 'अधः' 'च' ब्रह्मलोकाद् ऊर्ध्वं च 'अनुसन्ततानि' विस्तृतानि अनुप्रविष्टानि [मुख्यं मूलं तु ब्रह्मैवेति]।

2. Its branches, which are nourished by the *gunas* (qualities) and which have the objects of the senses as their sprouts, are stretched downwards and upwards. Its roots, which are the cause of (lit. which end in or are followed by) action (*i.e.*, whose consequence or result is action), extend downwards and upwards in the world of man.

न रूपमस्येह तथोपलभ्यते
नान्तो न चादिर्न च सम्प्रतिष्ठा।
अश्वत्थमेनं सुविरूढमूल-
मसङ्गशस्त्रेण दृढेन छित्त्वा ॥३॥
ततः पदं तत्परिमार्गितव्यम्
यस्मिन् गता न निवर्तन्ति भूयः।
तमेव चाद्यं पुरुषं प्रपद्ये
यतः प्रवृत्तिः प्रसृता पुराणी ॥४॥

३, ४। 'इह' अस्मिन् संसारे 'अस्य' संसारवृक्षस्य 'रूपं' स्वरूपं स्वभावः 'तथा' यथा पूर्वं वर्णितं तथा ऊर्ध्वमूलत्वादिप्रकारेण इत्यर्थः 'न' 'उपलभ्यते' अवगम्यते [प्राणिभिः], 'न' 'अन्तः' नाशः अवसानं, 'न च' 'आदिः' उत्पत्तिः 'न च' 'संप्रतिष्ठा' स्थितिः मध्यं [उपलभ्यते]; 'एनं' 'सुविरूढमूलं' सुदृ

विरूढानि अङ्कुरितानि जातानि बहूनि मूलानि यस्य तम् अत्यन्तबद्धमूलं दुरुच्छेद्यम् 'अश्वत्थं' 'दृढेन' कठिनेन 'असङ्गशस्त्रेण' सङ्गः स्पृहा तस्याभावः असङ्गः सङ्गविरोधि वैराग्यं; असङ्ग एव शस्त्रम् आयुधं तेन सङ्गराहित्येन वैराग्येन अहं-ममतात्यागरूपेण शस्त्रेण 'छित्वा' पृथक्कृत्य समूलमुद्धृत्य (३); 'ततः' पश्चात् 'तत्' 'पदं' पद्यते गम्यते इति स्थानं ब्रह्मेत्यर्थः 'परिमार्गितव्यम्' अन्वेष्टव्यं ज्ञातव्यमित्यर्थः 'यस्मिन्' पदे 'गताः' प्रविष्टाः यत्पदं प्राप्ताः सन्तः 'भूयः' पुनः 'न निवर्त्तन्ति' न आवर्त्तन्ते संसाराय इत्यर्थः, 'यतः' यस्मात् पुरुषात् 'एषा' 'पुराणी' चिरन्तनी अनादिः 'प्रवृत्तिः' संसारप्रवृत्तिः जगत्प्रवाहः 'प्रसृता' विसृता 'तं' यः पदशब्देनोक्तस्तम् 'एव' 'च' 'आद्यम्' आदौ भवं जगन्मूलभूतं 'पुरुषं' ब्रह्मेत्यर्थः 'प्रपद्ये' शरणं गतोऽस्मि (इत्येवं तदेकशरणतया परि-मार्गितव्यमित्यर्थः) (४)।

3, 4. Its form (or character) is not thus known (understood) here [in this world], nor [its] end, nor beginning, nor support (basis or foundation). After cutting down this firmly-rooted *Asvattha* with the strong weapon of non-attachment (3), that place (meaning Brahman) ought to be sought going where men return no more, in the spirit of exclusive devotion as follows : I seek refuge in that Primeval Person alone from whom this eternal stream [of the world] has flowed forth (4).

निर्मानमोहा जितसङ्गदोषा
अध्यात्मनित्या विनिवृत्तकामाः।
द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञै-
र्गच्छन्त्यमूढाः पदमव्ययं तत् ॥५॥

५। 'निर्मानमोहाः' मानः अहङ्कारः मोहः अविवेकः मिथ्याभिनिवेशः तौ मानमोहौ निर्गतौ मानमोहौ येभ्यः (न स्तः मानमोहौ येषां वा) ते मानमोहवर्जिताः, 'जितसङ्गदोषाः' जितः पराजितः वशीकृतः सङ्गदोषः पुत्रादिषु आसक्तिरूपः दोषः विषयेन्द्रियमनःसंसर्गरूपदोषः वा यैः ते, शत्रुमित्रसन्निधौ अपि द्वेषप्रीतिवर्जिताः इत्यर्थः इति आनन्दगिरिः, 'अध्यात्मनित्याः' अध्यात्मे आत्मज्ञाने परमात्मस्वरूपालोचने नित्याः परिनिष्ठिताः तत्पराः, 'विनिवृत्तकामाः' विशेषेण निर्लेपेन निवृत्ताः विरताः कामाः विषयभोगाः येषां ते, 'सुखदुःखसंज्ञैः' सुखदुःखनामकैः 'द्वन्द्वैः' रागद्वेषादिविरुद्धयुग्मैः प्रियाप्रियादिभिः 'विमुक्ताः' वियुक्ताः 'अमूढाः' अविद्याविरहिताः मोहवर्जिताः 'तत्' 'अव्ययम्' अक्षयं नित्यम् 'पदं' ब्रह्मेत्यर्थः 'गच्छन्ति' प्राप्नुवन्ति ।

5. Those who are free from pride and delusion, who have conquered the evil of attachment, who are constantly engaged in the contemplation of the Supreme Self, whose desires have entirely ceased, who are freed from the pairs of opposites named pleasure and pain, [and] who are not deluded, go to that imperishable place or goal (*i.e.*, Brahman).

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥६॥

६। 'तत्' पदं 'सूर्यः' 'न' भासयते प्रकाशयति, 'न' 'शशाङ्कः' चन्द्रः 'न' [च] 'पावकः' अग्निः [भासयते] ; 'यत्' पदं 'गत्वा' प्राप्य [योगिनः] 'न' 'निवर्तन्ते' संसाराय न आवर्तन्ते 'तत्' 'मम' परमात्मनः 'धाम' स्थानं स्वरूपं परमम् इति श्रीधरः । [कठवल्ली २।२।१५ द्रष्टव्या] ।

6. The sun lights not that [place], nor the moon, nor fire. That is my supreme abode going to which they (the *yogins*) return not.

ममैवांशो जीवलोके जीवभूतः सनातनः।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥७॥

७। 'जीवलोके' जीवानां लोके संसारे 'मम' 'एव' 'सनातनः' नित्यः 'अंशः' उपाधिपरिच्छिन्नः भागः अवयवः एकदेशः 'जीवभूतः' भोक्ता कर्त्ता इति प्रसिद्धः [सन्] (ममैव सनातनः जीवभूतः अंशः इति वा अन्वयः) 'प्रकृतिस्थानि' प्रकृतौ सूक्ष्मरूपेण स्थितानि 'मनःषष्ठानि' मनः षष्ठं येषां तानि 'इन्द्रियाणि' चक्षुरादिपञ्चकं तदपेक्षया षष्ठं मनः 'कर्षति' संसारोपभोगार्थम् आकर्षति ('जीवलोके कर्षति' इत्यपि वा अन्वयः संसारे प्रवर्त्तयति इत्यर्थः)।

7. In the world of living beings, an eternal portion of me, becoming the individual self, draws to itself the senses with the sensorium as the sixth (*i. e.*, the five external organs of sense and the sensorium), which are inherent in Prakriti.

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥८॥

८। 'ईश्वरः' देहादीनां स्वामी जीवः इत्यर्थः 'यत्' यदा 'शरीरं' देहम् 'अवाप्नोति' स्वीयकर्म्मवशात् गृह्णाति, 'यत्' यदा 'च' 'अपि' 'उत्क्रामति' शरीरात् वहिर्निर्गच्छति [तदा] 'एतानि' मनःषष्ठानि इन्द्रियाणि 'गृहीत्वा' पूर्व्वदेहात् आदाय, 'आशयात्' स्वस्थानात् कुसुमादेः सकाशात् 'गन्धान्' गन्धात्मकान् सूक्ष्मान् अंशान् [गृहीत्वा] 'वायुः इव' "वायुर्यथा कुसुमादेः

सकाशात् गन्धान् गृहीत्वा अन्यत्र याति तद्वदित्यर्थः।" 'संयाति' सम्यग् गच्छति शरीरान्तरमाप्नोति ।

8. When the ruler [of the body, *i.e.*, the individual self] assumes the body and also when he passes out of it, he goes, taking these (*i.e.*, the senses and the sensorium), even as the wind [goes or passes], taking scents from their source.

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥९॥

९ । 'अयं' जीवः 'श्रोत्रं' कर्णं 'चक्षुः' 'स्पर्शनं' त्वगिन्द्रियं, 'रसनं' जिह्वां 'घ्राणं' घ्राणेन्द्रियम् एतानि बाह्येन्द्रियाणि 'एव' 'च' चकारात् कर्मेन्द्रियाणि प्राणश्च इति मधुसूदनः, 'मनः' अन्तःकरणं 'च' 'अधिष्ठाय' आश्रित्य 'विषयान्' शब्दादीन् 'उपसेवते' उपभुङ्क्ते ।

9. This individual self, taking [as its instruments] the ear, the eye, and the organs of touch, taste and smell, and also the sensorium, enjoys the objects of the senses.

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥१०॥

१० । 'उत्क्रामन्तं' देहात् निष्क्रामन्तं (देहे एव) 'स्थितं' तिष्ठन्तं 'अपि' 'गुणान्वितम्' इन्द्रियादियुक्तं वा 'भुञ्जानं' विषयान् उपलभमानं गुणैः सत्त्वादिभिः अन्वितं युक्तं [जीवं] 'विमूढाः' अविवेकिनः 'न' 'अनुपश्यन्ति', 'ज्ञानचक्षुषः' ज्ञानमेव चक्षुर्येषां ते विवेकिनः [तु] 'पश्यन्ति' ।

10. Whether he (the embodied self) departs [from this body] or dwells [in it], and enjoys [the objects of sense], endowed with the senses, the deluded do not see him. Those [alone] see him who have the eye of knowledge.

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥११॥

११। 'यतन्तः' प्रयत्नं कुर्वन्तः ध्यानादिभिः प्रयतमानाः 'योगिनः' समाहितचित्ताः [केचित्] 'च' 'एनं' जीवात्मानम् 'आत्मनि' स्वस्यां बुद्धौ (शङ्करः), देहे (श्रीधरः) 'अवस्थितं' 'पश्यन्ति' उपलभन्ते ; 'यतन्तः' केचित् यतमानाः 'अपि' 'अकृतात्मानः' अनात्मज्ञाः अशुद्धबुद्धिनः 'अचेतसः' अनुदित-विवेकाः 'एनं' 'न' पश्यन्ति ।

11. Striving devotees see him dwelling in the body; but those who are of impure hearts and are not awakened, even though striving, do not see him.

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥१२॥

१२। 'आदित्यगतं' सूर्यस्थितं 'यत्' तेजः ज्योतिः, 'चन्द्रमसि' चन्द्रे 'च' 'यत्' [तेजः], 'अग्नौ' 'च' 'यत्' [तेजः] 'अखिलं' समस्तं 'जगत्' विश्वं 'भासयते' प्रकाशयति, 'तत्' 'तेजः' 'मामकं' मदीयं मम ज्योतिः 'विद्धि' जानीहि ।

12. Know that light to be mine which is in the

sun, in the moon, and in fire, and which illuminates the whole world.

गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥१३॥

१३। 'अहं' च' 'ओजसा' बलेन स्वशक्त्या 'गां' पृथिवीम् 'आविश्य' प्रविश्य अधिष्ठाय 'भूतानि' चराचराणि 'धारयामि'; [अहं] 'च' 'रसात्मकः' रसस्वभावः सर्व्वरसानाम् आकरः सोमः 'चन्द्रः' 'भूत्वा' 'सर्व्वाः' 'ओषधीः' ब्रीहियवाद्याः 'पुष्णामि' संवर्द्धयामि ।

13. And entering into the earth, I uphold all things (or beings) by my energy, and becoming the sap-giving moon, I nourish all plants.

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥१४॥

१४। 'अहं' 'वैश्वानरः' जठरानलः उदरस्थः अग्निः 'भूत्वा' 'प्राणिनां' 'देहम्' 'आश्रितः' प्रविष्टः [सन्] 'प्राणापानसमायुक्तः' प्राणः देहस्थः (ऊर्द्ध-गमनवान्) वायुः अपानः अवाग्गमनवान् वायुः ते प्राणापानौ ताभ्यां समायुक्तः संयुक्तः सहितः [सन्] 'चतुर्व्विधं' चर्व्यचोष्यलेह्यपेयात्मकम् 'अन्नम्' अशनं 'पचामि' पाकं करोमि ।

14. Becoming the fire of digestion, I enter the bodies of living creatures, and, being associated with the upward and downward vital airs, I digest the four kinds of food.

सर्वस्य चाहं हृदि सन्निविष्टो
मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम् ॥१५॥

१५। 'अहं' 'च' 'सर्व्वस्य' जीवजातस्य 'हृदि' मनसि, बुद्धौ इति शङ्करः 'सन्निविष्टः' अन्तर्यामिरूपेण प्रविष्टः, [अतः] 'मत्तः' मम सकाशात् एव 'स्मृतिः', 'ज्ञानम्', 'अपोहनं' तयोः स्मृतिज्ञानयोः अपसरणं 'च' [भवति], 'सर्व्वैः' 'वेदैः' 'च' 'अहं' परमात्मा 'एव' 'वेद्यः' ज्ञेयः सर्व्वात्मत्वात् तत्तद्देवतादिरूपेण वेदितव्यः ; 'वेदान्तकृत्' वेदानाम् अन्तभागः उपनिषत्, तस्याः रचयिता, यद्वा वेदानाम् अन्तम् अर्थनिर्णयं करोति यः सः वेदार्थनिर्णायकः, वेदान्तदर्शनकारः, "वेदान्तार्थसम्प्रदायकृत्" इति शङ्करः, "वेदान्तसम्प्रदायप्रवर्त्तकः ज्ञानगुरुः" इति श्रीधरः, 'वेदवित्' वेदार्थतत्त्वज्ञः 'च' 'अहम्' 'एव' सर्व्वेषाम् अन्तरात्मत्वात् ।

15. And I abide in the hearts of all. Memory and knowledge, as well as their disappearance, are from me. And it is I who am to be known by all the Vedas ; I am the author of the Vedanta and the knower of the Vedas (as the inmost self of all).

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥१६॥

१६। 'लोके' संसारे 'क्षरः' क्षरति इति, विनाशी, परिवर्त्तनशीलः, 'च' 'अक्षरः' अविनाशी, अपरिवर्त्तनीयः 'एव च इमौ' 'द्वौ' द्विविधौ "पृथक् राशीकृतौ" इति शङ्करः, 'पुरुषौ' [पुरुषौ]। कौ तौ पुरुषौ इति आह ;— 'सर्व्वाणि भूतानि' समस्तं विकारजातं (शङ्करः), ब्रह्मादिस्थावरान्तानि शरीराणि

(श्रीधरः) 'क्षरः' [पुरुषः उच्यते, तथा] 'कूटस्थः' कूटः राशिः शिलाराशिः पर्व्वतः इव क्षरेषु नश्यत्सु अपि निर्व्विकारतया तिष्ठति इति संसारबीजरूपा भगवच्छक्तिः 'अक्षरः [पुरुषः] उच्यते' [विवेकिभिः] । "क्षरः पुरुषः अनिमद्दस्तुसंसर्गी, अतएव शरीराभिनिवेशवान् बद्धो जीवः, अक्षरः शरीरानपेक्षी स्वस्वरूपे वर्त्तमानो मुक्तो जीवः" इति उपाध्यायः ।

16. There are these two [kinds of] Purushas (souls) in this world, namely, the Kshara (changing) and the Akshara (the unchanging). All living creatures are the changing, and the one who is perpetually the same, is the unchanging.

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥१७॥

१७ । 'तु', पक्षान्तरे 'अन्यः' एताभ्यां क्षराक्षराभ्याम् अत्यन्तविलक्षणः 'उत्तमः' उत्कृष्टतमः 'पुरुषः' 'परमात्मा' 'इति' [श्रुतिभिः] 'उदाहृतः' उक्तः 'यः' 'अव्ययः' सर्व्वविकारशून्यः 'ईश्वरः' 'लोकत्रयं' भूर्भुवः स्वराख्यं सर्व्वं जगत् इति यावत् 'आविश्य' प्रविश्य [तं] 'बिभर्त्ति' धारयति ।

17. On the other hand, there is another, namely, (the highest Person), called the *Paramátmá* (the Supreme Self), who, the imperishable Lord, pervades and sustains the three worlds.

यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥१८॥

१८। 'यस्मात्' यतः 'अहं' 'क्षरम्' 'अतीतः', अतिक्रान्तः तत्कारणत्वात्, 'अक्षरात्' 'अपि च' 'उत्तमः' ऊर्द्धतमः कार्य्यकारणविलक्षणत्वात्, 'अतः' 'लोके' संसारे 'वेदे' 'च' 'पुरुषोत्तमः' उत्तमः पुरुषः [इति] 'प्रथितः' प्रसिद्धः 'अस्मि', "सः उत्तमः पुरुषः" इति श्रुतेः (छान्दोग्योपनिषत् ८।१२।३)।

18. As I transcend the changeable and am higher than the unchangeable, so I am known in the world and in the Veda as Purushottama (the Highest Person).

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्।
स सर्व्वविद्भजति मां सर्व्वभावेन भारत ॥१९॥

१९। [हे] भारत', 'एवम्' उक्तप्रकारेण 'असंमूढः' निश्चितमतिः [सन्] 'यः' 'मां' 'पुरुषोत्तमं' परमात्मानं 'जानाति' 'सः' 'सर्व्ववित्' सर्व्वसारतत्त्वज्ञः 'सर्व्वभावेन' सर्व्वात्मरूपेण, सर्व्वात्मना वा 'माम्' [एव] 'भजति' सेवते।

19. O descendant of Bharata, he who, being undeluded, knows me thus as the Highest Person, knows all things and worships me in all my aspects (or with his whole heart).

इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ।
एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत ॥२०॥

२०। [हे] 'अनघ' अपाप, [हे] 'भारत' 'इति' पूर्व्वोक्तप्रकारेण

'गुह्यतमं' गोप्यतमम् अतिरहस्यम् 'इदं शास्त्रं' 'मया' 'उक्तम्' 'एतत्' मदुक्तं 'बुद्ध्वा' ज्ञात्वा, [यः कोऽपि] 'बुद्धिमान्' आत्मज्ञानवान् सम्यक्ज्ञानी 'कृतकृत्यः' कृतं कृत्यं सर्व्वं कर्त्तव्यं येन सः 'च' 'स्यात्' भवेत् ।

20. O sinless one, O descendant of Bharata, the most secret knowledge has thus been declared by me. Understanding this, one should become wise and successful in the discharge of one's duties.

दैवासुरसम्पद्विभागयोगो नाम षोडशोऽध्यायः

——:✱:✱:——

श्रीभगवान् उवाच

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥१॥
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥२॥
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥३॥

१-३। [श्रीभगवान् उवाच] [हे] 'भारत', 'अभयं' भयराहित्यं 'सत्त्वसंशुद्धिः' सत्त्वस्य चित्तस्य संशुद्धिः सुप्रसन्नता, 'ज्ञानयोगव्यवस्थितिः' ज्ञानयोगे आत्मज्ञानोपाये व्यवस्थितिः परिनिष्ठा, 'दानं' 'दमः' बाह्येन्द्रियसंयमः 'च', 'यज्ञः' 'च', 'स्वाध्यायः' वेदाध्ययनं 'तपः' शरीरपीडनादितपस्या, 'आर्जवं' ऋजुता सरलता, (१) 'अहिंसा' परपीडावर्ज्जनं, 'सत्यम्' 'अक्रोधः' 'त्यागः' विषयेषु औदास्यं, 'शान्तिः' चित्तोपरतिः अन्तःकरणस्य उपशमः, 'अपैशुनं' परोक्षे परदोषाकथनं, 'भूतेषु' दीनेषु, दुःखितेषु प्राणिषु 'दया' कृपा, 'अलोलुप्त्वं' लोभाभावः, अवर्णलोपस्तु आर्षः (श्रीधरः), 'मार्द्दवं' मृदुता, 'ह्रीः' लज्जा,

अकार्य्यप्रवृत्तौ सङ्कोचः, 'अचापलं' चापल्यहीनत्वं व्यर्थक्रियाराहित्यं, (३) 'तेजः' पराक्रमः 'क्षमा', 'धृतिः' धैर्य्यं, 'शौचं' शुचिता बाह्याभ्यन्तरशुद्धिः, 'अद्रोहः' जिघांसाराहित्यं, 'नातिमानिता' आत्मनः अतिमानित्वस्य अतिपूज्यत्वाभिमानस्य अभावः,— एते षड्विंशतिप्रकाराः धर्म्माः |—'दैवीं' देवयोग्यां सात्त्विकीं 'सम्पदं' वासनासन्ततिं (मधुसूदनः) 'अभि' अभिलक्ष्य तदाभिमुख्येन 'जातस्य' [पुंसः] 'भवन्ति'।

1-3. [The Lord said---] O descendant of Bharata, fearlessness, purity of heart, steadfastness in *jnana-yoga* (devotion or mental abstraction through spiritual knowledge), charity, restraint of the senses, sacrifice, study of the scriptures, austerity, uprightness; harmlessness, truth, absence of anger, renunciation, tranquillity, freedom from slander, compassion for all beings, uncovetousness, gentleness, modesty, absence of fickleness; vigour, forgiveness, fortitude, purity, absence of malice, absence of inordinate pride,—these are his who is born to the godly nature.

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ॥४॥

४। [हे] 'पार्थ', 'दम्भः' धर्म्मध्वजित्वं, धार्म्मिकत्वप्रदर्शनार्थं धर्म्मानुष्ठानं धार्म्मिकतया आत्मनः ख्यापनं 'दर्पः' धनविद्यादिनिमित्तः गर्व्वः 'अभिमानः' आत्मनि अतिपूज्यत्वारोपः 'च', 'क्रोधः' 'पारुष्यं' परुषवचनं शङ्करः निष्ठुरत्वं (श्रीधरः) 'एव' 'च', 'अज्ञानं' च, [एते दोषाः] 'आसुरीं' रजस्तमोमयीं 'सम्पदं' सम्पत्तिम् अशुभवासनासन्ततिम् 'अभि जातस्य' [पुरुषस्य भवन्ति]।

4. O son of Prithá, ostentation (arrogance or religious hypocrisy), insolence, self-conceit, anger, harshness, and ignorance,—these are his who is born to the demoniac nature.

दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता ।
मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव ॥५॥

५। 'दैवी' 'सम्पत्' 'विमोक्षाय' संसारबन्धनात् विमुक्तये, 'आसुरी' [सम्पत्] 'निबन्धाय' नियतः बन्धः संसारबन्धः, तदर्थं 'मता' शास्त्राणां तदनुसारिणां च अभिमता ; [हे] 'पाण्डव', 'मा शुचः' शोकं मा कार्षीः, [यतस्त्वं] 'दैवीं' 'सम्पदं' 'अभि जातः' अभिलक्ष्य जातः 'असि' ।

5. The godly nature is regarded as conducive to liberation and the demoniac to bondage. Grieve not, O Pándava ; for you are born to the godly nature.

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥६॥

६। 'अस्मिन्' 'लोके' संसारे 'दैवः' 'आसुरः' 'एव' 'च' 'द्वौ' द्विविधौ 'भूतसर्गौ' भूतानां जीवानां सर्गौ सृष्टी जीवसृष्टी [भवतः], 'दैवः' (भूतसर्गः) 'विस्तरशः' बहुप्रकारैः 'प्रोक्तः' मया कथितः (स्थितप्रज्ञलक्षणे द्वितीये, भक्तलक्षणे द्वादशे, ज्ञानलक्षणे त्रयोदशे, गुणातीतलक्षणे चतुर्दशे अध्याये) । [हे] 'पार्थ', 'आसुरं' भूतसर्गं 'मे' मत्तः मम वचनात् 'शृणु' ।

6. There are two kinds of created beings in this

world, the godly and the demoniac. The godly has been spoken of at length. Now hear from me, O son of Prithá, about the demoniac.

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥७॥

७। 'आसुराः' असुरस्वभावाः 'जनाः' 'प्रवृत्तिं' धर्म्मे प्रवर्त्तनं 'च' 'निवृत्तिं' अधर्म्मात् निवर्त्तनं 'च' 'न' 'विदुः' जानन्ति ; [अतः] 'तेषु' आसुरजनेषु 'न' 'शौचं' शुद्धत्वं, 'न' 'आचारः' सद्व्यवहारः, 'न' 'च' 'अपि' 'सत्यं' यथार्थभाषणं 'विद्यते' ।

7. Demoniac men know not either a propensity to virtue, or abstention from vice. In them, there is neither purity, nor good conduct, nor yet [any devotion to] truth.

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ॥८॥

८। 'ते' आसुराः जनाः 'जगत्' 'असत्यं' भ्रान्तिविजृम्भितम् 'अप्रतिष्ठम्' आश्रयहीनम् 'अनीश्वरं' नास्ति ईश्वरः नियन्ता यस्य तादृशम्, 'अपरस्परसम्भूतम्' अपरश्च परश्च इति अपरस्परम्, अपरस्परतः अन्यान्यतः स्त्रीपुंमिथुनात् सम्भूतम् उत्पन्नं 'किमन्यत्' किम् अन्यत् (वाच्यं), कारणमस्य नास्त्यन्यत् किञ्चित्, [किन्तु] 'कामहैतुकं' (स्त्रीपुंसयोः उभयोः) कामः एव प्रवाहरूपेण हेतुरस्य इत्येतत् [प्राहुः] ।

8. They (demoniac men) say that the world is unreal, unstable (*i. e.* without a firm basis), without a God (ruler), produced by mutual union (*i. e.*, union of male and female), and, further lit., what else ?), caused by lust..

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥९॥

९। 'एतां' 'दृष्टिं' दर्शनं 'अवष्टभ्य' आश्रित्य [एते] 'अल्पबुद्धयः' तुच्छमतयः 'नष्टात्मानः' नष्टस्वभावाः, मलिनचित्ताः, 'उग्रकर्माणः' उग्रं हिंस्रं कर्म्म येषां ते क्रूरकर्म्माणः हिंसात्मकाः, 'अहिताः' अनिष्टकारिणः [जनाः] 'जगतः' प्राणिजातस्य 'क्षयाय' नाशाय 'प्रभवन्ति' उद्भवन्ति ।

9. Holding this view, (these) harmful men of little knowledge, of lost souls, and of fearful deeds are born for the destruction of the world.

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
मोहाद् गृहीत्वाऽसद्ग्राहान् प्रवर्त्तन्तेऽशुचिव्रताः ॥१०॥

१०। 'दुष्पूरं' पूरयितुमशक्यं अशक्यपूरणं 'कामं' विषयतृष्णाम् 'आश्रित्य' 'दम्भमानमदान्विताः' दम्भः (अधार्म्मिकत्वेऽपि धार्म्मिकत्वख्यापनं), मानः (अपूज्यत्वेऽपि पूज्यत्वख्यापनं), मदः (उत्कर्षराहित्येऽपि उत्कर्षविशेषस्य अध्यारोपः), तैः अन्विताः युक्ताः [च सन्तः] 'मोहात्' अविवेकतः 'असद्ग्राहान्' अशुभाभिप्रायान् 'गृहीत्वा' उपादाय 'अशुचिव्रताः' अशुचीनि अपवित्राणि व्रतानि नियमाः कर्म्माणि येषां ते [सन्तः] [ते] 'प्रवर्त्तन्ते' आत्मानं कर्म्मणि नियोजयन्ति ।

10. Cherishing some insatiable desire, and filled with arrogance, pride and infatuation, they set to work, adopting wicked resolves through delusion and engaging in unholy practices.

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥११॥
आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥१२॥

११, १२। 'प्रलयान्तां प्रलयः मरणं स एव अन्तः यस्याः तां मरणान्ताम् 'अपरिमेयां' परिमातुम् अशक्यां 'च' 'चिन्तां' 'उपाश्रिताः' अवलम्बिताः 'कामोपभोगपरमाः' कामानाम् इष्टवस्तूनाम् उपभोगः सेवा एव परमः पुरुषार्थः येषां ते, 'एतावत्' कामभोगमात्रम् 'इति' एवं 'निश्चिताः' कृतनिश्चयाः, कामभोगः एव परमः पुरुषार्थः नान्यत् अस्ति इत्येवं निश्चितात्मानः (११), 'आशापाशशतैः' आशाः आकाङ्क्षाः एव पाशाः रज्जवः तेषां शतैः 'बद्धाः' आकृष्यमानाः 'कामक्रोधपरायणाः' कामक्रोधौ परम् अयनं परः आश्रयः येषां ते [सन्तः] [ते] 'कामभोगार्थं' कामभोगप्रयोजनाय न धर्मार्थम् इत्यर्थः) 'अन्यायेन' अवैधेन उपायेन, चौर्यादिना 'अर्थसञ्चयान्' अर्थानां सञ्चयान् राशीन् लब्धुम् 'ईहन्ते' चेष्टन्ते (१२)।

11, 12. Entertaining unbounded thought ending only with death, with sensual enjoyment as their highest aim, thinking this is all that is disirable (11), bound by a hundred cords of desire, given over to lust and anger, they strive to obtain hoards of wealth by unfair means for the purpose of sensual enjoyment.

इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥१३॥
असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ॥१४॥
आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥१५॥
अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥१६॥

१३-१६ । 'अद्य' इदानीं 'मया' 'इदं' द्रव्यं 'लब्धं', 'इदम्' (अन्यत्) 'मनोरथं' मनसः प्रियम् ईप्सितं 'प्राप्स्ये' प्राप्स्यामि ; 'इदम्' 'अस्ति', 'पुनः' 'मे' मम 'इदम्' 'अपि' 'धनं' 'भविष्यति' (१३) ; 'असौ' 'शत्रुः' 'मया' 'हतः', 'अपरान्' अन्यान् शत्रून्) 'च' 'अपि' 'हनिष्ये' हनिष्यामि ; 'अहम्' 'ईश्वरः' कर्त्ता, 'अहं' 'भोगी' भोगकर्त्ता 'सिद्धः' कृतकृत्यः, 'बलवान्' 'सुखी' (१४) ; [अहम्] 'आढ्यः' धनादिसम्पन्नः, 'अभिजनवान्' कुलीनः 'अस्मि' 'मया सदृशः अन्यः' कः 'अस्ति' ? [अहं] 'यक्ष्ये' यागानुष्ठानं करिष्यामि 'दास्यामि' दानं करिष्यामि, 'मोदिष्ये' हर्षं प्राप्स्यामि, 'इति' एवम् 'अज्ञानविमोहिताः' अविवेकभावम् आपन्नाः (१५) ; 'अनेकचित्तविभ्रान्ताः' अनेकेषु मनोरथेषु प्रवृत्तं चित्तं अनेकचित्तं तेन विभ्रान्ताः विक्षिप्ताः, 'मोहजालसमावृताः' मोहः अविवेकः अज्ञानं, तदेव जालम् इव (आवरणात्मकत्वात्) तेन समावृताः सम्यक् आच्छादिताः 'कामभोगेषु' कामानाम् उपभोगेषु, 'प्रसक्ताः' अभिनिविष्टाः [सन्तः] [ते] 'अशुचौ' अपवित्रे 'नरके' पतन्ति ।

13-16. "This has been obtained by me to-day ; this desired thing I shall obtain [tomorrow] ; this (wealth) is mine ; again this wealth also shall be mine [in

future]; that enemy has been killed by me. and others also I shall kill; I am the lord, I am the enjoyer, I am successful, powerful, happy; I am rich and of noble birth Who else is like unto me? I will sacrifice, I will give (make gifts), I will rejoice."---Thus infatuated by ignorance, bewildered by numerous thoughts, enclosed by the net of delusion, and given to the gratification of desire, they fall into foul hell.

आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्व्वकम् ॥१७॥

१७। 'आत्मसम्भाविताः' आत्मनैव सम्भाविताः पूजातां नीताः (न तु साधुभिः कैश्चित्) आत्मश्लाघिनः, 'स्तब्धाः' अनम्राः, 'धनमानमदान्विताः' धनेन धननिमित्तः यः मानः मदश्च ताभ्याम् अन्विताः किंवा धनेन मानेन च यः मदः तेन अन्विताः युक्ताः [सन्तः] 'ते' 'दम्भेन' धर्म्मध्वजितया (न तु श्रद्धया) 'नामयज्ञैः' नाममात्रेण ये यज्ञाः यद्वा नाममात्रप्रसिद्धये ये यज्ञाः तैः 'अविधि-पूर्व्वकं' यथा भवति तथा 'यजन्ते' पूजां कुर्व्वन्ति ।

17. Self-glorified, stubborn, and filled with the intoxication of wealth and pride, they, with ostentatiousness (or religious hypocrisy), worship with nominal sacrifice, without following any prescribed rule.

अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥१८॥

१८। [एते पूर्व्वोक्ताः] 'अहङ्कारं' 'बलं' 'दर्पं' 'कामं' 'क्रोधं' 'च' 'संश्रिताः' संप्राप्ताः [सन्तः] 'आत्मपरदेहेषु' आत्मदेहे परदेहेषु च [चिद्रूपेण

अन्तर्यामिरूपेण वा अवस्थितं] 'मां' 'प्रद्विषन्तः' मच्छासनातिवर्त्तित्वं प्रद्वेषः तं कुर्वन्तः (शङ्करः) 'अभ्यसूयकाः' सन्मार्गवर्त्तिनां गुणेषु असहमानाः दोषारोपकाः [भवन्ति] ।

18. Resorting to egotism, force, insolence, lust, and anger, and hating me in their own and others' bodies, they become detractors [of virtuous men].

तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥१९॥

१९। 'अहं' [मां] 'द्विषतः' द्वेषं कुर्वतः 'क्रूरान्' निर्दयान् नृशंसान् 'नराधमान्' 'अशुभान्' अशुभकर्मकारिणः 'संसारेषु' जन्ममृत्युमार्गेषु 'आसुरीषु' अतिक्रूरासु 'योनिषु' व्याघ्रसर्पादियोनिषु (श्रीधरः) 'एव' 'अजस्रम्' अनवरतं 'क्षिपामि' पातयामि ।

19. Those evil-doers, hating [me] cruel, and worst of men, I hurl down continually into demoniac wombs in the course of their births.

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥२०॥

२०। [हे] 'कौन्तेय', 'मूढाः' अविवेकिनः 'जन्मनि जन्मनि' प्रतिजन्म 'आसुरीं' तमोबहुलां 'योनिम्' 'आपन्नाः' प्राप्ताः तासु योनिषु जायमानाः सन्तः 'माम्' ईश्वरम् 'अप्राप्य' अनासाद्य 'एव' 'ततः' तस्मादपि 'अधमां' निकृष्टतमां गतिं' कृमिकीटादिजन्म (श्रीधरः) 'यान्ति' प्राप्नुवन्ति ।

20. Entering into demoniac wombs, the deluded, without attaining to me birth after birth, go down, O son of Kuntí, to a state [even] lower than these.

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥२१॥

२१। 'कामः', 'क्रोधः', 'तथा' 'लोभः' [इति] 'इदं' 'त्रिविधं' त्रिप्रकारं 'नरकस्य' 'द्वारम्', [अतएव] 'आत्मनः' 'नाशनं' नीचयोनिप्रापकं (श्रीधरः) सर्व्वानर्थमूलं (मधुसूदनः), 'तस्मात्' 'एतत्' 'त्रयं' 'त्यजेत्' ।

21. Lust, anger and greed,—this is the threefold gate to hell, [and so] destructive of the self. Therefore, one ought to abandon these three.

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥२२॥

२२। [हे] 'कौन्तेय', 'एतैः' 'त्रिभिः' कामादिभिः 'तमोद्वारैः' तमसः नरकस्य द्वारभूतैः 'विमुक्तः' 'नरः' 'आत्मनः' 'श्रेयः' श्रेयःसाधनं तपोयोगादिकम् 'आचरति' अनुतिष्ठति, ततः तदनन्तरं 'पराम्' उत्कृष्टां 'गतिं' मोक्षमित्यर्थः 'याति' प्राप्नोति ।

22. O son of Kuntí, freed from these three gates to darkness (*i. e.* hell), a man works out his own good (or the final liberation of the self), and then attains to the supreme goal.

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥२३॥

२३ । 'यः' 'शास्त्रविधिं' वेदादिशास्त्रविहितं धर्मम् 'उत्सृज्य' परित्यज्य 'कामकारतः' कामप्रयुक्तः सन् (शङ्करः) 'वर्तते' विहितं नाचरति निषिद्धमप्याचरति इत्यर्थः, 'सः' 'सिद्धिं' पुरुषार्थयोग्यतां (शङ्करः) तत्त्वज्ञानं (श्रीधरः) 'न' 'अवाप्नोति' प्राप्नोति, 'न सुखं न [च] परां गतिं' [प्राप्नोति] ।

23. He who, abandoning scriptural ordinance, lives, acting at will (*i.e.*, unrestrained) under the impulse of desire, attains neither success (or perfection), nor happiness, nor the supreme goal.

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥२४॥

२४ । 'तस्मात्' 'कार्याकार्यव्यवस्थितौ' इदं कार्यं कर्तव्यम् इदम् अकार्यम् अकर्तव्यं च एतस्यां व्यवस्थायां स्थिरीकरणे 'शास्त्रं' वेदादिशिष्टवचनं 'ते' तव 'प्रमाणं' ज्ञानसाधनं (शङ्करः), मार्गनिर्देशकरूपेण आश्रयनीयम्, [अतः] 'इह' संसारे कर्माधिकारभूमौ (मधुसूदनः) 'शास्त्रविधानोक्तं' शासनम् एव विधानं कुर्यात् न कुर्यात् इत्येवं लक्षणं तेन उक्तं स्वकर्म यत् तत् 'ज्ञात्वा' 'कर्म' 'कर्तुम्' 'अर्हसि' योग्यो भवसि ।

24. Therefore, in determining what ought and what ought not to be done, scripture is your authority. So, knowing what is prescribed by scriptural ordinance, you ought to work here (in this world, or in this stage of *karma-yoga*).

श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः

——:*:——

अर्जुन उवाच

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयाऽन्विताः ।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥१॥

१। [अर्ज्जुन उवाच] [हे] 'कृष्ण', 'ये' 'शास्त्रविधि' शास्त्रीयं विधानम् 'उत्सृज्य' परित्यज्य 'श्रद्धया' 'तु' 'अन्विताः' युक्ताः केवलम् आचारप्रामाण्येन श्रद्धान्विताः सन्तः केवलम् आस्तिक्यबुद्धा वा इत्यर्थः 'यजन्ते' देवादीन् पूजयन्ति 'तेषां' 'निष्ठा' स्थितिः 'का' कीदृशी ? तेषां निष्ठायाः कः आश्रयः—'सत्त्व', 'रजः' 'आहो' अथवा 'तमः' ?

1. [Arjuna said—] O Krishna, what is the state of those who worship (or perform sacrifice), abandoning scripture-ordinance, but full of faith ?—(Is it one of) *sattva* or *rajas* or *tamas* ?

श्रीभगवान् उवाच

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥२॥

२। [श्रीभगवान् उवाच—] 'देहिनां' 'सात्त्विकी', 'राजसी', 'च', 'तामसी' 'च' 'इति' 'त्रिविधा' त्रिप्रकारा 'एव' 'श्रद्धा' 'भवति'; 'सा'

(श्रद्धा) 'स्वभावजा' स्वभावः पूर्व्वसंस्कारः जन्मान्तरकृतः धर्म्मादिसंस्कारः तस्मात् जाता ; 'तां' त्रिविधां श्रद्धां 'शृणु' ।

2. [The Lord said :] The faith of the embodied is of three kinds, *sáttvika* (*i.e.*, of the quality of purity or goodness), *rajasika* (of the quality of passion), and *támasika* (of the quality of darkness). It is born of Nature (*i.e.*, according to the individual nature or disposition of the embodied as determined by acts in a former life).

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥३॥

३ । [हे] 'भारत', 'सर्व्वस्य' प्राणिजातस्य विवेकिनः अविवेकिनो वा लोकस्य 'श्रद्धा' 'सत्त्वानुरूपा' सत्त्वतारतम्यानुसारिणी सत्त्ववैचित्र्यात् विचित्रा इत्यर्थः 'भवति' ; 'अयं' 'पुरुषः' संसारी जीवः 'श्रद्धामयः' त्रिविधश्रद्धाप्रचुरः ; 'यः' जीवः 'यच्छ्रद्धः' या यादृशी श्रद्धा यस्य जीवस्य सः यच्छ्रद्धः, 'सः' 'एव' 'सः' तादृशश्रद्धायुक्तः (यस्य यादृशी श्रद्धा सः तच्छ्रद्धानुरूप एव) [भवति] ।

3. O descendant of Bharata, the faith of each and every man is in accordance with the proportion of the quality of *sattva* in him. This Purusha (*i.e.*, every man) is full of faith. As his faith is, so is he (lit., 'of what faith one is, one is even that,' *i.e.*, a man's faith shows what his nature or character is).

यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥४॥

४ । 'सात्त्विकाः' सत्त्वप्रधानाः सत्त्वनिष्ठाः जनाः 'देवान्' सत्त्वप्रकृतीन्

देवान् एव 'यजन्ते' पूजयन्ति ; 'राजसा:' रजोगुणप्रधाना: 'यक्षरक्षांसि' रज:प्रकृतीन् यक्षान् राक्षसान् च [यजन्ते] ; 'अन्ये' 'तामसा:' तम:प्रधाना: 'जना:' 'प्रेतान्' 'भूतगणान्' 'च' 'यजन्ते' ।

4. Men of *sattva* worship the gods ; those of *rajas* worship *yakshas* and *rākshasas* ; and others, men of *tamas*, (worship) the *pretas* and *bhútas*.

[The *yakshas* and *rákshas* are believed to be superior spirits, the former being generally demi-gods and the latter demons. The *pretas* and *bhútas* are inferior spirits, being ghosts or departed spirits, the former being supposed to haunt cemeteries, cremation-grounds, and other unclean places, and the latter occasionally to enter into and animate dead bodies and possess even living bodies].

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जना: ॥
दम्भाहङ्कारसंयुक्ता: कामरागबलान्विता: ॥५॥
कर्शयन्त: शरीरस्थं भूतग्राममचेतस: ।
मां चैवान्त:शरीरस्थं तान् विद्ध्यासुरनिश्चयान् ॥६॥

५-६ । 'दम्भाहङ्कारसंयुक्ता:' दम्भश्च अहङ्कारश्च ताभ्यां संयुक्ता:, 'कामरागबलान्विता:' काम: अभिलाष: च राग: आसक्ति: च बलश्च तै: अन्विता: युक्ता: (अथवा कामश्च रागश्च कामरागौ तत्कृतं बलं कामरागबलं तेन अन्विता:) ये 'अचेतस:' अविवेकिन: 'जना:' 'शरीरस्थं' देहे स्थितं 'भूतग्रामं' भूतानां क्षित्यादीनां ग्रामं समूहं 'अन्त:शरीरस्थं' देहमध्ये अन्तर्यामितया स्थितं 'मां' 'च' 'कर्शयन्त:' कृशं कुर्वन्त: (वृथैव उपवासादिभि:) 'अशास्त्रविहितं' शास्त्रविरुद्धमिति भाव: 'घोरं' भयङ्करं प्राणिनां आत्मनश्च पीडाकरं 'तप:' तप्यन्ते

निर्व्वर्त्तयन्ति, कुर्व्वन्ति, 'तान्' 'आसुरनिश्चयान्' आसुर: अतिक्रूर: निश्चय: निर्णय: अवधारणं येषां तान् अतिक्रूरमतीन् इति भाव: 'विद्धि' जानीहि। ['कर्षयन्त:' इति वा पाठ:]।

5, 6. Those silly men who practise severe austerity not enjoined by scripture, full of ostentation and egotism, given to lust, attachment and violence, and weakening the collection of elements in the body and also me, who dwell in the interior of the body,—know them to be of demoniac resolves [If the reading is कर्षयन्त:, the rendering is 'torturing'; and if कर्शयन्त:, it is 'weakening'].

आहारस्त्वपि सर्व्वस्य त्रिविधो भवति प्रिय:।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥७॥

७। 'सर्व्वस्य' जनस्य 'आहार:' भक्ष्यवस्तु अन्नादि 'अपि' 'तु' 'त्रिविध:' 'प्रिय:' इष्ट: 'भवति'; 'तथा' 'यज्ञ:', 'तप:', 'दानं' 'च' (यज्ञतपोदानानि च त्रिविधानि इत्यर्थ:)। 'तेषां' आहारयज्ञतपोदानानाम् 'इमं' वक्ष्यमाणं 'भेदं' वैलक्षण्यं 'शृणु'।

7. The food also, according as it is dear to each, is of three kinds, as also sacrifice (or worship), penance, and charity. Hear this distinction of them.

आयु:सत्त्वबलारोग्यसुखप्रीतिविवर्धना:।
रस्या: स्निग्धा: स्थिरा हृद्या आहारा: सात्त्विकप्रिया: ॥८॥

८। 'आयु:सत्त्वबलारोग्यसुखप्रीतिविवर्द्धना:' आयु: जीवनं, सत्त्वम्

उत्साहः पराक्रमः शौर्यं वा, बलं शक्तिः, आरोग्यं रोगराहित्यं सुखं चित्त-प्रसादः, प्रीतिः हर्षः, तासां विवर्द्धनाः विशेषेण वृद्धिकराः, 'रस्याः' रसवन्तः, 'स्निग्धाः' स्नेहयुक्ताः (स्नेहः=तैलादि द्रववस्तु), 'स्थिराः' देहे सारांशेन चिरकालस्थायिनः, 'हृद्याः' हृदयप्रियाः 'आहाराः' भक्ष्यभोज्यादयः 'सात्त्विक-प्रियाः' सात्त्विकस्य जनस्य इष्टाः ।

8. The foods which prolong life and increase energy, strength, health, happiness and joy, and which are savoury, oily, substantial, and agreeable, are dear to the men of *sattva.*

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥९॥

९ । 'कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः' कटुः तिक्तः (निम्बादिः), अम्लः, लवणः, अत्युष्णः, तीक्ष्णः (मरिचादिः), रूक्षः विस्नेहः, विदाही सन्तापकः (सर्षपादिः), एते आहाराः ['अति' शब्दः कट्वादिषु सर्व्वत्र योज्यः इति शङ्करः], 'दुःखशोकामयप्रदाः' 'दुःखं, शोकः, आमयः रोगः, एतान् प्रददति प्रयच्छन्ति इति एवम्भूताः 'आहाराः' 'राजसस्य' रजोगुणप्रधानस्य 'इष्टाः' प्रियाः ।

9. The foods which are bitter, acid, salted, over-hot, pungent, dry, and burning, and which cause pain, grief and disease, are agreeable to a man of *rajas.*

यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥१०॥

१० । 'यातयामं' यातः यामः प्रहरो यस्य पक्वस्य सिद्धान्नादेः तत् यात-

यामं गतयामं यावस्थां प्राप्तम् इत्यर्थः, मन्दपक्वं इति शङ्करः, 'गतरसं' रसरहितं विरसतां प्राप्तं; शुष्कं, 'पूति' दुर्गन्धि, 'पर्युषितं' दिनान्तरपक्वं, पक्वं सत् रात्र्यन्तरितं (शङ्करः), 'उच्छिष्टम्' अन्यभुक्तावशिष्टम्, 'अमेध्यम्' अशुचि, अपवित्रं, अयज्ञार्हं (शङ्करः), अभक्ष्यं (श्रीधरः), 'अपि' 'च' 'यत्' 'भोजनं' भोज्यं [तत्] 'तामसप्रियं' तामसजनस्य प्रियं ।

10. That food which is cold (or half-cooked), tasteless (*i.e.*, which has lost its flavour), putrid, stale, refuse (or rejected, meaning 'leavings' or 'offals'), and impure, is dear to men of *tamas*.

अफलाकाङ्क्षिभिर्यज्ञो विधिदिष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥११॥

११ । 'अफलाकाङ्क्षिभिः' फलाकाङ्क्षारहितैः [पुरुषैः] 'यष्टव्यम् एव' यज्ञानुष्ठानमेव कार्यं, नान्यत् फलं साधनीयम् 'इति' 'मनः' 'समाधाय' एकाग्रं कृत्वा 'विधिदिष्टः' विधिना विहितः 'यः' 'यज्ञः' 'इज्यते' अनुष्ठीयते, क्रियते 'सः' 'सात्त्विकः' 'यज्ञः' ।

11. That sacrifice (or worship) is of *sattva*, which, being prescribed by (scriptural) ordinance, is performed by men who desire no fruit, and fix their mind [on this] as 'sacrifice or worship' which *must* be performed [for its own sake].

अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥१२॥

१२ । [च] 'भरतश्रेष्ठ', 'फलम्' 'अभिसन्धाय' उद्दिश्य 'तु' 'दम्भार्थं'

धार्म्मिकत्वख्यापनार्थं स्वमहत्त्वख्यापनाय 'एव' 'च' 'यत् इज्यते' यजनं क्रियते यज्ञः अनुष्ठीयते 'तं यज्ञं' 'राजसं' 'विद्धि' ।

12. But, O best of the race of Bharata, know that [sacrifice] to be of *rajas* which is performed with a view to fruit and for ostentation.

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥१३॥

१३ । 'विधिहीनं' शास्त्रोक्तविधिशून्यं तद्विपरीतं वा, 'असृष्टान्नं' न सृष्टं दत्तं ब्राह्मणादिभ्यः अन्नं यस्मिन् यज्ञे तम् अदत्तान्नं, 'मन्त्रहीनम्' अमन्त्रकर्म, 'अदक्षिणं' दक्षिणारहितं, 'श्रद्धाविरहितं' श्रद्धाशून्यं 'यज्ञं' तामसं' तमोनिर्वृत्तं 'परिचक्षते' कथयन्ति [शिष्टाः] ।

13. That sacrifice (or worship) they (the wise) declare to be of *tamas*, which is without (*i.e.*, not enjoined by) scriptural ordinance, in which food is not distributed [to Bráhmanas, etc.], which is without *mantras* (hymns or sacred texts or formulas of prayer), in which there is no gift [of fee or other presents to the officiating priests), and which is devoid of faith.

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥१४॥

१४ । 'देवद्विजगुरुप्राज्ञपूजनं' देवाश्च, द्विजाश्च, गुरवः पित्रादयश्च, प्राज्ञाः ज्ञानिजनाः पण्डिताः तत्त्वविदश्च तेषां पूजनं प्रणामशुश्रूषादि, 'शौचं' शरीरशोधनम्, 'आर्ज्जवं' ऋजुत्वं, ब्रह्मचर्य्यम् अवैधरतिनिवृत्तिः, 'अहिंसा' प्राणिनां अपीडनं 'च' 'शारीरं' शरीरेण साध्यं 'तपः' 'उच्यते' ।

14. Honouring the gods, the *dvijas* (the twice-born, or the regenerate), the preceptors, and the wise, purity, straightforwardness, life as a Brahmacharin (*i.e.*, a life of celibacy and continence), and harmlessness,—all this is said to be the austerity (or discipline) of the body.

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥१५॥

१५। 'अनुद्वेगकरं' प्राणिनाम् अदुःखकरं, 'सत्यं' 'प्रियहितं' प्रियं श्रुतिसुखं हितं परिणामे सुखकरं 'च' 'यत्' 'वाक्यं', 'स्वाध्यायाभ्यसनं' वेदाध्ययनं 'च' 'एव' 'वाङ्मयं' वाक्प्रधानं वाक्येन निर्व्वर्त्त्यं 'तपः' 'उच्यते'।

15. The speech that causes no annoyance, and is true, agreeable and beneficial, and also the habitual study of the scriptures,—this is said to be the austerity of speech.

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत् तपो मानसमुच्यते ॥१६॥

१६। 'मनःप्रसादः' मनसः प्रशान्तिः (स्वच्छता वा), 'सौम्यत्वम्' अक्रूरता, 'मौनं' तूष्णीम्भावः, वाक्संयमः, मुनेर्भावः मननं (श्रीधरः), 'आत्मविनिग्रहः' आत्मनः मनसः विनिग्रहः विषयेभ्यः प्रत्याहारः 'भावसंशुद्धिः' भावस्य हृदयस्य संशुद्धिः निर्म्मलता, 'इति' 'एतत्' 'मानसं' मनसा निर्व्वर्त्त्यं 'तपः' उच्यते।

16. Serenity of mind, placidity, silence, self-restraint, purity of heart,—all this is said to be the austerity of the mind.

श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥१७॥

१७। 'अफलाकाङ्क्षिभिः' फलाकाङ्क्षारहितैः 'युक्तैः' समाहितैः एकाग्रचित्तैः 'नरैः' 'परया' प्रकृष्टया श्रेष्ठया 'श्रद्धया आस्तिक्यबुद्ध्या 'तप्तम्' अनुष्ठितं 'तत्' पूर्वोक्तं 'त्रिविधं' 'तपः' 'सात्त्विकं' 'परिचक्षते' कथयन्ति [शिष्टाः]।

17. They (the wise) declare that threefold austerity (namely, that of body, speech and mind) to be of *sattva*, which is practised with supreme faith by men who are devoted [to the Supreme Self] and who desire no fruit.

सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥१८॥

१८। 'सत्कारमानपूजार्थं' सत्कारः साधुकारः साधुरयम् इत्येवं वाक्पूजा, मानः माननं सम्माननम् अभिवादनादिना दैहिकी पूजा, पूजा अर्थलाभादिरूपा पादप्रक्षालनादिरूपा वा, एतदर्थं 'दम्भेन' धर्मध्वजित्वेन 'च' 'एव' 'यत्' 'तपः' 'क्रियते' [नरैः], [अतएव] 'इह' संसारे 'चलम्' अनित्यम् 'अध्रुवं' क्षणिकं 'तत्' 'तपः' 'राजसं' 'प्रोक्तं' कथितं।

18. That austerity is said to be of *rajas* which is done with hypocrisy (or ostentation) for gaining respect (praise, or hospitable reception), honour and reverence, and which is transitory and unstable here (in this world).

मूढग्राहेणात्मनो यत् पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥१९॥

१९। 'मूढग्राहेण' मूढः आत्मज्ञानः अविवेकी तस्य ग्राहः दुराग्रहः दुष्टः अभिनिवेशः तेन अविवेककृतेन निश्चयेन 'आत्मनः' स्वस्य देहादेरित्यर्थः 'पीडया' पीडनेन 'परस्य' अन्यस्य 'उत्सादनार्थं' विनाशार्थं 'वा' 'यत्' 'तपः' 'क्रियते' 'तत्' 'तामसम्' उदाहृतं कथितम्।

19. That austerity is declared to be of *tamas* which is done under a wrong notion, with torture of self and for the destruction of another.

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥२०॥

२०। 'देशे' पुण्यक्षेत्रे, 'काले' पुण्यकाले 'च', 'पात्रे' सत्पात्रे 'च' 'दातव्यम्' 'इति' एवं निश्चयेन (न तु फलाभिसन्धिना) 'अनुपकारिणे' यः कश्चित् अपि उपकारं न करोति यो वा प्रत्युपकारे असमर्थः तस्मै जनाय 'यत्' 'दानं' 'दीयते' 'तत्' 'दानं' 'सात्त्विकं' 'स्मृतं' विवेचितम्।

20. That gift is regarded to be of *sattva* which is given in a right place, at a right time, and to a right person, and to one who does no good or service (or is incapable of doing it in return), with the conviction that it is a duty to give.

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥२१॥

२१। 'यत्' (दानं) 'तु' 'प्रत्युपकारार्थं' प्रत्युपकारम् उद्दिश्य (काले तु अयं मां प्रत्युपकरिष्यति इत्येवम् अर्थं फलम् अभिलक्ष्य) 'फलं' (स्वर्गादिकम्)

'उद्दिश्य' 'वा', 'पुनः' 'परिक्लिष्ट' विषक्तं प्रयुक्तं यथा स्यात् तथा 'दीयते', 'तत्' 'दानं' 'राजसं' स्मृतम्'।

21. But that gift is regarded to be of *rajas* which is given with a view to a return of service (or benefit), or for the sake of fruit, or with pain (*i.e.*, grudgingly).

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत् तामसमुदाहृतम् ॥२२॥

२२। 'अदेशकाले' अदेशे अस्थाने, अकाले 'अपात्रेभ्यः' प्राप्तुम् अयोग्येभ्यः 'च' 'असत्कृतं प्रियवचनादिरहितम् 'अवज्ञातम्' पात्रतिरस्कारयुक्तं 'यत्' दानं 'दीयते' 'तत्' 'तामसम्' 'उदाहृतं' कथितम्।

22. And that gift is declared to be of *tamas* which is given at a wrong place or time, to unworthy persons, without respect or kindness, and with contempt.

ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥२३॥

२३। 'ओं तत् सत्' 'इति' 'ब्रह्मणः' परमात्मनः 'त्रिविधः' 'निर्देशः' नाम 'स्मृतः' कथितः [प्रश्न-माण्डूक्य-छान्दोग्यादिषु वेदान्तेषु]। 'तेन' त्रिविधेन निर्देशेन 'ब्राह्मणाः', 'वेदाः' 'च', 'यज्ञाः' 'च' 'पुरा' पूर्वं 'विहिताः' नियताः प्रकटिताः प्राक्सृष्टिविशेषः।

23. "Om, Tat, Sat,"—this has been laid down as the

threefold designation of Brahman. By it (*i.e.*, by this threefold designation) were ordained of old the Brahmanas, the Vedas, and the sacrifices.

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥२४॥

२४। 'तस्मात्' एवं ब्रह्मणो निर्द्देशत्रयप्रशस्तत्वात् 'ओम्' 'इति' 'उदाहृत्य' उच्चार्य्य 'ब्रह्मवादिनां' ब्रह्मवदनशीलानां वेदवादिनां वा 'विधानोक्ताः' शास्त्रोक्ताः 'यज्ञदानतपःक्रियाः' यज्ञादीनि कर्म्माणि 'सततं' सर्व्वदा 'प्रवर्त्तन्ते' अनुष्ठीयन्ते ।

24. Therefore, all acts of sacrifice, gift and austerity of the knowers of Brahman or followers of the Vedas, as prescribed by [scriptural] ordinance, commence with the utterance of Om.

तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः ।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥२५॥

२५। 'तत्' 'इति' निर्द्देशं ब्रह्माभिधानम् [उच्चार्य्य] 'फलम्' 'अनभिसन्धाय' फलाभिसन्धिम् अकृत्वा 'मोक्षकाङ्क्षिभिः' मुमुक्षुभिः 'विविधाः' 'यज्ञतपःक्रियाः' यज्ञक्रियाः तपःक्रियाश्च 'दानक्रियाः' 'च' 'क्रियन्ते' निर्व्वर्त्त्यन्ते ।

25. Uttering 'Tat,' and without aiming at fruit, are done the various acts of sacrifice and austerity and of gift by those who desire final emancipation.

सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥२६॥

२६। [हे] 'पार्थ', 'सद्भावे' अस्तित्वे, ब्रह्मणो विद्यमानत्वे 'साधुभावे' साधुत्वे 'च' 'सत्' 'इति' 'एतत्' पदं 'प्रयुज्यते' उच्यते इत्यर्थः, 'तथा' 'प्रशस्ते' माङ्गलिके 'कर्मणि' (विवाहादौ) [च] 'सत्' 'शब्दः' 'युज्यते' प्रयुज्यते, सङ्गच्छते वा ।

26. O son of Prithá, the word 'Sat' is used in reference to reality (or existence) and goodness; and the word 'Sat' is also used in an auspicious act.

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥२७॥

२७। 'यज्ञे', 'तपसि', 'दाने' 'च' [या] 'स्थितिः' अवस्थानं स्थिरता [सा] 'च' 'सत्' 'इति' 'उच्यते' [विद्वद्भिः]; 'तदर्थीयं' यज्ञदानतपोऽर्थीयम् अथवा यस्येदं नामत्रयम् तदर्थीयं ईश्वरार्थीयं 'कर्म' 'च' 'एव' 'सत्' 'इति' 'एव' 'अभिधीयते' कथ्यते ।

27. Steadfastness in sacrifice, austerity and gift, is called 'Sat', and an action for the sake of these (namely, sacrifice, austerity and gift, or for the sake of 'Tat', (*i.e.*, Brahman) is also called 'Sat'.

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत् प्रेत्य नो इह ॥२८॥

२८। 'अश्रद्धया' 'हुतं' [हवनं] 'दत्तं' [दानं] 'तप्तम्' अनुष्ठितं 'तपः',

[अन्यत् अपि] 'यत्' ('स्तुतिनमस्कारादि) 'च' 'कृतम्' अनुष्ठितं, [तत् सर्व्वम्] 'असत्' (ईश्वरप्राप्तिसाधनमार्गबाह्यत्वात्) 'इति' 'उच्यते' ; [हे] 'पार्थ,' 'तत्' 'प्रेत्य' परलोके 'न' फलति, फलाय भवति 'इह' अस्मिन् लोके 'च' 'नो' न [फलति] ।

28. Whatever is offered as an oblation, whatever is given, whatever austerity is practised, and whatever [else] is done without faith, is called 'asat'. O son of Prithá, that is not (nought), here and hereafter (*i.e.*, of no use in this life and in the next).

मोक्षयोगो नामाष्टादशोऽध्यायः



अर्जुन उवाच

संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक् केशिनिसूदन ॥१॥

१। [अर्जुनः उवाच] [हे] 'हृषीकेश' सर्व्वेन्द्रियनियामक, 'महाबाहो', 'केशिनिसूदन' केशिनामकदैत्यहन्तः, 'सन्न्यासस्य' सन्न्यासशब्दार्थस्य 'त्यागस्य' त्यागशब्दार्थस्य 'च' 'तत्त्वं' याथात्म्यं 'पृथक्' विवेकेन 'वेदितुं' ज्ञातुं (तयोः प्रभेदं ज्ञातुमित्यर्थः) 'इच्छामि'।

1. [Arjuna said,—] O Ruler of the senses, O Mighty-armed, O Slayer of Kesin, I desire to know separately the truth (*i. e.*, the true nature or distinctive signification) of *samnyása* aud *tyága.*

श्रीभगवान् उवाच

काम्यानां कर्म्मणां न्यासं संन्यासं कवयो विदुः ।
सर्व्वकर्म्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥२॥

२। [श्रीभगवान् उवाच] 'कवयः' पण्डिताः सूक्ष्मदर्शिनः 'काम्यानां' फलकामनया अनुष्ठितानां 'कर्म्मणां' (अश्वमेधादीनां) 'न्यासं' परित्यागं (सम्यक्

फलेः सह इति श्रीधरः) 'सन्न्यासं' सन्न्यासशब्दार्थं 'विदुः' जानन्ति ; 'विचक्षणाः' निपुणाः पण्डिताः 'सर्व्वकर्म्मफलत्यागं' सर्व्वेषां कर्म्मणां फलमात्रत्यागं 'त्यागं' त्यागशब्दार्थं 'प्राहुः' कथयन्ति ।

2. Sages know *samnyasa*, to be the abandonment of actions done with desire (*i. e.*, for some object and with a view to fruition in future) ; the wise declare the renouncement of the fruit of all actions to be *tyága.*

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपःकर्म्म न त्याज्यमिति चापरे ॥३॥

३ । 'एके' केचित् 'मनीषिणः' पण्डिताः (सांख्याः) 'कर्म्म' 'दोषवत्' दोषः रागादिः यथा त्यज्यते तथा 'त्याज्यं' त्यक्तव्यम् 'इति' 'प्राहुः' [अथवा दोषः अस्यास्ति इति 'दोषवत्' दोषयुक्तम् 'इति' (हेतोः) 'त्याज्यं' 'प्राहुः' इत्येवं वा अन्वयः] ; 'अपरे' अन्ये मनीषिणः (मीमांसकाः) 'यज्ञदान-तपःकर्म्म' यज्ञादिकं कर्म्म 'न' 'त्याज्यम्' 'इति' 'च' [प्राहुः] ।

3. Some thoughtful men declare that action should be abandoned as an evil ; others say that an act of sacrifice, gift, or penance should not be abandoned.

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः ॥४॥

४ । [हे] 'भरतसत्तम' भरतानां साधुतम, 'तत्र' 'त्यागे' विषये 'मे' मम (मम वचनात् इति शङ्करः) 'निश्चयं' निर्णयं (पूर्व्वाचार्य्यैः कृतं निश्चयम् इति मधुसूदनः) 'शृणु' । [हे] 'पुरुषव्याघ्र' पुरुषश्रेष्ठ, 'त्यागः' त्यागसन्न्यासशब्द-वाच्यः 'हि' 'त्रिविधः' त्रिप्रकारः 'सम्प्रकीर्त्तितः' शास्त्रेषु सम्यक् कथितः ।

4. O best of the race of Bharata, hear my positive conclusion about *tyága* (relinquishment). *Tyága*, verily, O bravest of men, is said to be threefold.

यज्ञदानतपःकर्म न त्याज्यं कार्य्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥५॥

५। 'यज्ञदानतपःकर्म्म' यज्ञ दानं तपः इत्येतत् त्रिविधं कर्म्म 'न' 'त्याज्यं'; 'तत्' 'कार्य्यं' करणीयम् 'एव'; [यतः] 'यज्ञः', 'दानं', 'तपः' 'च' 'एव' 'मनीषिणां' विवेकिनां अकृतफलाभिसन्धीनां 'पावनानि' शोधकानि चित्तशुद्धिकराणि 'एव' [भवन्ति] ।

5. An act of sacrifice, gift, or penance should not be renounced, but it should be performed; [for] sacrifice, gift and also penance are the purifiers of the wise.

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥६॥

६। [हे] 'पार्थ', 'एतानि' 'कर्म्माणि' यज्ञदानतपांसि 'अपि' 'तु' 'सङ्गम्' आसक्तिं विषयानुरागं 'फलानि' 'च' 'त्यक्त्वा' परित्यज्य 'कर्त्तव्यानि' अनुष्ठेयानि 'इति' एतत् 'मे' मम 'निश्चितम्' अवधारितं स्थिरीकृतं [अतएव] 'उत्तमम्' उत्कृष्टं चरमं 'मतम्' अभिप्रेतम्, अभिप्रायः ।

6. But O son of Prithá, even these actions should be performed by relinquishing attachment and the fruits; this is my decided and best opinion.

नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात् तस्य परित्यागस्तामसः परिकीर्तितः ॥७॥

७। 'नियतस्य' नित्यस्य 'कर्मणः' तु 'सन्न्यासः' परित्यागः 'न' 'उपपद्यते' युक्तो भवति ; 'मोहात्' अज्ञानात् 'तस्य' 'परित्यागः' 'तामसः' तमोगुणनिष्पन्नः [इति] 'परिकीर्त्तितः' कथितः [शास्त्रकारैः, सुधीभिः] ।

7. Verily, the renunciation of a prescribed action is not proper; its abandonment from ignorance (or delusion) is said to be of (i. e., due to) *tamas*.

दुःखमित्येव यत्कर्म कायक्लेशभयात् त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥८॥

८। 'दुःखं' दुःखजनकम् 'इति' 'एव' [मत्वा] [यः] 'कायक्लेशभयात्' शरीरदुःखभयात् 'यत्' 'कर्म्म' 'त्यजेत्', 'सः' 'राजसं' रजोनिर्व्वर्त्तं [तत्] 'त्यागं' 'कृत्वा' 'त्यागफलं' सात्त्विकत्यागस्य फलं ज्ञानपूर्व्वकस्य त्यागस्य फलमित्यर्थः 'न' 'एव' 'लभेत्' नैव प्राप्नोति ।

8. He who renounces an action from fear of physical suffering, thinking it to be painful, surely does not obtain the fruit of renouncement by [thus] making an abandonment impelled by passion (*rajas*),

कार्यमित्येव यत् कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥९॥

९। [हे] 'अर्ज्जुन', 'सङ्गं' कर्मसम्बन्धं 'फलं' 'च' 'एव' 'त्यक्त्वा', 'कार्य्यं'

कर्त्तव्यम् 'इति' (मत्वा) 'एव' 'यत्' 'नियतं' नित्यम् अवश्यकर्त्तव्यं 'कर्म्म' 'क्रियते', 'स:' 'त्याग:' 'सात्त्विक:' सत्त्वनिर्वृत्त: 'मत:' शिष्टानाम् अभिमत:।

9. O Arjuna, when one performs a prescribed action, abandoning attachment and also fruit and thinking that it ought to be done, that abandonment is regarded as of *sattva*.

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशय: ॥१०॥

१०। 'सत्त्वसमाविष्ट:' सत्त्वेन संव्याप्त: संयुक्त:, सात्त्विक: इत्यर्थ: 'मेधावी' स्थिरबुद्धि: 'छिन्नसंशय:' छिन्न: विनष्ट: संशय: सन्देह: मिथ्याज्ञानं वा यस्य स: 'त्यागी' 'अकुशलं' दु:खावहं काम्यं निषिद्धं वा 'कर्म्म' 'न' 'द्वेष्टि' प्रतिकूलतया मन्यते तस्मिन् कर्म्मणि अप्रीतिं न करोति, 'कुशले' सुखकरे [कर्म्मणि च] 'न' 'अनुषज्जते' आसक्तो भवति, तस्मिन् प्रीतिं न करोति इत्यर्थ:।

10. One who has abandoned [action], being pervaded by *sattva* (goodness or purity), and possessed of intelligence, with his doubts dispelled, hates not a painful action, nor is attached to a pleasant one.

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषत:।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥११॥

११। 'देहभृता' देहं बिभर्त्ति धारयति पोषयति इति देहभृत् तेन 'अशेषत:' नि:शेषेण 'कर्म्माणि' 'त्यक्तुं' 'न' 'हि' 'शक्यं', 'य:' 'तु' 'कर्म्मफलत्यागी' कर्म्मफलाभिसन्धिवर्ज्जित: 'स:' 'त्यागी' मुख्यत्यागी इति भाव: 'इति' 'अभिधीयते' कथ्यते।

11. Surely, actions cannot be completely abandoned by an embodied being; he who relinquishes the fruit of action is verily designated an abandoner.

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥१२॥

१२ । 'अत्यागिनां' सकामानां कर्म्मिणां 'प्रेत्य' परत्र शरीरपातादूर्द्ध्वम् 'अनिष्टम्' अनभिलषितं नरकादिलक्षणम् 'इष्टं' वाञ्छितं देवादिलक्षणं 'मिश्रं' इष्टानिष्टसंयुक्तं मनुष्यलक्षणं 'च' 'त्रिविधं' त्रिप्रकारं 'कर्म्मणः' 'फलं' 'भवति', 'तु' किन्तु 'सन्न्यासिनां' कर्म्मफलत्यागिनां 'क्वचित्' कस्मिन्नपि देशे काले वा [तत्] 'न' [भवति] ।

12. Threefold is the fruit of action after death in the case of non-abandoners—evil, good and mixed; but never of abandoners.

पञ्चैतानि महाबाहो कारणानि निबोध मे ।
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥१३॥

१३ । [हे] 'महाबाहो' 'सांख्ये' संख्यायन्ते व्युत्पाद्यन्ते ज्ञातव्याः पदार्थाः यस्मिन् शास्त्रे तत् सांख्यं वेदान्तः, तस्मिन् वेदान्तशास्त्रे (शङ्करः) यद्वा, संख्यायन्ते गण्यन्ते तत्त्वानि अस्मिन् इति सांख्यं तस्मिन् सांख्यशास्त्रे (श्रीधरः), 'कृतान्ते' कृतः अन्तः निर्णयः अस्मिन् इति 'कृतान्तं' सांख्यशास्त्रम् एव तस्मिन् कृतनिर्णये सांख्यशास्त्रे (श्रीधरः), यद्वा वेदान्ते (शङ्करः), 'सर्व्वकर्म्मणां' 'सिद्धये' निष्पत्तये 'प्रोक्तानि' कथितानि 'इमानि' वक्ष्यमाणानि 'पञ्च' 'कारणानि' 'मे' मम: मद्वचनात् 'निबोध' जानीहि ।

13. O Mighty-armed, learn from me the five factors in the accomplishment of all actions, as declared in the Sankhya system (or the Vedanta system) in which all principles leading to the knowledge of the self are enumerated.

अधिष्ठानं तथा कर्त्ता करणं च पृथग्विधम्।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥१४॥

१४। 'अधिष्ठानं' शरीरं 'तथा' 'कर्त्ता' भोक्ता (शङ्करः), जीवः इत्यर्थः, अहङ्कारः (श्रीधरः) 'पृथग्विधं' नानाप्रकारं 'करणं' चक्षुश्रोत्रादिकं 'च' 'विविधाः' विभिन्नप्रकाराः, 'पृथक्चेष्टाः' पृथग्भूताः व्यापाराः 'च' 'अत्र' एतेषु एव चतुर्षु 'पञ्चमं' पञ्चसंख्यापूरणं कारणं 'दैवम्' आदित्यादि चक्षुराद्यनुग्राहकं (शङ्करः), सर्व्वप्रेरकोऽन्तर्यामी वा (श्रीधरः) 'च' 'एव'।

14. The seat (i. e., the body, which is the seat of the emotions, &c.), as also the agent (egotism, according to Sridhara; भोक्ता (enjoyer), *i. e.*, the individual self, according to Sankara), and the various sense-organs, and the several actions of diverse kinds (such as, those of the senses, the upward and downward vital airs, &c.), and also the fifth among these, (namely,) the deity (*i. e.*, according to Sankara, Áditya or the sun and the other gods who help the eye and the other organs); or, according to Sridhara, the Supreme Self [as guiding and regulating the individual self or internal feelings].

शरीरवाङ्मनोभिर्यत् कर्म्म प्रारभते नरः।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥१५॥

१५। 'नरः' 'शरीरवाङ्मनोभिः' शरीरेण वाचा मनसा च 'यत्' 'न्याय्य' धर्म्मं' 'वा' 'विपरीतम्' अधर्म्मं' 'वा' 'कर्म्म' 'प्रारभते' निर्व्वर्त्तयति करोति 'एते' 'पञ्च' 'तस्य' सर्व्वस्य कर्म्मणः 'हेतवः' कारणानि।

15. Whatever action, right or wrong, a man does by his body, speech and mind, these are the causes thereof.

तत्रैवं सति कर्तारमात्मानं केवलं तु यः।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥१६॥

१६। 'एवं सति' यथोक्तैः पञ्चभिः हेतुभिः निर्वर्त्त्ये सति 'तत्र सर्व्वस्मिन् कर्म्मणि 'केवलम्' असङ्गम 'आत्मानं' 'तु' 'अकृतबुद्धित्वात्' असंस्कृतबुद्धिहेतोः 'यः' 'कर्त्तारं' 'पश्यति' 'सः' 'दुर्म्मतिः' दुष्टा कुत्सिता विपरीता मतिरस्येति 'न पश्यति' पश्यन्नपि सम्यक् न पश्यति, न ज्ञानवान् इत्यर्थः।

16. Such being the case, he, the senseless one, who, through unrefined understanding, regards the isolated self as the doer or agent in all action, sees not the truth.

यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते।
हत्वाऽपि स इमाँल्लोकान् न हन्ति न निवध्यते॥१७॥

१७। 'यस्य' 'अहंकृतः' अहम् इति कृतः अहंकर्त्ता इत्येवं लक्षणः 'भावः' भावना प्रत्ययः, अहं कर्त्ता इत्येवं बुद्धिः 'न' [अस्ति], 'यस्य' 'बुद्धिः' 'न लिप्यते' कर्म्मसु न सज्जते [च], 'सः' आत्मदर्शी 'इमान्' 'लोकान्' सर्व्वान् प्राणिनः 'हत्वा' 'अपि' 'न' 'हन्ति', 'न' [च] 'निवध्यते' तत्फले लिप्यते, अतः बन्धनं न प्राप्नोति।

17. He who has no feeling of egotism, and whose understanding is not attacched [to action or its fruit], even though he kills these people, kills not, nor is he bound (by the action).

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥१८॥

१८ । 'ज्ञानम्' इष्टसाधनम् एतत् इति बोधः, 'ज्ञेयं' ज्ञातव्यम्, इष्टसाधनं कर्म्म, 'परिज्ञाता' एतज्ज्ञानाश्रयः [इत्येवं] 'त्रिविधा' त्रिप्रकारा 'कर्म्मचोदना' सर्व्वकर्म्मणां प्रवर्त्तिका कर्म्मप्रवृत्तिहेतुः ; 'करणं' बाह्यं श्रोत्रादि अन्तःस्थं बुद्ध्यादि च साधकतमं, 'कर्म्म' कर्त्तुरीप्सिततमं, 'कर्त्ता' करणानां व्यापारयिता क्रियानिर्व्वर्त्तकः 'इति' एवं 'त्रिविधः' त्रिप्रकारः 'कर्म्मसंग्रहः' क्रियाश्रयः, कर्म्म एषु हि त्रिषु समवैति इत्यर्थः ।

18. Knowledge, the object of knowledge, the knower,—[these constitute] the threefold incitement to action; the organ, the action (the end or object of action—Sankara) and the agent,—thus threefold is the totality of action.

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥१९॥

१९ । 'गुणसंख्याने' गुणाः सम्यक् ख्यायन्ते प्रतिपाद्यन्ते अस्मिन् इति गुणसंख्यानं तस्मिन् गुणनिरूपके सांख्यशास्त्रे 'ज्ञानं', 'कर्म्म' 'च', 'कर्त्ता' 'च' 'गुणभेदतः' सत्त्वरजस्तमोभेदेन 'त्रिधा' 'एव' 'प्रोच्यते' कथ्यते ; 'तानि' ज्ञानादीनि वक्ष्यमाणानि 'अपि' 'यथावत्' यथाशास्त्रं 'शृणु' ।

19. In the enumeration of the *gunas*, (*i. e.*, in the Sankhya system of philosophy, which deals with the three essential *gunas* or qualities), knowledge, and action, and the agent or doer, are declared to be of three kinds only, according to the distinction of the qualities. Hear duly of these also.

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥२०॥

२०। 'येन' ज्ञानेन 'विभक्तेषु' मिथोभिन्नेषु 'सर्व्वभूतेषु' सर्व्वेषु भूतेषु 'अविभक्तं' निरन्तरं भेदशून्यम 'एकम्' 'अव्ययं' निर्व्विकारं नित्यं 'भावं' वस्तु आत्मवस्तु इत्यर्थः 'ईक्षते' पश्यति 'तत् ज्ञानं' 'सात्त्विकं' सत्त्वगुणसम्भूत सम्यग्-दर्शनं 'विद्धि' ।

20. Know that knowledge to be of *sattva* by which one sees one Reality undivided in all distinct things or beings.

पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥२१॥

२१। 'पृथक्त्वेन' भेदेन प्रतिशरीरम् अन्यत्वेन 'तु' 'यत्' 'ज्ञानं' 'सर्व्वेषु' 'भूतेषु' 'पृथग्विधान्' भिन्नलक्षणान् 'नानाभावान्' वस्तुतः एव अनेकान् क्षेत्रज्ञान् 'वेत्ति' जानाति, 'तत्' 'ज्ञानं' 'राजसं' रजोगुणनिर्व्वृत्तम् असम्यग्-दर्शनं 'विद्धि' ।

21. But know that knowledge to be of *rajas* which perceives various realities in all beings or things as of separate kinds, on account of their differences.

यत् तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पञ्च तत् तामसमुदाहृतम् ॥२२॥

२२। 'यत्' (ज्ञानं) 'तु' 'एकस्मिन्' 'कार्य्ये' देहादौ 'कृत्स्नवत्' समस्तवत् परिपूर्णवत् सर्व्वविषयमिव 'सक्तम्' एतावान् एव आत्मा ईश्वरो वा नातः परमस्ति इति अभिनिवेशयुक्तम् 'अहैतुकं' हेतुवर्ज्जितम् उत्पत्तिरहितम् अयुक्तिकम् 'अतत्त्वार्थवत्' (यथाभूत: अर्थ:=तत्त्वार्थ:, स: अस्य ज्ञेयभूत: अस्ति इति तत्त्वार्थवत्, न तत्त्वार्थवत्=अतत्त्वार्थवत्) अयथार्थविषयकं परमार्थावलम्बनशून्यम् 'अल्प'' तुच्छं 'च', 'तत्' ज्ञानं 'तामसं' तमोगुणजातम् 'उदाहृतं' कथितम् ।

22. While that knowledge is declared to be of *tamas*, which is attached to one thing as if it were all, which is without reason, which has no perception of [the meaning of] the reality, and which is insignificant.

नियतं सङ्गरहितमरागद्वेषत: कृतम् ।
अफलप्रेप्सुना कर्म यत् तत् सात्त्विकमुच्यते ॥२३॥

२३। 'अफलप्रेप्सुना' फलं प्राप्तुम् इच्छति इति फलप्रेप्सु: तद्विलक्षणेन निष्कामेण फलाकाङ्क्षारहितेन कर्त्रा 'नियतं' नित्यतया विहितं 'सङ्गरहितम्' आसक्तिवर्ज्जितं कर्त्तृत्वाभिनिवेशशून्यम् 'अरागद्वेषत: कृतं' रागेण पुत्रादिषु प्रीतिप्रयुक्तेन द्वेषेण शत्रौ प्रति द्वेषप्रयुक्तेन वा न अनुष्ठितं 'यत् कर्म्म' 'तत्' 'सात्त्विकं कर्म्म' उच्यते ।

23. That action is declared to be of *sattva* which is obligatory or necessary, free from attachment, and is done, not from love or hatred, by one who is not desirous of fruit.

यत् तु कामेप्सुना कर्म्म साहङ्कारेण वा पुनः ।
क्रियते बहुलायासं तद् राजसमुदाहृतम् ॥२४॥

२४। 'तु' किन्तु 'कामेप्सुना' फलं प्राप्तुम् इच्छता कर्त्रा 'साहङ्कारेण' मत्सम: कोऽन्य: अस्ति इत्येवम् अहङ्कारयुक्तेन 'वा' 'बहुलायासम्' अतिक्लेशयुक्तं 'यत्' 'पुनः' (पुनःशब्दः पादपूरणार्थः—शङ्करः) 'कर्म्म' 'क्रियते' 'तत्' 'राजसम्' 'उदाहृतं' कथितम् ।

24. But that action is declared to be of *rajas* which causes much trouble and which is done by one longing for objects of desire, or with egotism.

अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत् तत् तामसमुच्यते ॥२५॥

२५। 'अनुबन्धं' पश्चाद्भाविशुभाशुभं 'क्षयं' वित्तादिविनाशं 'हिंसां' परपीडां 'पौरुषं' पुरुषकारं शक्नोमि इदं कर्म्म समापयितुम् इत्येवम् आत्मसामर्थ्यं 'च' 'अनपेक्ष्य' अपर्य्यालोच्य 'मोहात्' अविवेकतः 'यत्' 'कर्म्म' 'आरभ्यते' 'तत्' 'तामसम्' 'उच्यते' ।

25. That action is said to be of *tamas* which is undertaken through delusion without regard to consequence, loss, injury [to others], and [one's own] power.

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते ॥२६॥

२६। 'मुक्तसङ्गः' मुक्तः परित्यक्तः सङ्गः फलाभिसन्धिः कर्त्तृत्वाभिमानः येन सः त्यक्ताभिनिवेशः 'अनहंवादी' नाहंवदनशीलः गर्व्वोक्तिरहितः 'धृत्युत्साहसमन्वितः' धृतिः धैर्य्यम् उत्साहः उद्यमः ताभ्यां समन्वितः संयुक्तः 'सिद्ध्यसिद्ध्योः' क्रियमाणस्य कर्म्मणः फलसिद्धौ असिद्धौ च 'निर्व्विकारः' हर्षविषादशून्यः 'कर्त्ता' 'सात्त्विकः' 'उच्यते'।

26. The agent who is freed from attachment, who is not egotistical, who is possessed of firmness and energy and who is unchanged in success and failure, is said to be of *sattva.*

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः ॥२७॥

२७। 'रागी' आसक्तः 'कर्म्मफलप्रेप्सुः' कर्म्मफलकामी 'लुब्धः' 'हिंसात्मकः' 'अशुचिः' 'हर्षशोकान्वितः' 'कर्त्ता' 'राजसः' 'परिकीर्त्तितः' कथितः।

27. The agent who is passionate, desirous of the fruit of action, covetous, cruel-hearted, impure, and liable to joy and grief, is said to be of *rajas.*

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते ॥२८॥

२८। 'अयुक्तः' असमाहितः 'प्राकृतः' विवेकशून्यः 'स्तब्धः' अनम्रः 'शठः' मायावी स्वशक्तिगोपनकारी 'नैष्कृतिकः' परापमानकारी (श्रीधरः) परवृत्तिच्छेदनपरः (शङ्करः) 'अलसः' 'विषादी' सर्व्वदा शोकशीलः 'दीर्घसूत्री' मन्थर-

प्रभृति: यत् अद्य वा श्व: वा कार्य्यं तत् मासेनापि न करोति य: एवम्भूत: 'च' 'कर्त्ता' 'तामस:' 'उच्यते' ।

28. The agent who is unsteadied, unrefined, stubborn, crafty, malicious, indolent, desponding and procrastinating, is said to be of *tamas.*

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय ॥२९॥

२९ । [हे] 'धनञ्जय अर्ज्जुन (दिग्विजये मानुषं दैवं च प्रभूतं धनम् अजयत् तेनासौ धनञ्जय:), 'बुद्धे:' 'धृते:' 'च' 'गुणत:' सत्त्वादिगुणभेदत: 'एव' 'त्रिविधं' 'पृथक्त्वेन' विवेकत: 'अशेषेण' निरवशेषत: 'प्रोच्यमानं' कथ्यमानं 'भेदं' 'शृणु' ।

29. Hear, O Dhanajaya, the threefold division, according to qualities, of understanding and of firmness, as related separately and completely [by me below].

प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये ।
बन्धं मोक्षञ्च या वेत्ति बुद्धि: सा पार्थ सात्त्विकी ॥३०॥

३० । [हे] 'पार्थ', 'प्रवृत्तिं' 'च' 'निवृत्तिं' 'च' 'कार्य्याकार्य्ये' 'भयाभये' 'बन्धं' 'मोक्षं' 'च' 'या' 'बुद्धि:' [यथावत्] 'वेत्ति' 'सा' 'सात्त्विकी' [बुद्धि:] ।

30. O son of Prithá, that understanding is of *sattva*, which [truly] knows [the distinctions of] activity and inactivity, what ought and what ought not to be done, fear and absence of fear, bondage and liberation.

यया धर्ममधर्मञ्च कार्य्यञ्चाकार्य्यमेव च।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ॥३१॥

३१। [हे] 'पार्थ', 'यया' [बुद्धा लोकः] 'धर्म्म'' 'अधर्म्म'' 'कार्य्यम्' 'अकार्य्य'' 'च' 'अयथावत्' 'प्रजानाति' 'सा' 'राजसी' 'बुद्धिः'।

31. O son of Prithá, that understanding is of *rajas* by which one erroneously understands right and wrong, and what ought and ought not to be done.

अधर्मं धर्ममिति या मन्यते तमसावृता।
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥३२॥

३२। [हे] 'पार्थ', 'या' [बुद्धिः] 'अधर्म्म'' 'धर्म्मम्' 'इति' 'मन्यते', 'सर्व्वार्थान्' सर्व्वान् एव ज्ञेयपदार्थान् 'विपरीतान्' [एव] 'च' [मन्यते], 'तमसा' तमोगुणेन 'आवृता' आच्छादिता 'सा' 'बुद्धिः' 'तामसी'।

32. O son of Prithá, that understanding is of *tamas*, which, shrouded by darkness, thinks right to be wrong and all things to be just the contrary of what they are.

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥३३॥

३३।. [हे] 'पार्थ', 'योगेन' योगाभ्यासहेतुना 'अव्यभिचारिण्या' विषयान्तरम् अधारयन्त्या 'यया' 'धृत्या' [साधकः] 'मनःप्राणेन्द्रियक्रियाः'

मनसः प्राणानाम् इन्द्रियाणाञ्च क्रियाः चेष्टाः 'धारयते' उन्मार्गप्रवृत्तेः निरुणद्धि 'सा' 'धृतिः' सात्त्विकी'।

33. That firmness, unswerving through [the practice of] *yoga* is of *sattva*, O son of Prithá, by which one controls the actions of the sensorium, the vital airs, and the sense-organs.

यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥३४॥

३४। [हे] 'पार्थ', 'अर्ज्जुन', 'यया' 'धृत्या' 'तु' [साधकः] 'धर्म्म-कामार्थान्' धर्म्मञ्च कामञ्च अर्थञ्च तान् 'धारयते', न विमुञ्चति, 'प्रसङ्गेन' यस्य यस्य धर्म्मादेः धारणप्रसङ्गः तेन तेन प्रसङ्गेन 'फलाकाङ्क्षी' [च भवति] 'सा' 'धृतिः' 'राजसी'।

34. But that firmness, O Arjuna, son of Prithá, is of *rajas*, by which one adheres to duty, desire, and wealth, and wishes to have the respective fruits [of these pursuits.]

यया स्वप्नं भयं शोकं विषादं मदमेव च।
न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी ॥३५॥

३५। [हे] 'पार्थ', 'दुर्म्मेधाः' कुत्सितबुद्धिः [पुरुषः] 'यया' [धृत्या] 'स्वप्नं' निद्रां 'भयं' त्रासं 'शोकं' 'विषादं' 'मदं' गर्व्वम् 'एव' 'च' 'न' 'विमुञ्चति' त्यजति (किन्तु धारयति एव), 'सा' 'धृतिः' 'तामसी' 'मता' अभिप्रेता।

35. That firmness is of *tamas*, O son of Prithá, by which a dull-headed man does not give up sleep, fear, grief, despondency and pride.

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ।
अभ्यासाद्रमते यत्र दुःखान्तञ्च निगच्छति ॥३६॥
यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ।
तत् सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥३७॥

३६, ३७। [च] 'भरतर्षभ' भरतश्रेष्ठ, 'इदानीम्' अधुना 'त्रिविधं' 'सुखं' 'तु' 'मे' मम सकाशात् 'शृणु', 'यत्र' यस्मिन् सुखे सुखानुभवे इत्यर्थः 'अभ्यासात्' पुनः पुनः परिशीलनात् [लोकः] 'रमते' रतिं प्रतिपद्यते, 'दुःखान्तं' दुःखस्य अवसानम् उपशमं 'च' 'निगच्छति' निश्चयेन प्राप्नोति (३६)। कीदृशं तत् इत्यत्र आह—'यत्' 'तत्' 'अग्रे' पूर्व्वं प्रथमसन्निपाते 'विषं' दुःखावहम 'इव' 'परिणामे' शेषे ज्ञानादिपरिपाके 'अमृतोपमम्' अमृतसदृशम् 'आत्मबुद्धिप्रसादजं' आत्मविषया बुद्धिः तस्याः प्रसादः स्वच्छतया अवस्थानं नैर्म्मल्यं ततः जातं यत् (सुखं) 'तत्' 'सुखं' 'सात्त्विकं' 'प्रोक्तं' विद्वद्भिरिति शेषः ।

36-37. But now, O chief of the descendants of Bharata, hear from me about the threefold pleasure (or happiness), that in which one, from practice (*i. e.*, as the result of habit or repeated enjoyment), experiences delight and surely reaches the end of pain (or misery). That which is like poison at first, but like nectar in the end,—that pleasure born of the clearness of the knowledge of the self, is said to be of *sattva*.

विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत् सुखं राजसं स्मृतम् ॥३८॥

३८। 'विषयेन्द्रियसंयोगात्' विषयाणाम् इन्द्रियाणां च संयोगात् 'यत्'

[सुखं] 'तत्' 'अग्रे' प्रथमलक्षणे 'अमृतोपमम्' अमृतम् उपमा यस्य तादृशम् अमृतसमं 'परिणामे' 'विषम् इव' विषतुल्यम् (इहामुत्र च दुःखहेतुत्वात्) 'तत्' 'सुखं' 'राजसं' 'स्मृतं' कथितम्।

38. That happiness (or pleasure) is said to be of *rajas*, which, (arising) from the contact of objects and sense-organs, is at first like nectar, but in the end like poison.

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥३९॥

३९। 'निद्रालस्यप्रमादोत्थं' निद्रा च आलस्यं च प्रमादः वस्तुविवेकासामर्थ्यं कर्त्तव्यार्थानवधानराहित्यं 'च' एतेभ्यः जातं 'यत्' 'सुखम्' 'अग्रे' प्रथमम् 'अनुबन्धे' परिणामे पश्चादपि च 'आत्मनः' 'मोहनं' मोहकरं, 'तत्' 'तामसं' (सुखम्) 'उदाहृतम्' उक्तम्।

39. That happiness or pleasure is said to be of *tamas*, which, arising from sleep, indolence and carelessness, is delusive of the self, both at first and in its result.

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥४०॥

४०। 'पृथिव्यां' 'वा' 'दिवि' स्वर्गे 'देवेषु' 'वा' 'पुनः' 'तत्' 'सत्त्वं' प्राणिजातं 'न' 'अस्ति', 'यत्' 'एभिः' 'प्रकृतिजैः' प्रकृतिसम्भवैः 'त्रिभिः' सत्त्वादिभिः 'गुणैः' 'मुक्तं' परित्यक्तं, हीनं 'स्यात्' भवेत्।

40. There is no being, either on earth, or again among the gods in heaven, that is free from these three *gunas* (qualities) born of Prakriti.

ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवै र्गुणैः ॥४१॥

४१। [हे] 'परन्तप' शत्रुतापन, 'ब्राह्मणक्षत्रियविशां' ब्राह्मणानां क्षत्रियाणां विशः वैश्यानां तेषां 'शूद्राणां' 'च' 'कर्माणि' 'स्वभावप्रभवैः' प्रकृतिसमुत्पन्नैः 'गुणैः' सत्त्वादिभिः 'प्रविभक्तानि' प्रकर्षेण विभागतो विहितानि इतरेतरविभागेन व्यवस्थापितानि ।

41. O harasser of foes, the duties of Bráhmans, Kshatriyas and Vaisyas, and also of Súdras are divided according to the *gunas* born of Prakriti.

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥४२॥

४२। 'शमः' चित्तोपरमः, 'दमः' बाह्येन्द्रियोपरमः, 'तपः' इन्द्रियसंयमपूर्व्वकंशरीरपीडनं 'शौचं' बाह्याभ्यन्तरशुचिता, 'क्षान्तिः' क्षमा, 'आर्ज्जवं' ऋजुता, 'ज्ञानं' शास्त्रीयं ज्ञानं 'विज्ञानम्' ज्ञानलब्धशास्त्रार्थस्य अनुभवः, 'आस्तिक्यम्' अस्तिभावः अस्ति ईश्वरः परलोकश्च इति निश्चयः 'एत च' 'स्वभावजं' ब्राह्मणस्य स्वभावात् जातं 'ब्रह्मकर्म' ब्राह्मणजातेः कर्म ।

42. Tranquillity, restraint of the senses, austerity, purity, forgiveness, straightforwardness, knowledge, wisdom (or spiritual discernment), and also faith,—[these constitute] the natural duty of a Bráhmana.

शौर्य्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रकर्म स्वभावजम् ॥४३॥

४३। 'शौर्य्यं' पराक्रमः, 'तेजः' 'धृतिः' धैर्य्यं, 'दाक्ष्यं' कार्य्येषु कौशलं, 'युद्धे' 'च' 'अपि' 'अपलायनं', 'दानम्' देयेषु मुक्तहस्तता, 'ईश्वरभावः' नियमनशक्तिः 'च' 'स्वभावजं' 'क्षात्रं' क्षत्रियजाते विहितं 'कर्म्म'।

43. Valour, courage, firmness, dexterity, and also not flying in battle (*i. e.*, from the field of battle) charity, a lordly nature—(these are) the natural duty of a Kshatriya.

कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् ।
परिचर्य्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥४४॥

४४। 'कृषिगोरक्ष्यवाणिज्यं' कृषिः कर्षणं गां रक्षति इति गोरक्षः तस्य भावः गोरक्ष्यं पाशुपाल्यं वाणिज्यं क्रयविक्रयादि वणिककर्म्म 'स्वभावजं' 'वैश्यकर्म्म', एतत् वैश्यजातेः स्वाभाविकं कर्म्म। 'शूद्रस्य' 'अपि' 'परिचर्य्यात्मकं' द्विजातेः शुश्रूषात्मकं 'कर्म्म' 'स्वभावजं' स्वाभाविकम्।

44. Ploughing (or agriculture), cow-protection, and trade are the duty of a Vaisya, born of nature. And the duty of a Súdra, born of Nature, is of the nature of service (*i. e.*, consists in the service of the superior classes or castes.)

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥४५॥

४५। 'स्वे स्वे' यथोक्तलक्षणभेदे स्वस्वाधिकारविहिते 'कर्म्मणि' 'अभिरतः'

तत्परः 'नरः' 'संसिद्धिं' ज्ञाननिष्ठां सम्यक्ज्ञानं 'लभते' प्राप्नोति। 'स्वकर्म-निरतः' [नरः] 'यथा' येन प्रकारेण 'सिद्धिं' तत्त्वज्ञानं 'विन्दति' लभते 'तत्' तं प्रकारं 'शृणु'।

45. Every man devoted to his own duty, attains perfection. Now, hear how one, devoted to one's own duty, attains perfection.

यतः प्रवृत्तिर्भूतानां येन सर्व्वमिदं ततम्।
स्वकर्मणा तमभ्यर्च्च्य सिद्धिं विन्दति मानवः ॥४६॥

४६। 'यतः' यस्मात् परमेश्वरात् 'भूतानां' प्राणिनां 'प्रवृत्तिः' चेष्टा उत्पत्तिर्वा (मधुसूदनः) [स्यात्], 'येन' परमेश्वरेण 'सर्व्वम्' 'इदं' जगत् 'ततं' व्याप्तं, 'मानवः' 'स्वकर्म्मणा' पूर्व्वोक्तेन स्वस्वाधिकारविहितेन कर्म्मणा 'तं' (परमेश्वरम्) 'अभ्यर्च्च्य' संसेव्य, पूजयित्वा 'सिद्धिं' 'विन्दति' लभते।

46. A man attains perfection by worshipping, by his own duty, him from whom is the activity (or birth) of all beings and by whom all this (*i. e.*, the whole universe) is pervaded.

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्विषम् ॥४७॥

४७। 'विगुणः' सदोषः [अपि] 'स्वधर्म्मः' स्वकीयः धर्म्मः स्वाधिकार-विहितो धर्म्मः 'स्वनुष्ठितात्' सम्यक् अनुष्ठितात् 'परधर्म्मात्' अधिकारान्तर-विहितात् धर्म्मात् 'श्रेयान्' प्रशस्ततरः [यतः] 'स्वभावनियतं' स्वभावेन पूर्व्वोक्तेन नियतं नियमेन निर्द्दिष्टं स्वभावजमित्यर्थः 'कर्म्म' 'कुर्व्वन्' [नरः] 'किल्विषं' पापं 'न' 'आप्नोति'। तृतीयाध्यायस्य पञ्चत्रिंशत् श्लोको द्रष्टव्यः।

47. Better is one's own duty [though] destitute of merits, than the well-performed duty of another. One doing the duty fixed by Nature incurs not sin.

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥४८॥

४८। [च] 'कौन्तेय', 'सदोषं' दोषयुक्तम् 'अपि' 'सहजं' सह जन्मना एव उत्पन्नं स्वभावनियतं 'कर्म' 'न' 'त्यजेत्', 'हि' यस्मात् 'सर्वारम्भाः' सर्वाणि एव कर्माणि 'धूमेन अग्निः इव' यथा सहजेन धूमेन अग्निः आवृतः तद्वत् 'दोषेण' 'आवृताः' व्याप्ताः एव ।

48. O son of Kunti, one ought not to abandon the duty born with one's self, though faulty, for all undertakings are covered with fault, as fire with smoke.

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥४९॥

४९। 'सर्वत्र' आसक्तिनिमित्तेषु, 'असक्तबुद्धिः' असक्ता सङ्गरहिता बुद्धिः अन्तःकरणं यस्य सः आसक्तिशून्यान्तःकरणः, 'जितात्मा' जितः वशीकृतः आत्मा यस्य सः जितेन्द्रियः निरहङ्कारः वा, 'विगतस्पृहः' विगता स्पृहा विषयतृष्णा फलाकाङ्क्षा वा यस्मात् सः [जनः] 'सन्न्यासेन' सर्व्वकर्म्मफलत्यागेन 'परमां' प्रकृष्टां 'नैष्कर्म्यसिद्धिं' निर्गतानि कर्म्माणि यस्मात् सः निष्कर्म्मा, तस्य भावः नैष्कर्म्यं, तस्य सिद्धिः निष्पत्तिः (शङ्करः) तां सर्व्वकर्म्मनिवृत्तिलक्षणां सत्त्वशुद्धिं (श्रीधरः) 'अधिगच्छति' प्राप्नोति ।

49. He who is everywhere of unattached understanding, self-subdued, and void of desire, attains the highest perfection of freedom from action by renunciation.

सिद्धिं प्राप्तो यथा ब्रह्म तथाऽऽप्नोति निबोध मे ।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥५०॥

५० । [हे] 'कौन्तेय', 'सिद्धिं' नैष्कर्म्यसिद्धिं 'प्राप्तः' [सन्] 'यथा' [नरः] 'ब्रह्म' 'आप्नोति' 'तथा' तं प्रकारं 'समासेन' संक्षेपेण 'एव' 'मे' मम सकाशात् 'निबोध' जानीहि, 'या' ब्रह्मप्राप्तिः 'ज्ञानस्य' 'परा' सर्वोत्कृष्टा 'निष्ठा' परिसमाप्तिः ।

50. O son of Kuntí, learn from me only in brief how one who has attained perfection attains Brahman, which is the highest state of knowledge.

बुद्ध्या विशुद्धया युक्तो धृत्याऽऽत्मानं नियम्य च ।
शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥५१॥
विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥५२॥
अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥५३॥

५१-५३ । 'विशुद्धया' 'बुद्ध्या' 'युक्तः' [सन्] 'धृत्या' 'आत्मानं' मनः 'नियम्य' 'च' 'शब्दादीन्' 'विषयान्' 'त्यक्त्वा', 'रागद्वेषौ' 'च' 'व्युदस्य' [वि + उत् + अस् (निक्षेपे) + ल्यप्] परित्यज्य दूरतः परिहृत्य (५१) ; 'विविक्तसेवी-

सेवी' विविक्तान् निर्जनान् (शुद्धान् वा) देशान् सेवितुं शीलम् अस्येति निर्जनदेशावस्थायी (शुचिदेशावस्थायी वा) 'लघ्वाशी' मितभोजी, 'यतवाक्कायमानसः' वाक् च कायश्च मानसञ्च यतानि संयतानि यस्य सः संयतवाग्देहचित्तः [भूत्वा] 'नित्यं' सर्व्वदा 'ध्यानयोगपरः' 'वैराग्यं' 'समुपाश्रितः' सम्यग् आश्रितः [भूत्वा] (५२) : 'अहङ्कारं' 'बलं' दुराग्रहं 'दर्पं' 'कामं', 'क्रोधं', 'परिग्रहं' बाह्योपकरणबाहुल्यं [च] 'विमुच्य' 'निर्म्ममः' ममताशून्यः [सन्] 'शान्तः' उपरतः [जनः] 'ब्रह्मभूयाय' ब्रह्मभवनाय 'कल्पते' समर्थो भवति ।

51-53. Possessed of a pure understanding, and controlling self by firmness, abandoning sound and other objects of sense, and casting aside attraction and repulsion, seeking solitude (or frequenting solitary or pure places), moderate in eating, with speech, body and mind subdued, always given to *yoga*, having recourse to indifference [to worldly things] (52), giving up egotism, violence, arrogance, desire (or lust), anger, and [unnecessary] appendages, one becomes fit for identity with Brahman.

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्व्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥५४॥

५४ । 'ब्रह्मभूतः' ब्रह्मण्यवस्थितः 'प्रसन्नात्मा' प्रसन्नचित्तः [जनः] 'न' 'शोचति' सन्तप्यते, 'न' 'काङ्क्षति' अप्राप्तं प्राप्तुम् इच्छति, 'सर्व्वेषु' 'भूतेषु' 'समः' समभावापन्नः आत्मौपम्येन समदर्शनशीलः (६।३२) [सन्] 'पराम्' उत्तमां 'मद्भक्तिं' 'लभते' ।

54. Becoming one with Brahman, one neither

grieves nor desires, but being the same to all beings, attains supreme devotion to me.

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥५५॥

५५। [अहं] 'यावान्' यत्परिमाणः सर्व्वव्यापीत्यर्थः 'यः' सच्चिदानन्द-रूपः 'च' 'अस्मि', [इति, तथाभूतं] 'मां' 'भक्त्या' 'तत्त्वतः' याथात्म्येन 'अभिजानाति' अनुभवति, 'ततः' तदनन्तरं 'मां' 'तत्त्वतः' 'ज्ञात्वा' अनुभूय 'तदनन्तरं' [मां] 'विशते' प्रविशति, मया सह युज्यते मद्रूपः परमात्मरूपः एव भवतीत्यर्थो वा।

55. By that devotion he knows me in truth, how great and who I am; then, knowing me in truth, he enters into me.

सर्व्वकर्माण्यपि सदा कुर्व्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥५६॥

५६। 'सदा' 'सर्व्वकर्म्माणि' 'कुर्व्वाणः' 'अपि' 'मद्व्यपाश्रयः' अहमेव व्यपाश्रयः आश्रयणीयः यस्य सः मत्परायणः [जनः] 'मत्प्रसादात्' ममानुग्रहात् 'शाश्वतं' नित्यम् अनादि 'अव्ययं' 'पदं' स्थानम् 'अवाप्नोति' लभते।

56. Always performing all actions, he, depending on me, attains the eternal immutable abode.

चेतसा सर्व्वकर्माणि मयि संन्यस्य मत्परः ।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥५७॥

५७। 'चेतसा' विवेकबुद्ध्या 'सर्व्वकर्म्माणि' 'मयि' 'संन्यस्य' समर्प्य 'मत्परः' मदेकपुरुषार्थः [सन्] 'बुद्धियोगम्' 'उपाश्रित्य' लब्ध्वा 'सततं' सर्व्वदा कर्म्मानुष्ठानकालेऽपि 'मच्चित्तः' मच्चिन्तापरायणः 'भव'।

57. Renouncing, in thought, all actions in me, intent on me and having recourse to intellectual communion, fix your thought ever on me.

मच्चित्तः सर्व्वदुर्गाणि मत्प्रसादात् तरिष्यसि।
अथ चेत्त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसि ॥५८॥

५८। 'त्वं' 'मच्चित्तः' [सन्] 'मत्प्रसादात्' 'सर्व्वदुर्गाणि' सर्व्वाणि अपि दुर्गाणि दुस्तराणि संसारहेतुजातानि दुःखानि 'तरिष्यसि' अतिक्रमिष्यसि। 'अथ' पक्षान्तरे 'चेत्' यदि 'अहङ्कारात्' [मदुक्तम् एवं] 'न' 'श्रोष्यसि' [तर्हि] 'विनङ्क्ष्यसि' विनाशं गमिष्यसि, पुरुषार्थात् भ्रष्टो भविष्यसि।

58. Fixing your thought on me, you shall, by my grace, overcome all obstacles hard to overcome. But if, from self-conceit, you do not listen to me, you shall perish.

यदहङ्कारमाश्रित्य न योत्स्य इति मन्यसे।
मिथ्यैव व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥५९॥

५९। 'अहङ्कारम्' 'आश्रित्य' 'न योत्स्ये' अहं युद्धं न करिष्यामि 'इति' 'यत्' 'मन्यसे' चिन्तयसि, [इति] 'ते' तव 'व्यवसायः' निश्चयः 'मिथ्या' 'एव' [यतः] 'प्रकृतिः' क्षात्रस्वभावः 'त्वां' 'नियोक्ष्यति' युद्धे प्रवर्त्तयिष्यति।

59. That you think, out of egotism, "I will not

fight", this resolve of yours is vain; for your nature will constrain you [to fight].

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा।
कर्तुं नेच्छसि यत् मोहात् करिष्यस्यवशोऽपि तत् ॥६०॥

६०। [हे] 'कौन्तेय', 'स्वभावजेन' प्रकृतिजातेन 'स्वेन' स्वीयेन 'कर्मणा' शौर्यादिना यथोक्तेन 'निबद्धः' यन्त्रितः [त्वम् अधुना] 'यत्' कर्म 'मोहात् कर्तुं न इच्छसि तत्' [अतःपरं] 'अवशः' रागद्वेषादि-परवशः एव [भूत्वा] 'अपि' 'करिष्यसि'।

60. O son of Kuntí, what you [now, though bound to do as your natural duty, refuse to do out of delusion, you will [hereafter] do under compulsion [of blind impulses].

ईश्वरः सर्व्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन् सर्व्वभूतानि यन्त्रारूढानि मायया ॥६१॥

६१। [हे] 'अर्ज्जुन', 'ईश्वरः' 'मायया' निजशक्त्या 'सर्व्वभूतानि' 'यन्त्रारूढानि' [इव] यथा दारुयन्त्रम् आरूढानि कृत्रिमाणि भूतानि लौकिकी मायावी सूत्रधारी वा भ्रामयन् वर्त्तते तथा 'भ्रामयन्' तत्तत्कर्म्मसु प्रवर्त्तयन् 'सर्व्वभूतानां' 'हृद्देशे' हृदयमध्ये 'तिष्ठति'।

61. O Arjuna, the Lord dwells in the region of the heart of all beings, whirling by Máyá (his sovereign power) all beings [as if] mounted on a machine.

तमेव शरणं गच्छ सर्वभावेन भारत।
तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥६२॥

६२। [हे] 'भारत' 'सर्व्वभावेन' सर्व्वात्मना मनसा वाचा कर्म्मणा च इत्यर्थः [त्वं] 'तम्' ईश्वरम् 'एव' 'शरणम्' आश्रयं 'गच्छ', 'तत्प्रसादात्' 'परां' 'शान्तिं' 'शाश्वतम्' अक्षयं 'स्थानं' मम ईश्वरस्य परमं पदं 'च' 'प्राप्स्यसि'।

62. Seek shelter with him alone (or, seek that refuge, *i. e.*, the Supreme Being, alone) with all thy soul, O Bhárata ; by his grace you shall attain supreme peace, and the Eternal Abode.

इति ते ज्ञानमाख्यातं गुह्याद् गुह्यतरं मया।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥६३॥

६३। 'इति' अनेन प्रकारेण 'गुह्यात्' गोप्यात् गुह्यतरं' अतशयेन गुह्यं रहस्यमित्यर्थः 'ज्ञानं' 'ते' तुभ्यं 'मया' 'आख्यातम्' उपदिष्टम्। 'अशेषेण' सामस्त्येन 'एतत्' यथोक्तं शास्त्रं 'विमृश्य' आलोच्य 'यथा' 'इच्छसि' 'तथा' 'कुरु', 'ज्ञानं कर्म्म वा यत् इष्टं तत् अनुतिष्ठ इत्यर्थः। गीताशास्त्रे पर्य्यालोचिते मोहस्ते निवर्त्तिष्यते इति भावः।

63. Thus has knowledge, more secret than any other secret, been declared by me to you. Pondering over it fully, act as you like.

सर्व्वगुह्यतमं भूयः शृणु मे परमं वचः।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥६४॥

६४। 'सर्व्वगुह्यतमं' सर्व्वभ्योऽपि गुह्येभ्यो गुह्यतमम् अत्यन्तरहस्यं 'मे' मम 'परमं' प्रकृष्टं 'वचः' वाक्यं 'भूयः' पुनरपि 'शृणु', [त्वं] 'मे' मम 'दृढम्' अत्यन्तम् 'इष्टः' प्रियः 'असि' 'इति' [मत्वा] 'ततः' तेन कारणेन 'ते' तव 'हितं' कल्याणजनकं वचः 'वक्ष्यामि' कथयिष्यामि।

64. Hear again my supreme word, the most secret of all. You are most dear to me, therefore will I tell you what is for your good. [If the reading be '*drira-matih*' instead of '*driramiti*', the rendering will be 'resolute' or 'strong-willed'.

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥६५॥

६५। [त्वं] 'मन्मनाः' मच्चिन्तापरायणः, 'मद्भक्तः' 'मद्भजनशीलः 'मद्याजी' मद्यजनपरः 'च' 'भव', 'माम्' (एव) नमस्कुरु, [एवं कुर्व्वन् त्वं] 'माम्' 'एव' 'सत्यं' निःसंशयम् 'एष्यसि' प्राप्स्यसि, 'अहं' 'ते' तुभ्यम् [इति] 'प्रतिजाने' प्रतिज्ञां करोमि, [यतः त्वं] 'मे' मम 'प्रियः' 'असि'। 'सत्यं ते प्रतिजाने' इति वा अन्वयः, तत्र सत्यं यथार्थं, सत्यमेव प्रतिज्ञां ते करोमीत्यर्थः।

65. Fix your mind on me, be my devotee, worship me, bow down to me, and you shall surely come to me. I promise this to you, for you are dear to me. [If '*satyam*' be taken with '*pratijáne*' the rendering will be 'I truly declare to you', or 'I declare the truth to you'].

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥६६॥

६६। 'सर्व्वधर्म्मान्' सर्व्वान् धर्म्मान् "एते शास्त्रेण विहिताः, अतः कर्त्तव्याः", इति विधिकैङ्कर्य्यं (श्रीधरः) 'परित्यज्य' माम् एकं 'शरणं' 'व्रज' गच्छ; मदेकशरणो भव, साक्षात् मदादेशं पालय। 'अहं' 'त्वां' 'सर्व्वपापेभ्यः' 'मोक्षयिष्यामि', [त्वं] 'मा शुचः' शोकं मा कार्षीः।

66. Abandoning all duties [done in servile obedience to Law] come unto me as your sole refuge ; I will deliver you from all sins ; [therefore] grieve not.

इदं ते नातपस्काय नाभक्ताय कदाचन ।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥६७॥

६७। 'अतपस्काय' तपोरहिताय धर्म्मानुष्ठानहीनाय 'ते' त्वया 'इदं' गीताशास्त्रं 'न' 'वाच्यं' वक्तव्यम्, 'न' 'अभक्ताय' भक्तिहीनाय 'न' 'च' 'अशुश्रूषवे' परिचर्य्याम् अकुर्व्वते, श्रोतुम् अनिच्छते, वा [जनाय] 'कदाचन' [वाच्यं], 'यः' 'मां' [illegible]रम् 'अभ्यसूयति' दोषारोपेण द्वेष्टि [तस्मै अपि] 'च' 'न' [वाच्यम्] ।

67. This [Gítá] is never to be spoken by thee to one who neglects his religious austerities, nor to one who is not devoted, nor to one who is not desirous of serving [one's preceptor] (or hearing it), nor yet to one who calumniates me.

य इदं परमं गुह्यं मद्भक्तेष्वभिध्यास्यति ।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥६८॥

६८। 'यः 'इमं' 'परमं' 'गुह्यं गोप्यं गीताशास्त्रं 'मद्भक्तेषु' 'अभिधास्यति' वक्ष्यति [सः] 'मयि' 'परां' 'भक्तिं' 'कृत्वा' 'असंशयः' निःसन्देहः [सन्] 'माम्' 'एव 'एष्यति' प्राप्स्यति, मुच्यते । 'एष्यति' 'एव' इत्येवं वा अन्वयः ।

68. He who, with single-hearted devotion to me, will tell this supreme secret to my devotees, shall come to me, freed from all doubts.

न च तस्मान् मनुष्येषु कश्चिन्मे प्रियकृत्तमः ।
भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥६९॥

६९। 'मनुष्येषु' 'तस्मात्' मद्भक्तेभ्यः गीताशास्त्रव्याख्यातुः सकाशात् 'कश्चित्' 'मे' मम 'प्रियकृत्तमः' अतिशयेन प्रियकृत् परितोषकर्त्ता 'च' 'न' [अस्ति], 'तस्मात्' 'अन्यः' 'मे' 'प्रियतरः' 'च' 'भुवि' जगति 'न' 'भविता' भविष्यति।

69. There is none among men who does a dearer service to me than he. And there shall not be another on earth dearer to me than he.

अध्येष्यते च य इमं धर्म्यं संवादमावयोः।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥७०॥

७०। 'यः' 'च' 'आवयोः' कृष्णार्ज्जुनयोः 'इमं' 'धर्म्यं' धर्म्मानपेतं कर्त्तव्यत्वरूपेण विहितं 'सम्वादं' कथोपकथनरूपं गीताशास्त्रम् 'अध्येष्यते' पठिष्यति 'तेन' पुंसा 'ज्ञानयज्ञेन' सर्व्वात्मदर्शनरूपेण यज्ञेन 'अहम्' 'इष्टः' पूजितः 'स्यां' भवेयम् 'इति' 'मे' मम 'मतिः' निश्चयः।

70. And I shall be worshipped with the sacrifice of knowledge by him who will study this religious dialogue between us. This is my opinion.

श्रद्धावाननसूयश्च शृणुयादपि यो नरः।
सोऽपि मुक्तः शुभाल्लोँकान् प्राप्नुयात् पुण्यकर्मणाम् ॥७१॥

७१। 'श्रद्धावान्' श्रद्धायुक्तः 'अनसूयः' असूयाहीनः द्वेषवर्ज्जितः 'च' 'यः' 'नरः' [इदं गीताशास्त्रं] 'शृणुयात्' 'अपि' 'सः' 'अपि' [नरः] 'मुक्तः' [सन्] 'पुण्यकर्म्मणां' 'शुभान्' 'लोकान्' 'प्राप्नुयात्' लभेत।

71. And that man also, who, full of faith and free

from malice, will merely hear [this], shall attain to the happy regions of those who do meritorious acts.

कच्चिदेतत् श्रुतं पार्थ त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसम्मोहः प्रणष्टस्ते धनञ्जय ॥७२॥

७२ । [हे] 'पार्थ', 'त्वया' 'एकाग्रेण' विक्षेपविहीनेन 'चेतसा' चित्तेन 'एतत्' 'श्रुतं' 'कच्चित्' किं ? [हे] 'धनञ्जय', 'ते' तव 'अज्ञानसंमोहः' —अज्ञाननिमित्ता अविवेकता 'प्रणष्टः' प्रकर्षेण नष्टः 'कच्चित्' किं ?

72. Has this been heard by you, O son of Prithá, with an attentive mind ? Has your delusion, born of ignorance, been dispelled, O Dhananjaya ?

अर्जुन उवाच

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥७३॥

७३ । [अर्ज्जुनः उवाच—] [हे] 'अच्युत', 'मम' 'मोहः' 'नष्टः', 'मया' 'त्वत्प्रसादात्' तवानुग्रहात् [आत्मतत्त्वविषया] 'स्मृतिः' 'लब्धा', [अहं] 'स्थितः' आत्मज्ञाने प्रतिष्ठितः [तथा] 'गतसन्देहः' मुक्तसंशयः 'अस्मि' । [अधुना] 'तव वचनं करिष्ये' तवाज्ञां पालयिष्यामि ।

73. [Arjuna said—] O immutable One, by thy grace my delusion is destroyed, and the recollection [of great truths] has been gained by me. I am firmly established in self-knowledge and my doubts are gone. [Now] I will do thy bidding.

सञ्जय उवाच

इत्यहं वासुदेवस्य पार्थस्य च महात्मनः।
संवादमिममश्रौषमद्भुतं लोमहर्षणम् ॥७४॥

७४। [सञ्जय: उवाच—] 'अहम्' 'इति' एवं 'वासुदेवस्य' 'महात्मन:' 'पार्थस्य' 'च' 'इमं' 'लोमहर्षणं' रोमाञ्चकरम् 'अद्भुतं' 'संवादं' गुरुशिष्यभावेन प्रश्नप्रतिवचनाभिधानम् 'अश्रौषम्' श्रुतवान् अस्मि ।

74. [Sanjaya said—] Thus did I hear this wonderfull and thrilling dialogue between Vásudeva and the high-souled son of Prithá.

व्यासप्रसादाच्छ्रुतवानिमं गुह्यमहं परम्।
योगं योगेश्वरात् कृष्णात् साक्षात् कथयतः स्वयम् ॥७५॥

७५। 'अहं' 'व्यासप्रसादात्' 'इमं' 'परं गुह्यं' 'योगं' योगतत्त्वं 'स्वयं' कथयत: 'योगेश्वरात् कृष्णात्' 'साक्षात्' (न तु परम्परया) 'श्रुतवान्' ।

75. By the favour of Vyása, I heard this supreme and secret doctrine of *yoga* direct from Krishna, the Lord of *yoga*, while he was himself expounding it.

राजन् संस्मृत्य संस्मृत्य संवादमिममद्भुतम्।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥७६॥

७६। [हे] 'राजन्' धृतराष्ट्र, 'केशवार्जुनयो:' 'इमं' 'पुण्यं' पापहरम् 'अद्भुतं' 'संवादं' 'संस्मृत्य संस्मृत्य' पुन: पुन: संस्मृत्य 'मुहु: मुहु:' प्रतिक्षणम् [अहं] 'हृष्यामि' हर्षं प्राप्नोमि ।

76. O king [Dhritaráshtra], remembering again and

again this holy and wonderful colloquy between Kesava and Arjuna, I am feeling repeated transports of joy.

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयो मे महान् राजन् हृष्यामि च पुनःपुनः ॥७७॥

७७। [हे] 'राजन्', 'हरेः' कृष्णस्य 'तत्' 'अत्यद्भुतं' 'रूपं' विश्वरूपं 'संस्मृत्य संस्मृत्य' 'मे' मम 'महान्' 'विस्मयः' 'च' [भवति], [अहं] 'पुनःपुनः' 'हृष्यामि' 'च'।

77. And remembering again and again that most wonderful form of God, great is my amazement, O king; and I am transported with joy over and over again.

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्द्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥७८॥

७८। 'यत्र' येषां पक्षे 'योगेश्वरः' 'कृष्णः' वर्त्तते 'यत्र' 'धनुर्द्धरः' गाण्डीवधन्वा 'पार्थः' [च वर्त्तते], 'तत्र' तस्मिन् पक्षे 'श्रीः' सम्पत् राजलक्ष्मीः, 'विजयः' विजिगीषा लाभः, 'भूतिः' श्रियः उत्तरोत्तरं विवृद्धिः, 'ध्रुवा' अव्यभिचारिणी 'नीतिः' न्यायः [अपि विराजते], इति 'मे' मम 'मतिः' निश्चयः।

78. I believe that wherever there are Krishna, the Lord of *yoga*, and Pártha, the archer, there [surely] are fortune, victory and prosperity, and there also is the immutable Law of Right.
